वैदिक-बौद्ध-जैन-तर्कभाषाणां तुलनात्मकं समीक्षात्मकमध्ययनम्



लेखिका

डॉ. इन्दुमती मिश्रा

वैदिक-बौद्ध-जैन-तर्कभाषाणां तुलनात्मकं समीक्षात्मकमध्ययनम्

लेखिका

डॉ० इन्दुमती मिश्रा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य विद्यावारिधि
(पी०-एच० डी) इत्युपाधये प्रस्तुतः
शोधप्रबन्धः २०००

●

पुस्तक प्राप्ति स्थान :
सी. 4-36/44 कबीर नगर
दुर्गाकुण्ड, वाराणसी

●

प्रतय: : 500
प्रथमावृत्ति : 2006

राष्ट्रिय-संस्कृत-संस्थानस्य
आर्थिक-सहयोगेन प्रकाशितम्

मूल्यम् :

●

मुद्रक :
आनन्दकानन प्रेस
डी. 14/65, टेढ़ीनीम, वाराणसी
फोन : 2392337, 2391326

कृतज्ञता-ज्ञापनम्

द्विदल-कमलमध्ये वद्धसंवित्समुद्रं,
धृतशिवमयगात्रं साधकानुग्रहार्थम्।
श्रुतिशिरसि लसन्तं बोधमार्तण्डमूर्तिं,
शमित-तिमिर-शोकं श्रीगुरुं भावयामि॥
हृदम्बुजे कर्णिकमध्यसंस्थे,
सिंहासने संस्थितदिव्यमूर्तिम्।
ध्यायेद् गुरुं चन्द्रशिलाप्रकाशं,
चित्पुस्तकाभीष्टवरं दधानम्॥

कस्यापि कार्यस्य साफल्याय आत्मनः उत्साहः, श्रेष्ठानां, प्रेष्ठानां, गुरुणां च आशीर्वादः, शुभचिन्तकानां सहयोगः अत्यन्तं प्राबल्यं भजते। अतः तान् प्रतिकृतज्ञताज्ञापन मपि नैजं पूतं कर्तव्यं मन्ये। सर्वप्रथमं पं० श्रीदेवेन्द्रशास्त्रिमहानुभावान् प्रति हार्दिकीं कृतज्ञतां ज्ञापयामि, येषां सत्प्रेरणया अहं तर्कभाषासदृशं शुष्कविषयमाश्रित्य शोधप्रबन्धलेखने समुद्यता अभवम्। यतः यस्मात् कालात् अहं गृहस्थाश्रमे प्रविष्टा, तस्मात् कालात् त एव मम संरक्षकाः, गुरुकल्पाश्च सन्ति, तेषामेव विचारैरहमनुप्राणिता आसम्। गौतमगोत्रवंशीया पुत्रवधूरहम्, नव्यन्यायविषयः कुलस्यास्य सुरक्षितः न्यासः आसीत् यस्य शाखाः प्रशाखाः मिथिलादिप्रान्तेषु प्राप्यन्ते। न्यायविषय एव जटिलः, तस्य सरलीकृतस्वरूपं प्रदाय आदिवासिजातीयेषु प्रचारसम्पादनं नितान्तं दुष्करं कार्यमस्ति तत्कार्यं सम्पादितवन्तः अस्माकं पूज्याः शास्त्रि-महोदयाः।

सर्वशास्त्र-मर्मज्ञाः अलौकिकप्रतिभासम्पन्नाः सन्तोऽपि एते कदाचिदपि यशोऽभिलाषिणः नाभूवन्, एतत्सर्वमेतेषां लोकोत्तरं व्यक्तित्वं ख्यापयति। ईदृशानां महापुरुषाणां आत्मनः आदर्शभूतानां पूज्यानां श्री शास्त्रिमहोदयानां कृते यावन्ति अपि श्रद्धापुष्पाणि अर्पयन्ते, तानि न्यूनानि एव प्रतिभान्ति। शोधप्रबन्धलेखने तेषामाशीर्वादं प्राप्य कृत्कृत्या वर्ते, नतेन मूर्ध्ना च स्वीयं प्रणामाञ्जलिं तेषां पादपद्मेषु समर्पयामि।

क्रमेऽस्मिन् सम्पूर्णानन्दसंस्कृतविश्वविद्यालये तुलनात्मकदर्शन-विभागध्यक्षाणां स्वशोधनिर्देशकानां स्व० प्रो० राधेश्यामधरद्विवेदि-महोदयानां हृदयेन कृतज्ञा वर्ते येषां महता सहयोगेन उत्साहवर्द्धनेन असीमानुकम्पया च एतत् शोधकार्यं पूर्णतामेति। क्रमेऽस्मिन् न्यायविभागाध्यक्षचराः प्रो० वशिष्ट त्रिपाठि महोदयाः कथं विस्मर्तुं शक्यन्ते एते खलु अत्यन्तं सत्यनिष्ठाः यथार्थवक्तारश्च सन्ति। एभिः सदैव ममोत्साहः वर्द्धितः, मनोबलञ्च दृढ़ीकृतम्। मम सफलतायां यदि किञ्चित् कारणीभूतं वर्तते तदस्ति तेषां साधुमार्गप्रदर्शनम्। अतः एतान् प्रति विनम्रनमस्कारान् निवेदयामि, हृदयेन कृतज्ञतां च ज्ञापयामि।

स्वज्येष्ठभगिन्याः उषामहोदयायाः, आशा महोदयायाश्च अपि कृतज्ञा अस्मि ययोः कठिन-परिश्रमस्य फलस्वरूपमेव मया एतत् शोधलेखनकार्यं सम्पादितम्। यतोहि यया यदापि पुस्तकानामावश्यकता अनुभूता, एते येन केनापि प्रकारेण तत्पूर्तिं विधाय, मह्यं सर्वविधसहयोगं प्रदाय मामनुगृहीतवत्यौ।

क्रमेऽस्मिन् डॉ० हरिप्रसादोऽधिकारिमहोदयानामपि कृतज्ञा अस्मि, ये सदैव मां प्रोत्साहितवन्तः, स्वाशिर्वचोभिः मां सनाथीतवन्तः, यथाशीघ्रं मम शोधपूर्णतां जिज्ञासितवन्तश्च।

अहं मातुः कैलाशीदेव्याः पितुः श्री सीतारामपतित्रिपाठिनः नितान्तं कृतज्ञा अस्मि, यौ मयि समुचित-संस्कारान् नियोजितवन्तौ, सन्मार्गं प्रदर्शितवन्तौ च यतोहि पितरोः आशीर्वाद एव सन्ततेः जीवनपथं व्यवस्थापयति।

प्रसङ्गेऽस्मिन् अहं आत्मनः अनुजाय श्री प्रवाधानन्दाय अनेकशः

साधुवादान् वितरामि, यः खलु मम वहुविधं साहाय्यं कृतवान्।

सम्पूर्णस्यापि पुस्तकस्य प्रूफसंशोधनं कृतवती, महारानी-बनारस महिलामहाविद्यालयस्य संस्कृतप्राध्यापिका डॉ० उमा तिवारीमहोदया, अहमस्यै हार्दिकान् साधुवादान् प्रयच्छामि।

अत्र अन्ताराष्ट्रीय-संस्कृत-प्रचार-संस्थानस्य संस्थापकाः, निर्देशकाश्च डॉ० शरदिन्दुकुमारत्रिपाठिमहोदयाः विशेषेणोल्लेखनीयाः सन्ति, ये मम पुस्तकस्यास्य पूर्णतायाम् अनेकविधं सहयोगं कृतवन्तः। तान् प्रत्यपि हार्दिकीं कृतज्ञतां ज्ञापयामि।

नितान्तमल्पीयसि काले पुस्तकस्यास्य प्रकाशने आनन्दकानन मुद्रणालयस्य स्वामिनः श्रीशिवदत्तद्विवेदिमहोदयाः बहुसहयोगं कृतवन्तः तेभ्योऽपि साधुवादान् वितरामि।

अन्ते शोधप्रबन्धेऽस्मिन् येषां केषामपि कश्चन सहयोगः वर्तते तान् सर्वान् प्रति धन्यवादं वितीर्य आत्मनो वाचमवसाययामि। अत्यन्तमल्पीयसि काले कार्यमिदं सम्पन्नतां गतम्, यद्यपि प्रूफसंशोधनं सावधानतया कृतमस्ति, तथापि बहुत्र अशुद्धयः दृश्यन्ते, तदर्थं क्षमां याचे।

—*श्रीमती इन्दुमती देवी*

भूमिका

विश्वस्य सभ्यदेशेषु अन्यतमं खलु भारतं नाम, तस्यैतदभिधानमेकतो भरतस्येदमितिव्युत्पत्या महाराजभरतद्वारासंघटिते तन्नीतिद्वारा संचालितराष्ट्रार्थेऽन्वर्थतां व्रजति, तत्रैवापरतो ज्ञाने रतं तत्त्वज्ञानार्जने व्यापृतमर्थमप्युपस्थापयति। तत्र प्रथमान्वर्थता तद्वैज्ञानिक-समाजरचनया प्रमाणिता भवति या किल वर्णाश्रमव्यवस्थेति नाम्ना चिरं विदिता वर्तते। भौतिकविज्ञानस्योत्कर्षकालेऽपि व्यवस्थेयं स्वीयं शिर उन्नमय्य विराजत एव। द्वितीया विशेषताऽन्वर्थता व्रा राष्ट्रस्य विद्याप्रेमिणां सज्जनानाश्चिरन्तनसाधनया प्रमाणिता भवति। यत्फलस्वरूपाणि उच्चं-कोटिकानेकविधशास्त्राण्यद्यापि उपलभ्यन्ते। ईदृक्-शास्त्रेषु आन्वीक्षिकी प्रमुखं स्थानं भजते। ज्ञानोत्पत्तिप्रक्रियाया अध्यनेनेदं स्पष्टं प्रतीयते यदादिमानवेन स्वप्रत्यक्षज्ञानस्याविसंवादित्वसिद्धये तत्संपुष्टये च कस्यापि तर्कस्य हेतोर्युक्तेर्वाऽऽवश्यकताऽनुभूता स्यात्। यतस्संस्कृत-परम्परायां तर्कपरिशुद्धताया: काचित्समृद्धा परम्परा परिलोक्यत एव।

बौद्धपालिग्रन्थे "ब्रह्मजालसुत्ते" तर्कतार्किकशब्दौ प्रयुक्तौ वर्तेते, यद्यपि तत्र तर्कस्याध्ययनमात्मज्ञानायाऽनुपयोगि एव परन्तु तार्किक-तर्कशब्दयो: प्रयोगस्तत्र क्रमेण कुतर्कवितर्कवितण्डा-वादव्यर्थ-विवादादीनामर्थे कृत:, प्रयोगश्चानयोर्वस्तुव्यवस्थाया: कृते आवश्यक आसीत्। न्यायसूत्रे तत्व्याख्यासु च तर्कोऽनुमानस्यानुग्राहक इति स्वीकृत:। न्यायकोषकारेण तर्कशब्दस्य अनेकेऽर्था प्रस्तुता: येष्वांन्वीक्षिकी अनुमानविद्या च प्रामुख्यं भजत:। वाल्मीकिरामायणे आन्वीक्षिकीशब्दस्य प्रयोग: हेतुविद्याया: तर्कशास्त्रस्य च कृते कृतो वर्तते। महाभारते चान्वीक्षिक्यातिरिक्तं हेतुहेतुकतर्कविद्याप्रभृतिशब्दानां प्रयोग: प्राप्यते। तर्कविद्या तु आन्वीक्षिक्या एव पर्यायभूता। एकस्मिन् स्थले याज्ञवल्क्येन विश्वबसो:, प्रश्ननानामुत्तराणि आन्वीक्षिकीमाध्यमेन प्रदाय तत्पराविद्यानाम्ना

सम्बोधिता। द्वितीयस्थले राजर्षिजनकं सम्बोधयन् याज्ञवल्क्य: आन्वीक्षिक्कीमुपदिशन् मोक्षविद्यां निगदितवान्। शाङ्करभाष्ये च वाकोवाक्यमित्यस्यार्थ: तर्कशास्त्रमिति प्रतिपादितम्। डा० भगवानदास-महोदयेन भाष्यस्य इममर्थं स्वीकृत्य तर्कशास्त्रमुत्तर-प्रत्युत्तरशास्त्रं युक्तिप्रत्युक्तिशास्त्रञ्च इति संज्ञा: अभिहिता:। कौटिल्यस्यार्थशास्त्रे आन्वीक्षकीसम्बन्धे इदं कथितं यत् विभिन्नयुक्तिद्वारा विषयाणां बलाऽबलमनयैव विद्यया ज्ञायते। विद्येयं लोकान्नुपकरोति, सुखदु:खयोर्बुद्धिस्थैर्यं कुरुते, प्रज्ञावचनक्रियासु च नैपुण्यमादधाति। यथादीप: समस्तान् पदार्थान् प्रकाशयति तथैव विद्येयं समस्तानि कार्याणि, समस्तविद्या:, समस्तान् धर्मान् च प्रकाशयति, अतएवेयमनुमानस्यैव पूर्वरूपम् इति। वात्स्यानस्यानुसारं प्रत्यागमयोर्दृश्यमानपदार्थस्य विशेष-रूपेण ज्ञानमन्वीक्षा इति कथ्यते। इयमन्वीक्षैवानुमानम् इति। तात्पर्यमेतद्यत् येन शास्त्रेण वस्तुसिद्धयेऽनुमानस्य विशेषव्यवहारो जायते तदेवानुमानशास्त्रं न्यायशास्त्रमन्वीक्षाशास्त्रमिति संज्ञानमभिधत्ते। इत्थं न्यायशास्त्रमात्मसात् कुर्वती आन्वीक्षिकी अनुमानरूपे परिणताऽभूत्।

सतीशचन्द्रविद्याभूषणेन आन्वीक्षिक्यमात्मविद्या: हेतुविद्याश्च समाविष्टा:। बौद्धतर्कग्रन्थेषु अतिप्राचीनौ तर्कशास्त्रोपायहृदयाख्यौ ग्रन्थौ समुपलभ्येते। तर्कशास्त्रे त्रीणि प्रकरणानि सन्ति, यत्र प्रथमे प्रकरणे परस्परं दोषापादानस्य, खण्डन-प्रक्रियाया:, प्रत्यक्षविरुद्धस्य, अनुमानविरुद्धस्य, लोकविरुद्धस्य च वर्णनमस्ति। हेतुसापेक्षफलसाधनन्यायानाञ्च प्रतिपादन-मपि अत्रैव कृतम्। द्वितीये अध्याये खण्डनभेदानां निरूपणं, तृतीये च तेषां द्वाविंशतिनिग्रहस्थानानां वर्णनं कृतं येषां गौतमन्यायसूत्रे प्रतिपादनं कृतमस्ति, परन्तु अत्र गौतमसूत्रमिव पञ्चहेत्त्वाभासा: नैवापितु त्रय एव हेत्त्वाभासा: निरूपिता: वर्तन्ते। स्पष्टमेतद्यत् शास्त्रार्थेषु विजयप्राप्त्यर्थं विरोधिनां पराजयार्थञ्च सदसत्तर्काणां समुपस्थापनं तदानीन्तनी प्रवृत्तिरासीत्।

उपायहृदये चत्वारि प्रकरणानि सन्ति, तत्राऽदौ वादस्य गुणदोषा:। विवेचिता:। वादात् क्रोधाऽहंकारादीनामुत्पत्तिर्जायते अतो वादो नैव कर्तव्य

इति प्रतिपादितं तत्रैवेदमपि प्रतिपादितं यत् वादस्तिरस्काराय लाभायाथवा यशसे न प्रत्युत सुलक्षणदुर्लक्षणोपदेशानामिच्छया विधातव्यः। तर्कस्यावश्यकता अतएवापि अनुभूयते यत् यदि तर्को न स्याच्चेल्लोके मूर्खाणां बाहुल्यं मिथ्याज्ञानस्य साम्राज्यञ्च स्यात्, अनेन संसारस्य दुर्गतिरुत्तमकार्याणां क्षतिश्च सञ्जायेत।

जैनतार्किकाणां विकासः स्वामिसमन्तभद्रप्रभृतेः प्रारभ्यते। आत्मीमांसायुक्तानुशासन-स्वयम्भूस्तोत्रेषु तर्कस्यानेके भेदाः परिलक्ष्यन्ते। येषु तर्कस्य उपादान-साध्य-साधन-उदाहरण-अविनाभावादीनां निर्देशः कृतो वर्तते। सिद्धसेनस्य न्यायावतारः अनुमानस्यैवावतारो वर्तते। अस्मिन् अनुमानस्वरूपं तस्य स्वार्थपरार्थात्मकभेदद्वयस्य निर्देशः अस्ति। सहैवात्र साधमर्म्यवैधर्म्ययोः दृष्टान्तद्वयस्य साध्यसिद्धेः भारस्य हेत्वाभासस्य दृष्टान्ताभासस्य च तार्किकोपकरणस्य च प्रतिपादनं कृतमस्ति।

अकलङ्कस्य न्यायविवेचनं तत्संस्थापकत्वेन प्रवर्तकत्वेन च स्वीकरोति। तस्य विशालन्यायप्रकरणेषु न्यायविनिश्चय-प्रमाणसंग्रहः—लघीयस्त्रय-सिद्धिविनिश्चयप्रभृतयः जैनप्रमाणशास्त्रस्य मूर्धन्य। ग्रन्थाः सम्मिलिताः सन्ति। इत्थं जैनतार्किकपरम्परायाः विकासे विद्यानन्द-माणिक्य-नन्दी-अभयदेव-हेमचन्द्रादयोऽपि स्वीयं विशिष्टं सहयोगं दत्तवन्तः सन्ति। तत्र हेमचन्द्रस्य प्रमाणमीमांसा धर्मभूषणस्य न्यायदीपिका यशोविजयस्य च जैनतर्कभाषा जैनतर्कविवेचनायाः प्रमाणभूताः ग्रन्थाः वर्तन्ते।

प्रस्तुतेऽस्मिन् शोधप्रबन्धे वैदिक-बौद्ध-जैनतर्कशास्त्रेषु उपलब्धानां तिसृणामपि तर्कभाषाणां दृष्ट्या ऐतिहासिकं समीक्षात्मकञ्च अध्ययनं प्रस्तुतमस्ति। सहैव आसां तर्कभाषाणां माध्यमेन तर्कस्वरूपं तेषां क्रमिक-विकासः, व्यवस्था, अनुमानविमर्शः हेतुवादस्य सिद्धान्तः, व्याप्तिविमर्शः, सतः स्वरूपं प्रकाशयितुं कश्चन प्रयासः कृतः वर्तते। यतोहि एतेषां समस्तानामपि विषयाणां परस्परं घनिष्ठः सम्बन्धः वर्तते। भारतीय-चिन्तकैः वस्तुतः सत्तर्कस्य नियमाः एव न्यायशास्त्रमिति निगदितमस्ति। सत्तर्कस्य कार्यं ज्ञानस्य सत्यताम् असत्यताञ्च परीक्षितुं वर्तते। तर्कमाश्रित्यैव

मनुष्यः ज्ञानस्य विशालमं शमर्जयितुं पारयति। नवीनः कश्चन अनुभवः नूतनं हेतुं स्वीकृत्य स्वीक्रियते। अतएव स्पष्टमेतत् यत् तर्कसहाय्येन मनुष्यः आत्मनः ज्ञानस्य सम्वर्द्धनं सत्यापनञ्च कुरुते। तर्कजन्यं ज्ञानमेव मानवम् असत्यात् सत्यं प्रति प्रेरयति।

कस्मिंश्चिदपि अनुमाने हेतोर्गमकंता अविनाभावमाश्रयते। अस्य च अविनाभावस्य ज्ञानं तर्कद्वारा भवति। इत्थमनुमानस्य सत्यतायाः निर्णयोऽपि तर्काधार एव तिष्ठति। अतः भारतीयन्यायशास्त्रे तर्कानुमानयोर्मध्ये विभेदिका काचिद् सीमारेखा विद्यत एव। प्रकारान्तरेण इदं वक्तुं शक्यते यद् तर्कक्षेत्रमनुमानातिरिक्तम् अधिकमेव। अनुमानदोषाणां निराकरणं विधाय तदध्ययनं व्यवस्थापयितुं तर्क एव समर्थः। इत्थं तर्कशास्त्रं तद्विज्ञानमस्ति यत् अनुमानस्य व्यापक नियामानां सहायकमानसिकक्रियाणाञ्च अध्ययनम् अस्माद्धेतोः कारयति येन तद्वयवहारेण सत्यमधिगम्येत। अनया परिभाषाया प्रकारद्वयस्य तथ्यं प्रस्फुटितं भवति। प्रथमं यत् अनुमानदोषाणां विश्लेषणं तर्कद्वारा भवति, तस्याविसंवादकतायाः पुष्टिरपि तर्कद्वारा जायते। द्वितीयं तर्कद्वारा अनुमाने सहायक-क्रियाणामध्ययनं क्रियते। अर्थात् मिथ्यानुमानं न भवेत् तदर्थं तर्कः उपस्थाप्यते। सत्यापसारिते तर्कशास्त्रे न प्रतिभाति अनुमानस्य पृथक् किञ्चिदस्तित्वम्।

मदीयेऽस्मिन् शोधप्रबन्धे षडध्यायाः सन्ति। प्रथमेऽध्याये वैदिक-बौद्धजैनतर्कभाषाणामैतिहासिकः विकासः, सतः स्वरूपञ्च प्रदर्शितमस्ति। द्वितीयेऽध्याये मोक्षाकरगुप्तस्य जीवनपरिचयः तस्य कृतयः तासां वैशिष्ट्यं महत्त्वञ्च विवेचितमस्ति। तृतीयेऽध्याये वैदिकतर्कभाषाकारस्य केशव-मिश्रस्य जीवनपरिचयः तत्कृतयः तासां विशिष्टताः प्रतिपादिताः सन्ति। चतुर्थेऽध्याये यशोविजयस्य जीवनवृत्तं कृतयः तासां महत्त्वं प्रस्तुतमस्ति। पञ्चमेऽध्याये वैदिकबौद्धजैनदृष्टिकोणेन तिसृणामपि तर्कभाषाणां समीक्षा कृता वर्तते। षष्ठे चाध्याये आसां तिसृणामपि तर्कभाषाणां समधिगतदृष्ट्या समीक्षणां प्रस्तुतमस्ति। तदनु शोधप्रबन्धस्यास्य उपसंहारः लिखितः अस्ति।

विषयानुक्रमणिका

प्रथमोऽध्यायः

१. *तर्कशास्त्रस्यैतिहासिकविकासदृष्ट्या तर्कभाषाणाम्महत्त्वं, वैदिक-साहित्ये तर्कशास्त्रस्य विवेचञ्च—*

तर्कशास्त्रं नाम सत्यतर्कान् असत्तर्केभ्यः पृथक्कुरुते। तत्सिद्धानां विधीनां चाध्ययनमस्ति तर्कशास्त्रस्याध्ययनम्। एतस्य नैतत्तात्पर्यं यत् येन तर्कशास्त्रं नाधीतं तेन सत्यतर्काः नोपस्थाप्यन्ते। परन्तु निश्चितमेतत् यत् येन तर्कशास्त्रमधीतं सः तर्कयुतानां सामान्यसिद्धान्तानां विषये ज्ञानवान् सन् तस्य जनस्यापेक्षयाऽधिकः समर्थः भवति, येन तर्कशास्त्रं किञ्चिदपि नाधीतम्। अत्र प्रश्नस्समुदेति यत् वैदिकसाहित्ये ऐतिहासिकविकासदृष्ट्या तर्कशास्त्रं कथं विवेचितमस्ति। तद्विवेचनात् प्राक् इदमत्रावधेयं यत् वैदिकसाहित्यमिति किम्? वेदशब्दस्य व्युत्पत्तिमधिकृत्य संहिताभ्य आरभ्य उपनिषद्–आयुर्वेद–नाट्यशास्त्र–कोश–कल्प–मनुस्मृतिप्रभृति-ग्रन्थेषु पर्याप्तं विवेचनमस्ति। वेद शब्दः चतुर्धा निष्पद्यते विद् ज्ञाने, विद् सत्तायां, विद् लाभे, विद्–विचारणे च। एतेषु सर्वेष्वपि ग्रन्थेषु वेदशब्दस्यार्थः मन्त्रसंहितानामर्थकृतो भवति। ऋग्वेदभाष्यभूमिकायां स्वामिदयानन्दसरस्वतिना–"विदन्ति जानन्ति विद्यन्ते भवन्ति विन्दन्ति लभन्ते विचारयन्ति सर्वे मनुष्याः सत्यविद्यां यैर्येषु वा तथा विद्वांसश्च भवन्ति, ते वेदाः", इति वेदशब्दस्यार्थः कृतः। अस्यायमर्थः यत् येन मनुष्याः सत्यविद्यां जानन्ति, विचारयन्ति प्राप्नुवन्ति ज्ञानवन्तो वा भवन्ति, स वेद इति।

विद् धातोः निष्पन्नत्वात् व्याकरणदृष्ट्यार्थः—ज्ञानम्। अत्र ज्ञानशब्दः व्यापकार्थप्रतिपादकः। वैदिकसाहित्यस्य अध्ययनक्रमे काममितिहासभूगोलगणितादिविषया आगच्छेयुः परन्तु वेद इति कथनस्य तात्पर्यमथवाऽभिप्राय ईश्वरीयं ज्ञानमेव वर्तते। हिन्दूधर्मपरम्परायां

सर्वप्रथमम् ऋषिमहर्षिभिः यद् अन्विष्टं येन च ईश्वरसाक्षात्कारः कृतः तद् ज्ञानमेव वेद इति निगद्यते। वैदिकदर्शनेष्वेव न्यायदर्शनमप्यस्ति तदेव तर्कशास्त्रमित्यप्यभिधीयते। यत्र प्रमाणविश्लेषणं पदार्थविवेचनञ्चात्यन्तं वैज्ञानिकरीत्या विहितमस्ति। नैयायिकैः जैनबौद्धचार्याणामपि समक्षं तार्किके संघर्षे स्वपक्ष उपस्थापितः। न्यायदर्शनस्य परम्पराऽयन्तं प्राचीना इयमेव च तर्कवादिदर्शनमपि निगद्यते। उपनिषद[1]-रामायण[2]-महाभारत[3]-मनुस्मृति[4]-गौतमधर्मसूत्र[5]-अर्थशास्त्रप्र[6]भृतिग्रन्थेषु तर्कशास्त्रं हेतु-विद्या-वादविद्या-व्यायविद्या-न्यायशास्त्र-प्रमाणविद्याऽनेकैर्नामभिः अभिधीयते।

वस्तुतः न्यायशास्त्रस्य प्राचीनमभिधानमान्वीक्षिकी वर्तते, अस्तित्वञ्चास्याः बौद्धेभ्योऽपि प्राक्तनम्। आन्वीक्षिकी तर्कविद्याया एवापरं नाम। ई. प. ७५० वर्षेभ्य १०० वर्ष यावत् अस्याः कालः, विकसितावस्थायामियं तर्कशास्त्रनाम्ना विख्याता। मनुनाऽपि आन्वीक्षिकी आत्मविद्यावदमन्यत प्रयोगश्च विहितः—

त्रैविद्येभ्यस्त्रयीविद्याद् दण्डनीतिश्च शाश्वतीम्।[7]
आन्वीक्षिकीञ्चात्मविद्यां वार्तारम्भाश्च लोकतः॥

तथाहि कामन्दकेनाऽलेखि निजनीतिशास्त्रे-

आन्वीक्षिक्यात्मविज्ञानं धर्माधर्मौ यथास्थितौ।
अर्थानर्थौ च वार्तायां दण्डनीति नयानयौ॥

ऋग्वेदकालादेव तत्त्वसाक्षात्कारस्य प्रकारद्वयस्याभिधानमुपलभ्यते। प्रथमं प्रज्ञामूलकं द्वितीयं तर्कमूलकञ्च। प्रथमेन प्रज्ञामूलकविधिना सूक्ष्मदृष्ट्या तत्त्वविवेचनं भवति, तथाहि तत्त्वानां

---

१. वृहदारण्यक-४।५, छान्दोग्योपनिषद् - ७।१।२,
२. रामायणं-अयोध्या-१००।३९,
३. महाभारतं, शान्तिपर्व, १८०-४७।,
४. मनुस्मृतिः - ७-४३,
५. गौतमधर्मसूत्रम् - ११।३,
६. अर्थशास्त्रम् - १।२।७।
७. मनुसंहिता - ७ - ४३,

समीक्षणार्थञ्च तर्कमूलकस्य साहाय्यं गृह्यते। तर्कमूलकं प्रकारं सम्बर्द्धयितुम् ऋग्वेदमतिरिच्य अन्यदुदाहरणं नैव प्राप्यते विश्ववाङ्मये। यजुर्वेदशतपथब्राह्मणाविव वृहदारण्यक- छान्दोग्योपनिषदौ वर्तेते ययोराधारे उपनिषदामात्मविद्या कालान्तरे आन्वीक्षिकीति[1] संज्ञां नाऽप्तवती। वेदोपनिषत्कालीनायामस्यामान्वीक्षिकी-कालीनविद्यायां मुख्यत आत्मतत्त्वमेव विवेचितमस्ति गौणरूपेण च परमतत्त्वस्य प्रतिपादनाय युक्तीनामपि अवलम्बनं क्रियते स्म। इयम् आन्वीक्षिकी आत्मविषयानां कार्याणा प्रतिपादकत्त्वादुपनिषदेभ्योऽभिन्नाया: आत्मविद्याया: आन्वीक्षिक्याश्च भेदं निरूपयतोक्तमस्ति यत् आत्मविद्याऽऽत्मन: निश्चितानां केषाञ्चित् च अन्धविश्वासानां स्वीकारोक्तिविषयं विवेचयति, आन्वीक्षिकी च स्वीकारोक्तिविषये समर्थिततर्कान्न विचारयति। वेदप्रमाण्येऽपि तर्कस्य स्थानमस्ति यतोहि तर्कस्योपयोग: वेदवाक्यानां तात्पर्यनिर्णये निर्धारणेऽपि भवति। वेदस्य समुचिता व्याख्या तर्काऽभावे नैव कर्तुं शक्या। अतएव मनुर्निगंदति यत्—

आर्षधर्मोपदेशञ्च वेदशास्त्रविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतर:।।[2]

यद्यप्यस्मिन्नुवचने प्रयुक्तस्य तर्कशब्दस्यार्थ: सामान्यतया वाक्यशास्त्रं पूर्वमीमांसा वा मन्यते तथापि मीमांसाशब्दस्यार्थे दृष्टिपाते सति इदं निश्चीयते यत्तर्कशब्दस्यार्थस्य मीमांसा केवलं मीमांसादर्शनं यावदेव सीमिता नास्ति। एततिरिक्तं शब्दानामनित्यत्त्वादनुमानतर्कस्याधारे वेदवाक्यस्यार्थो निश्चीयते। बौद्धाचार्यैस्तर्कस्योपयोगिता खण्डिता, तेषां कथनमस्ति आगमनापेक्षस्तर्क: निरुपयोगो वर्ततेऽर्थात् आगमवेद्य-पदार्थविषये केवलं तर्काऽधारे निर्णयो नैव समुचित:। अनेनेत्थं ज्ञायते यत्तर्क: कदाचिदपि निरुपयोगो न भवति। वास्तविकस्तर्क आगम-प्रामाण्यस्य समर्थको भवति यतोहि प्रमाणद्वये परस्परं विरोधो नैव

---

१. *मनुस्मृति: १२/१०६*

२. *श्लोकवार्तिकम् - ९, उपोद्घात,*

सम्भाव्यते।[१] तर्कप्रमाणत्त्वादेव मनुस्मृतावपि[२] धर्मनिर्णायिकायां दशवरापरिषदि हेतुक् शब्देन तार्किकस्य पृथक् परिगणनं कृतमस्ति। औपनिषदिकशब्दावल्यां तर्कः मननमिति कथितः।[३] मननद्वारा एवात्मविषये निवृत्तिर्भवति। "नैषा तर्केण मतिरपनीया" इत्यादि वचनानां तात्पर्यं कुतर्केण वर्तते न तु सत्तर्केण, अतस्तर्कशास्त्रं मननातिरिक्त-मात्मज्ञानज्ञानरूपमिति स्वीकृतमस्ति। यथार्थ आन्वीक्षिक्याः धर्मशास्त्रेण कश्चन विरोधो नास्ति। आन्वीक्षिकमूलरूपेण आत्मतत्त्वं तर्कसिद्धान्तञ्च विवेचयति। वात्स्यायनस्य कथनमस्ति यत्तर्कसिद्धान्तं विना आन्वीक्षीक्यपि उपनिषद् एव वर्तते या किल आत्मविद्याम् आध्यात्म-विद्याञ्च वर्णयति। अयन्तु तर्कस्यैकस्सिद्धान्तो वर्तते यत्सः उपर्युक्तान् विषयान् पृथक्करोति।

आन्वीक्षकी निश्चिरूपेण उपनिषद्काले प्रारब्धा यत्र केषाञ्चिन्निर्वाचितानां पदानां प्रयोगोऽभूत्। परन्त्वियमान्वीक्षिकी ७५० ई. पू. स्वीयं विकसितमस्तित्त्वं प्राप्तवती। या च शिक्षायाः शाखात्वेन स्वीकृता। इयमान्वीक्षिकी दर्शनतर्कयोरपि भेदान् प्रतिपादयति। ६५० ई. पूर्वं यावत् मूलरूपेणाऽन्वीक्षिकी आत्मना सह सम्बद्धा वर्तते, विकासक्रमे च दर्शनरूपमपि अवलम्बितवती। आन्वीक्षिक्या दर्शनेन च तर्कसिद्धं ज्ञानमुपलभ्यते। सम्भवतः मेघातिथिगौतमकाले तर्कस्य विकासः आन्वीक्षिकी रूपेणाऽभूत्। इयमान्वीक्षिकी निरन्तरं शतं वर्षाणि यावत् दर्शनं तर्कं स्वप्रकाशेन प्रकाशितवती।

दर्शनरूपेण आन्वीक्षिकी—

याऽऽन्वीक्षिकी आत्मविषये विचारं कुरुते सा दर्शनमिति कथ्यते। दर्शनशब्दस्य वास्तविकोऽर्थः अवलोकनमित्यस्ति। वस्तुतस्तु आत्माऽवलोकनमेव दर्शनमिति निगद्यते। अस्याऽत्मनः पृथगपि दर्शनं

१. न मानयोर्विरोधोऽस्ति.... । न्यायकुसुमाञ्जलिः ३ । १९,

२. त्रिविधोहेतुकस्तर्की.... । मनुस्मृतिः – १२ । १११,

३. युक्तया सम्भावितत्त्वानुसन्धानं मननन्तु तत् – प. द. १ । ५३,

भवति, यदात्मनो दर्शनं मननमाध्यमेन भवति तदेव तत् सर्वोत्तमं दर्शनमिति कथ्यते।[1]

माण्डूक्योपनिषदीदं वर्णितमस्ति यत् यदाऽऽत्मनो दर्शनं भवति, तदा हृदयग्रन्थयः एकीकृताः जायन्ते। सर्वविधानां कृतकर्मणां संशयानाञ्च समाप्तिरपि जायत एव। ईशातः शतं वर्षेभ्यः पूर्वमात्मतत्त्वविवेचनकाले आन्वीक्षिकी दर्शनरूपं प्राप्तवती। सांख्ययोगः लोकायतश्च आन्वीक्षिक्यां सम्मिलितौ आस्ताम्। महाभारत[2]-भागवत[3]-न्यायभाष्य[4]-वेदान्त-भाष्यादिग्रन्थेषु[5]-दर्शनस्य ग्रहणमभूत्। अनेनैव कारणेन तार्किकपरिप्रेक्ष्ये आन्वीक्षिकी विभिन्नैरभिधानैरज्ञायत। मनुसंहितायामान्वीक्षिकीशब्दस्य विशिष्टः प्रयोगो विहितः। एवमेव गौतमधर्मसूत्रे[6]रामायणे[7] महाभारते[8] त आन्वीक्षिक्याः वर्णनमस्ति। मारकण्डेयपुराणेऽपि[9] तर्कसिद्धान्ता उपलभ्यन्ते। सम्भवतः ईशातः ७५० वर्षेभ्यः पूर्वं भागवतपुराणे मारकण्डेयपुराणे चैकस्य तादृग्साधोः वर्णनमस्ति यो विष्णोः षष्ठोऽवतार इति मन्यते। तेन अतर्क-प्रह्लादप्रभृतिभ्यः आन्वीक्षिक्याः शिक्षा दत्ताऽऽसीत्। तस्याऽभिधानं दत्तात्रयेण सह सम्बद्धमस्ति। मारकण्डेयपुराणे उद्धृतेनैकेन श्लोकेनेदं ज्ञायते यद्दत्तात्रयेण स्वयोग-दर्शनस्यानुसारम् आन्वीक्षिकीविद्याद्वाराऽऽत्मनो विषये अन्वेषणात्मक-तर्काः प्रतिपादिताः। संक्षेपेणेदं वक्तुं शक्नुमो यत् दत्तात्रेयः आन्वीक्षिक्याः दार्शनिकं रूपं प्रतिपादयामास न तु तार्किकविचारान्। मनोः

---

१. अयन्तु परमो धर्मो यद् योगेनात्मदर्शनम्, याज्ञवल्क्यस्मृति; १-८ पंक्तिः,

२. महाभारतं, शान्तिपर्व (११०-४५)

३. भागवत्पुराणम्- ८-१४-१०,

४. न्यायभाष्यम्- ३-३-३५

५. वेदान्तसूत्रम् - २-२-1

६. गौतमधर्मसूत्रम् - अध्याय; 2,

७. अयोध्याकाण्डं १००; अध्याय; ३७, पंक्ति;

८. म.भा.शा.प.अ. १८२, ४, । ३७ श्लोकः

९. मारकण्डेयपुराणम् - १९-१२,

आगामिमानवेन एतस्य उपनिषदा सह तुलना कृत्वा, या किल वेदानामेका शाखा—

त्रयी वार्ता दण्डनीतिंश्चेति मानवाः।
त्रयो विशेषो ह्यान्वीक्षिकीति॥

कौटिल्यस्यानुसारं सांख्ययोगे लोकायते च यत्र तर्कद्वारा आत्मनः अस्तित्त्वं स्वीकृतमस्ति, तदपि आन्वीक्षिक्यामेव विलीयते। कारण-सिद्धान्तत्वात् आन्वीक्षिक्याः विशिष्टः कश्चन प्रभावः। इयञ्च क्वचित् हेतुशास्त्रं क्वचित् च हेतुविद्येति कथ्यते।

मनुसंहितायां महाभारते च इयमान्वीक्षिकी तर्कविद्या-शास्त्रार्थकला-वादविधि-प्रभृतिनामभिः व्यपदिष्टा, या च विवादनिस्तारणे नियमान्निर्माय परिषदः समक्षं स्थापयितुं शैलीं विज्ञापयति। इयं तर्क-विद्या एव कालान्तरे कारणसिद्धान्तरूपेण विज्ञानरूपेण च स्वीकृता यस्याः विकासक्रमः प्रबुद्धजनेष्वेवाऽभूत्। छान्दोग्योपनिषद्[1]-बृहदारण्यको-पनिषदोश्च[2] विषयस्यास्य उद्धरणम् आत्मनोऽस्तित्त्वक्रमे परमात्मनः परमतत्त्वरूपे च दत्तमस्ति। एतेषां विषयाणां विवेचनम् ईशातः १०० वर्षेभ्यः आरभ्य ५०० वर्षाणि यावदभूत्। यत्र मनु[3]-याज्ञवल्क्य[4]-पराशरप्रभृतयः[5] स्मृतिकाराः स्व-स्वनिर्णयान् तर्कांश्च प्रतिपादयामासुः—

त्रैविद्यो हेतुकस्तर्की नैरुक्ताः धर्मपाठकाः।
त्रयश्चाश्रमिणः पूर्व्वे परिषद् स्याद्दशावराः॥

कौटिल्यस्य कथनानुसारम् आन्वीक्षिकी द्वारा सर्वैः धर्माः अन्वेष्टुं शक्यन्ते[6] इमामेवाश्रित्य धर्मा स्थिराः भवन्ति, इयञ्च स्वप्रकाशेन सर्वाणि शास्त्राणि प्रकाशयति।

---

१. *छान्दोग्योपनिषद् ५-२-१,*
२. *वृहदारण्यकोपनिषद् ६-२-१,*
३. *मनुस्मृतिः - १२/११०-१११,*
४. *याज्ञवल्क्यसंहिता - १-९,*
५. *पाराशरसंहिता - ८-१९,*
६. *कौटिलीयअर्थशास्त्रम् १-२-७,*

वस्तुतः पञ्चावयवयुक्तानि वाक्यान्येव न्यायशास्त्रमिति कथ्यते। अस्याः पञ्चावयवयुक्तायाः आन्वीक्षिक्याः प्रथमतः संकेतः महाभारते प्राप्यते यत्र नारदः बहुविद्याभिस्सह आन्वीक्षिक्याः अपि गुणदोषविवेचकः विशेषज्ञश्च प्रदर्शितः।[1] यद्यपि वाल्मीकिरामायणे महाभारते च इयमान्वीक्षिकी आत्मविद्यारूपेण प्रतिष्ठापिता तथापि तत्र तर्कमूलकायां प्रवृत्तौ विशिष्टं बलं दत्तं वर्तते। प्रत्यक्षागमप्रमाणानि आश्रित्य-आश्रयवताम् अनुमान-प्रत्यक्ष-शब्दप्रमाणानां साहाय्येन अनु पश्चात् ईक्षणमवलोकनम् अन्वीक्षा इति उच्यते। विषयेऽस्मिन् जनकसभायां सुलभा[2]-अष्टावक्रयोः[3] संवादः विशेषरूपेणोल्लेखनीयो वर्तते। यत्र तत्त्वज्ञऋषिद्वारा तत्त्वविषयकानुसन्धान-वादविवादैः सत्यप्राप्तिः क्रियते स्म। स्मृतिग्रन्थेषु पुराणेषु च तर्कस्य सम्मानः कृतः वर्तते। अतएवास्य तन्मुख्यमुद्देश्यं तर्कमूलकेन मननेन आत्मसाक्षात्कार-करणमस्ति। मनुस्मृतावपि प्रत्यक्षानुमानागमनप्रमाणानां संकेतः प्राप्यते। विना तर्कं कस्यापि तत्त्वस्य ज्ञानं न सम्भवति कामं तत् परमात्मतत्त्वं स्यात् लौकिकं वा। अनेनैव कारणेन श्रुतावपि अस्य विशिष्टं स्थानमस्ति। कठोपनिषदि त्विदं स्पष्टं लिखितं यत् अयमात्मा सूक्ष्मबुद्ध्या सूक्ष्मदर्शिभिश्च पुरुषैरेव द्रष्टुं शक्यते—"दृश्यते तु अग्रया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति दिशा।

वस्तुतः तर्कशास्त्रं वैदिकसाहित्ये न्यायशास्त्रस्य प्रवेशद्वारमस्ति अतएव एतस्य प्रारम्भिकं ज्ञानम् आवश्यकमस्ति। तद्विना उच्चतार्किकग्रन्थस्याध्ययनं दुष्करं भवति। दार्शनिकसाहित्येऽपि तर्कं विना अन्यस्य किमपि अस्तित्त्वमेव नास्ति, अतः न्यायशास्त्रस्य ज्ञानाय तर्कस्य ज्ञानमावश्यकम्। इत्थं न्यायशास्त्रं तर्कशास्त्रं वा अस्माभिः भागद्वये विभक्तुं शक्यते-(१) साध्यप्रधानयुगम् (२) साधनप्रधानयुगञ्च।

---

१. म.भा.स.प. - ५-२-६,

२. महाभारतं, शान्तिपर्व - ३२०-७८-२४,

३. महाभारतं वनपर्व अ. १३२, ३४,

१. साध्यप्रधानयुगम्—

साध्यप्रधानयुगं वयम् औपनिषद्कालं कथयामः, यतोहि तस्मिन् समये विशुद्धजिज्ञासाभावस्य प्राधान्यमासीत्। केवलं मूलतत्त्वमेव ज्ञातुं तार्किकः संलापः भवति स्म। स्व-स्व पक्षाणां पुष्टये वादिप्रतिवादिभ्यां युक्तीनां साहाय्यं गृह्यते स्म। युगेऽस्मिन् श्रद्धाशीलशिष्याः ज्ञानजिज्ञासामादाय गुरुगृहमाश्रमं वा व्रजन्ति स्म, तथाहि आचार्यैर्गुरुभिश्च तेभ्यश्शिष्येभ्य आत्मतत्त्वज्ञानं प्रदीयते स्म। अतएवायं प्राक्तनन्यायस्य कालः कथ्यते।

२. साधनप्रधानयुगम्—

अस्मिन् युगे नैयायिकानां दृष्टौ आत्मतत्त्वविवेचनरूपः प्रधानप्रतिपाद्यो विषयः गौणतां गतः। साध्यस्थाने साधननिर्माणे एव तेषां शक्तेः संयोजनमभवत्। प्रमेयस्थाने प्रमाणं नियुक्तं वादविवादप्राधान्यत्वात्। इदं प्रमाणं हि स्वतन्त्रशास्त्ररूपमधारयत्। युगेऽस्मिन् स्वतंत्रनियमानां निर्माणं परिभाषाणाञ्च प्राधान्यमजायत। अतः प्राचीनन्यायशास्त्रे आन्वीक्षकीशब्दस्य बहुधा प्रयोगः प्राप्यते। शब्देऽस्मिन् साधनप्रधान-युगभावना स्पष्टं परिलक्ष्यते। स्वयं भाष्यकृताऽऽचार्यवात्स्यायनेनायं शब्दः इत्त्थं विवेचितः[१]—

"प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा, तया प्रवर्तत इत्यान्वीक्षिकी न्यायविद्या न्यायशास्त्रम्"। आन्वीक्षिक्यातिरिक्तं न्यायशास्त्रस्य वादविद्या, तर्कविद्या, प्रभृतीनि यान्यन्यानि नामानि विभिन्नग्रन्थेषूपलभ्यन्तेऽथवा न्यायशब्दस्य यो ध्वनिः प्रस्फुरितो भवति सः सर्वोऽपि प्रमेयप्रधानयुगस्य परिणाम एव। इत्त्थं प्राचीनन्यायशास्त्रस्य द्वे रूपे दृश्येते ये विभिन्नभावनानां मध्ये प्रवाहिते परिष्कृते च भूत्वाऽस्माभिः प्राप्ते स्तः। अतः प्रमेयप्रधानयुगस्य प्रवर्तको महर्षिगौतम-स्तथाहि प्रमाण (तर्क) प्रधानयुगस्य प्रवर्तकोऽक्षपादश्च स्वीकृतः। इत्त्थमान्वीक्षिक्याः प्रमाणिकता प्राचीनकालादेव महद् प्रभुत्वं स्थापयति। अस्योदाहरणमस्माभिः कठोपनिषदि द्रष्टुं शक्यते—

---

१. *कठोपनिषद्मन्त्रः १,३,१२,*

"कठोपनिषद्"[1]। इयञ्च न्यायविद्या "आन्वीक्षिकी"-त्यपर-नाम्नाऽभिधीयते, शास्त्रविद्भिरस्मिन् संसारकान्तारे कियन्ति दुःखदिनानि कियन्ति वा सुखदिनानि इति कुपितफणिफणामण्डलच्छाया प्रतिममिति मन्यमानाः सर्व एव सन्तो व्यवस्यन्ति दुःखभारं समूलमुन्मूलयितुं, न खलु विवेकिनः पातादिभयात् स्वर्गमपि कामयन्ते।

तथा चोक्तं भगवद्गीतायामपि[2] ते तं भुक्तवा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्तीति''ति। न्यायभाष्यकृता[3]-प्रत्यक्षागमाभ्यामीक्षि-तस्यान्वीक्षणमन्वीक्षा तया प्रवर्तत इति इत्यान्वीक्षिकी न्यायविद्या न्यायशास्त्रम्। न्यायसूत्रविवरणम्[4]-गोविन्दभट्टाचार्यकृतन्यासूत्र-विवरणम्-"एतद्-ग्रन्थस्यान्वीक्षिकी न्यायतर्कादिशब्दैर्व्यपदेशश्च योगेन रुढ्या च। तत्र श्रवणादनु पश्चादीक्षाऽऽत्ममननमन्वीक्षा तन्निर्वा-हिकाऽऽन्वीक्षिकीति योगार्थः। अस्यार्थस्य वेदान्तादिगतत्त्वेऽपि अत्र न्यायस्य बलवत्त्वेन प्राचूर्येण च भूरि प्रयोगाद्रूढ़िकल्पनमिति।" नामलिंगानुशासनकृदमरोऽप्याह—

"आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः" वेदप्रामाण्य-वादिनां दार्शनिकानामपि रूपद्वयं भवति (१) वेदप्रधानं (२) शब्दप्रधानञ्च।

१. परतः प्रमाण्यवादिनस्तर्कप्रधानाः भवन्ति यतोहि अस्य सम्प्रदायस्य जनाः वेदस्य प्रमाणिकतायाः निर्धारणं तर्कमाश्रित्य कुर्वन्ति।

२. स्वतः प्रामाण्यवादिनो वैदिकशब्दमेव प्रधानत्त्वेन स्वीकुर्वाणाः वेदवाक्यमेव प्रमाणिकं स्वीकुर्वन्ति, अनेनैव कारणेन नैयायिकाः वैशेषिकाश्च परतः प्रमाण्यवादिनः कथ्यन्ते। न्यायसूत्रेषु सर्वप्राचीना व्याख्या वात्स्यायनभाष्यम् इति अस्ति। आचार्य-उद्योतकरकृता अत्यन्तं प्रसिद्धा "वार्तिक" टीकाऽपि लिखिता, अस्यामेव टीकायां वाचस्पतिमिश्रेण तात्पर्यटीकाऽपि लिखिता। उदयनाचार्येण च इयम्

---

१. कठोपनिषद्मंत्रः - १-३/१२,

२. भवगद्गीता

३. न्यायभाष्यम् - १-१-१,

४. न्यायसूत्रविवरणं - पृ. ६,

आश्रित्य परिशुद्धिनाम्नी अन्या टीका लिखितां। अत्र कश्चन सन्देहो नास्ति यत् भारतीयदर्शनेषु उदयनाचार्यसदृशाः अतुलनीयाः विद्वांसः न्यूना एव येन परिशुद्ध्यतिरिक्ता ''न्यायकुसुमाञ्जली'' तथा ''आत्मतत्त्वविवेक'' नामकः ग्रन्थोऽपि लिखितः। न्यायकुसुमाञ्लीग्रन्थे उदयनाचार्येण बौद्धमतानि खण्डयता ईश्वरस्य सत्ता प्रतिपादिता। न्यायवार्तिकम् उद्योतकरस्य कृतिः आधुनिकविदुषां दृष्टौ सम्भवतः ६३५ वि.स. इति समयस्य वर्तते। उद्योतकरस्य पूर्ववर्तिभिः दिङ्नागप्रभृतिभिः बौद्धाचार्यैः वात्स्यायनभाष्यस्य यत्खण्डनं कृतं तस्य पुष्टये न्यायवार्तिककृता स्वयमेवैतल्लिखितं यत्—

यदक्षपादप्रतिभो भाष्यं वात्स्यायनो जगौ।
अकारि महतंस्तस्य भारद्वाजेन वार्तिकम्॥

अनेन श्लोकेनेदं ज्ञायते यदुद्योतकरः भारद्वाजगोत्रियः पाशुपतसम्प्रदायस्यानुयायी चाऽसीत्। तेन कुतार्किकैर्दिङ्नागादि-बौद्धाचार्यैश्च गौतमन्यायसूत्रे वात्स्यायनभाष्ये चोपस्थापितानां शंकानां निवारणं स्वरचिते न्यायवार्तिके कृतम्। अतएव वाचस्पतिमिश्रेण न्यायवार्तिकं भारद्वाजगोत्रीयस्य उद्योतकरस्य वाचममन्यत। एतस्य पुष्ट्यर्थं च न्यायवार्तिकस्याऽदौ समासौ च अस्योल्लेखः कृतः। आरम्भे यथा— ''यदलम्भि किमपि पुण्यं दुस्तरकुनिबन्धपंकमग्नानां उद्योतकरगवीनामति जरतीनां समुद्धरणात्। संसारजलधिसेतौ वृषकेतौ सकलदुःखशमहेतौ फलमखिलमर्पितमेतेन प्रीयतामीशः।''

अस्यायमाशयो यत् कुतर्कनिबन्धानां दुस्तरपंके निमग्नोद्योतकरस्य वाणी अत्यन्तं जीर्णावस्थां प्राप्तवती तस्याः समुद्धाराय किञ्चित् पुण्यं लब्धवान्निति। इत्थं तर्कशास्त्रस्य वैशेषिक-न्यायेति द्वे शाखे। प्रमेयप्रधानत्वात् वैशेषिकमपवर्ग एव विशिष्टं बलं ददाति। अतः महनं तत्त्वसाक्षात्कारे आवश्यकं न स्वीकृतम्। वेदमूलाऽऽन्वीक्षिकी, सूत्र-पातश्चास्याः आत्मवादनैदात्म्यवादयोः संघर्षेऽभूत्। अस्य विकासश्च वाद-विवादयोराधारेऽभवत्। अतएव विकासशीलमानवसमाजस्य मौलिकी-आवश्यकतायाः प्राथमिकोद्भावनायाश्च रूपे न्यायशास्त्रं स्वीकृतं वर्तते।

यतोहि अस्याऽभावे मानवो न तु संविचारान् सिद्धान्तान् वा स्थिरीकरोति न वा प्रतिपक्षिणामाघातैः स्वसिद्धान्तान् रक्षति।

भारतीयसाहित्ये धार्मिकभावनायाः आधारे एव न्यायशास्त्रस्य पथनिर्देशः भवति। काले-२ च धार्मिकक्रान्तेः परिणामास्पष्टरूपेण न्यायशास्त्रे परिलक्ष्यन्ते। यदि वयं सम्पूर्णं न्यायशास्त्रं विश्लेषयामस्तदा त्रयो भागाः दृश्यन्ते। यान् च प्राचीनन्याय-नव्य-न्याय-मध्यन्यायञ्च वक्तुं शक्नुमः। प्राचीनन्यायस्य प्रादुर्भावो बौद्धधर्मस्योत्पत्तेः प्रतिष्ठायाश्च प्रागभूत्। मध्यन्यायस्य प्रतिष्ठा बौद्धजैनयोः यौवनकाले बभूव। नव्य-न्यायस्य उत्पत्तिबौद्धधर्मस्य पतनकाले ब्राह्मणधर्मस्य पुनरुत्थान-काले चाभवत्। अत्र शंका समुदेति यत् न्यायशास्त्रं केन प्रादुर्भावितं ? पद्मपुराणे, स्कन्दपुराणे, गान्धर्वतन्त्रे, नैषधीयचरिते, विश्वनाथवृत्तौ च महर्षिगौतम एव न्यायशास्त्रस्य जन्मदाता स्वीकृतः।

एतद्विपरीतं न्यायभाष्य[1]न्यायवार्ति[2]के न्यान्यायवार्तिकतात्पर्यटीका[3] न्यायमञ्जरी[4] प्रभृतिषु ग्रन्थेषु न्यायशास्त्रमक्षपादस्य परम्परायाः कृतिरिति स्वीक्रियते।

एकं तृतीयम्मतमिदमपि वर्तते यन्न्यायशास्त्रं मेघातिथी रचयामास, मतमिदं भासप्रणीते प्रतिमानाटके[1] दृश्यते।

---

१. *योऽक्षपादमृषिः न्यायं प्रत्यवात् वदतां वरम्।*
तस्य वात्स्याय इदं भाष्यजातमवर्तयत्॥
न्यायभाष्यम्, विजयनगर सं. सीरिज,

२. *यदक्षपादोः प्रवरो मुनीनां शमाय शास्त्रं जगतो जगाद।*
कुतार्किकाज्ञाननिवृत्तिहेतोः करिष्यते तस्य मया निबन्धः न्यायवार्तिकम्

३. *अथ भगवता अक्षपादेन निःश्रेयसहेतौ शास्त्रं प्रणीतम्।*
गौ. तर्क. पृ. २०, न्यायवातितात्पर्यटीका,

४. *अक्षपादप्रणीतो हि विततो न्यायपादपः।*
सान्द्रामृतरसस्यन्दफलसन्दर्भनिर्भरः ॥ न्यायमञ्जरी, प्रथमपरिच्छेदः,

१. *भोः। काश्यपगोत्रोऽस्मि। साङ्गोपाङ्गं वेदमधीये, 'मानवीयं धर्मशास्त्रम्, माहेश्वरं योगशास्त्रम्, वार्हस्पत्यमर्थशास्त्रम्, मेघातिथेर्न्यायशास्त्रम्, प्राचेतसं श्राद्धकल्पञ्च। प्रतिमानाटकम्-अंक : ५, पृष्ठ-७९*

संस्कृतसाहित्यस्यैतिहासिकविवरणैरिदं ज्ञायते यद्गौतमोऽक्षपादश्च पृथक्पृथक्सत्तावन्तौ द्वौ आचार्यो स्तः। पुराणानि च महर्षिगौतमस्य स्थानं मिथिलां तथाहि अक्षपादस्य स्थानं "काठियावाड़" समीपं "प्रभासपत्तन" मिति ख्यापयन्ति।

ब्रह्माण्डपुराण[1]स्यानुसारमक्षपादः सोमशर्मब्राह्मणस्य सुतः, जातुकर्णीव्यासस्य समकालीनः, प्रभासपत्तनवास्तव्यश्चासीत्। महर्षि-गौतमस्य स्थानन्तु मिथिलैव अतः स्थानभेदहेतुना तस्य भिन्नता स्पष्टैव। अत्र पुनरयं प्रश्नस्समुदेति यत् कोऽयं मेघातिथिर्नाम। महाभारतस्य[2] शान्तिपर्वणोऽनुशीलनेनैतदवगम्यते यद् गौतमेघातिथ्योरेकः शब्दः वंशबोधकः द्वितीयश्चाभिधानबोधकः वर्तते। महाकवि-भासेन मेधातिथिनाम्नाऽयैर्ग्रन्थकारैश्च गौतमेति नाम्ना एकस्यैव व्यपदेशः कृतः वर्तते।

प्राचीनन्यायं गौतमप्रणीतं तथाहि नव्यन्यायमक्षपादप्रणीतं वर्तते। गौतमस्य प्रमेयप्रधाना उपनिषदाक्षपादेन प्रमाणप्रधानीकृता। अनेनास्माकं धारणाद्वयमपि पुष्यति। प्रथमात्वियं यन्मेधातिथिगौतमश्चैका एव व्यक्तिः, द्वितीयं यत्तेनैव न्यायशास्त्रस्य प्रमेयसाध्यात्मप्राधान्ययुगञ्च निर्मितम्।

---

१. *सप्तविंशतिमे प्राप्ते परिवर्ते क्रमागते।*
जातुकर्णी यदा व्यासो भविष्यति तपोधनः॥
तदाहं सम्भविष्यामि सोमशर्मा द्विजोत्तमः।
प्रभासतीर्थमासाद्य योगात्मा लोकविश्रुतः॥
तत्रापि मम ते पुत्रा भविष्यन्ति तपोधनाः।
अक्षपादः कणादश्च उलूकी वत्स एव च॥

ब्रह्माण्डपुराणे अध्यायः २३

२. *मेधातिथिर्महाप्राज्ञो गौतमस्तपसि स्थितः।*
विमृश्य तेन कालेन पत्न्याः संस्थाव्यतिक्रमम्॥

महाभारतं, शान्तिपर्व, २६५-४५, बंगवासी एडीसन,

कठोपनिषदि[1] अप्यस्योदाहरणं द्रष्टव्यमस्ति। इदं सर्वमपि विवेचनमिदमेव सङ्केतयति यन्महर्षिणा गौतमेनैव न्यायशास्त्रं रचितमासीत् कालान्तरे समयानुसारञ्च अध्यात्मप्रधानं न्यायशास्त्रं प्रमाणानां विस्तृतविवेचने प्रयुक्तम्। अतएव न्यायशास्त्रे प्रमाणादीन्येव प्रधानतां भजन्ते। वात्स्यायनभाष्ये[2] च लिखितमेतद्यत् पाणिनिकात्यायनावपि न्यायशास्त्रस्य ज्ञातारौ बभूवतुः।

सर्वप्रथमं महर्षेर्गौतमस्याध्यात्मप्रधानन्यायशास्त्रस्य रचनाऽभूत्, तदनु आध्यात्मप्राधानोपनिषद्विद्ययाऽक्षपादेनान्वीक्षिकीविद्या प्रमाण-प्रधानीकृता।[3] न्यायसूत्राणामनन्तरं न्यायशास्त्रस्य द्वितीयः प्राचीनग्रन्थः वात्स्यायनभाष्यं वर्तते यस्य रचनाकालः जैकोबी'' महोदयानुसारं ४०० ई. वि. इत्यस्ति। इत्थं ४०० वि. तः १००० वि. ई. यावत् न्यायसाहित्यस्य निर्माणमभूत्। परन्तु एतस्य सर्वस्यापि साहित्यंस्याधारग्रन्थः वात्स्यायन-भाष्यं न्यायसूत्रञ्च वर्तेते। इत्थं शक्यते मन्तुं यत्प्राचीनन्यायशास्त्रस्य निर्माणं १७ ई. यावद् बभूव।

अत्रेदमप्यस्ति विचारणीयं यद्वैदिकी गौतमीया च तर्कभाषा का? किञ्चास्याः वैशिष्ट्यम्। महर्षिणा गौतमेन निजषोडशपदार्थेषु ''तर्क''

---

१. *शान्तः संकल्पः सुमना यथा स्यात् वीतमन्युर्गोतमोमामिमृत्योः त्वत् प्रसृष्टं माभिवदेत् प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे।*

यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति।
एवं मुनेर्विजानीत आत्मा भवति गौतम॥
हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम्।
यथा च मरणं प्राप्य आत्मा भवति गौतम्॥

कठोपनिषद् श्लोकः १-१-१०। २-४-१५। २-५-६।

२. *वात्स्यायनभाष्यम्—*

तेषां पृथगभिधानमन्तरेण अध्यात्मविधामात्रमियं यथोपनिषद्।

३. *आयुर्वेद के प्रसिद्ध ग्रन्थ ''चरक'' की रचना भी इसी प्रकार हुई है। प्रथम अग्निवेश ने फिर चरक ने उसका नवीन संस्करण किया जो आजकल उपलब्ध होता है। जैसा कि दढ़बल ने लिखा—*

अग्निवेशकृते द्रव्याढौ''

नामाख्योऽप्येकः पदार्थः स्वीकृतस्तस्य लक्षणञ्च कृतं—"अविज्ञाततत्त्वेऽर्थे कारणोपपत्तिस्तत्त्वज्ञानार्थमूहस्तर्कः"[1] अस्यायं भावो यत् कारणानां युक्तीनाञ्च ऊहोऽर्थादनुसन्धाननामकस्तर्कः।

परन्तु तर्कभाषायाः टीकाकृद्भिः—"तर्क्यन्ते प्रतिपाद्यन्ते इति तर्काः, प्रमाणादयष्षोडशपदार्थास्ते भाष्यन्तेऽनया इति तर्कभाषा[1]" इति तर्कभाषाशब्दस्य व्युत्पत्तिर्निर्धारिता।

गौतमीयतर्कभाषायां न्यायस्य मुख्यमुख्यपदार्थप्रतिपादनत्त्वात्प्रकरण-ग्रन्थोऽपि कथ्यतेऽयम्। प्रकरणग्रन्थस्य लक्षणं यथा—

शास्त्रैकदेशसम्बद्धं शास्त्रकायन्तरे स्थितम्।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः॥[2]

अतोऽयं न्यायप्रधानप्रकरणग्रन्थः। नव्यन्यायमेव गौतमीयतर्कभाषेति नाम्नाऽभिधीयते यस्याः निर्माणं ११०० ई. मध्ये अभूत्। प्राचीनन्यायस्य समस्तमपि साहित्यं सूत्रेष्ववलम्बितमासीत्। तद्ज्ञातुं सूत्रकृतां भावनानुसारमेव प्रयत्नो विधीयते स्म। परन्तु नव्यन्याये सूत्रक्रमं न विचार्य स्वातन्त्र्येणैव विषयोपस्थापनं कृतमस्ति। यथा व्याकरणे "सिद्धान्तकौमुदी", न्याये-"तर्कभाषा-न्यायमुक्तावली, वेदान्ते च" अद्वैतसिद्धिः प्रभृतयो ग्रन्थाः। यद्यप्येतेष्वपि मूलग्रन्थानामेव विषयाः प्रतिपादिताः परं शैलीमात्रमेव तत्र नवा।

प्राचीनार्वाचीनशैलीभेदः दर्शनमीमांसायामित्थं निरूपितस्तद्यथा—

द्विविधं दर्शनसाहित्यं नूतनप्राक्तनभेदतः।
प्रत्नं सूत्रक्रमापेक्षि तदुपेक्षि च नूतनम्॥
सूत्रवार्तिकभाष्यादि क्वचिट्टीकापरम्परा।
प्रत्नं दर्शनसाहित्यं नूतनञ्च तथेतरत्॥
सूत्रक्रमं परित्यज्य स्वतंत्रैर्विबुधैस्ततः।
ग्रन्थाः येऽत्र कृतास्ते तु साहित्ये नूतने मताः॥

---

१. न्यायसूत्रम् - १-१-४०,

२. पराशरोपपुराणम् - अध्यायः - २९ / २१,

नूतनप्राक्तनभेदोऽयं न कालापेक्षिको मतः।
अङ्गीकृतोऽसौ सर्वत्र भङ्गीभेदात्तु केवलम्॥

एभिर्लक्षणैर्युक्तत्वान्नव्यन्यायस्यान्तर्गतं स्वीक्रियते तर्कभाषा। गौतमीयतर्कभाषा प्रकरणग्रन्थस्यान्तर्गतं गण्यते। प्रकरणग्रन्थेषु समस्तान् विषयान् न प्रतिपाद्य देशांशविशेषस्य प्रतिपादनं विधीयते, अत्रापि न्यायस्य मुख्यमुख्यपदार्थानां प्रतिपादनं क्रियते।

अधुना केशवमिश्रकृतायाः गौतमीयतर्कभाषायाः वैशिष्ट्यं प्रतिपाद्यते—

१. नव्यन्याययुगे यत्साहित्यं निर्मितन्तस्य वैशिष्ट्यद्वयं परिलक्ष्यते। सूत्राण्युपेक्ष्य स्वतंत्रग्रन्थानां निर्माणं युगस्यास्य प्रथमं वैशिष्ट्यमस्ति। पदार्थानाम्महत्त्वविषये आपेक्षिकं परिवर्तनञ्च द्वितीयं वैशिष्ट्यं वर्तते। अर्थात् न्यायशास्त्रस्य षोडशपदार्थेषु केषाञ्चिन्महत्त्वं प्राचीनपद्धत्या नूनमथवा अधिकं जातमस्ति। उदाहरणार्थम्-प्राचीन-न्याये ''जातौ'' ''निग्रहे'' च विशिष्टं बलं दत्तमस्ति परं नव्यन्याये तयोरुल्लेखः नाममात्रमेवं। एवमेवावयवादीनां वर्णनं प्राचीनन्यायापेक्ष्या नव्यन्याये विशिष्टतां भजते। गौतमीयतर्कभाषायाः अपरमपि वैशिष्टयं वर्तते यदयं प्रकरणग्रन्थः शब्दश्चायं पारिभाषिकः।

☆

खण्ड-ख

२. बौद्धसाहित्ये तर्कशास्त्रैतिहासिकदृष्ट्या महत्त्वम्—

तर्कस्तावत्तादृशं निकषं वर्तते यत्र कश्चन्नपि विचारः परीक्षितस्सन् सत्यतां ब्रजति, यतोहि तर्कस्य कार्यमेव विचाराणाम्मालिन्यपरित्यागः, शुद्धविचाराणां ग्रहणं चास्ति। कार्यमेतत्तदैव सम्भवति यदा कश्चन पदार्थः आग्रहदोषपक्षपातबुद्ध्या मालिन्ये मोहजाले च निमग्नः प्रतिभाति। अतस्तर्कशास्त्रमेतान्दोषान्निवारयति, विशुद्धबुद्धेः परिमार्जने च साहाय्यमाचरति। सन्दर्भेऽस्मिन्नुक्तिरियं विशिष्टं महत्त्वं ख्यापयति-

'मोहं रुणाद्धि विमलीकुरुते च बुद्धिम्-
सूते च संस्कृतपदव्यवहारशक्तिम्।
शास्त्रान्तरेभ्यसनयोग्यतया युनक्ति-
तर्कः श्रमो न तनुते कमिहोपकारम्॥

दर्शने तर्कशास्त्रं विभिनैरभिधानैरभिहितमस्ति यथा वा प्रमाणशास्त्र-न्याय-शास्त्र-हेतुशास्त्र-हेतुविद्या-आन्वीक्षिकीत्यादीनि। वस्तुस्तु तर्कशास्त्रं दर्शनशास्त्रस्यैव अङगं वर्तते।

तर्कशास्त्र तादृशी आधारशिला वर्तते यया समस्तान्यपि शास्त्राणि आधार-युक्तानि भवन्ति। तर्कद्वारा सर्वेषामपि कर्म्मणामुपायोऽन्वेष्टुं शक्यते। इदं शास्त्रं समस्तान्यपि शास्त्राणि प्रकाशयत् सर्वेषामपि धर्माणां स्तम्भ इव चकास्ते।

न्यायमाष्यकारो वात्स्यायन[२] स्तथ्यमिदं स्पष्टयन् स्वीयं मन्तव्यमित्थं प्रकटयामास-

---

१. सुभाषितरत्नमाण्डागारम्-पृ. सं.४२,

२. कौटिलीयमर्थशास्त्रम्,

प्रदीपः सर्वशास्त्राणामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां विधोद्देशे प्रकीर्तिता॥

दर्शनशास्त्रे त्रयाणां कर्मणां सम्पादनाय तर्कस्य आवश्यकता प्रतीयते—

क- यदा वयं स्वसिद्धान्तोपस्थापनं तत्सिद्धिं कर्तुमभिलषामः।

ख- स्वसिद्धान्तपुष्टये तत्र कृतानामक्षेपाणां निराकारणं कर्तु समीहामहे।

ग- यदा स्वसिद्धान्तविरोधीनि मतानि खण्डयितुं कामयामहे।

यदा तर्कस्योपयोगः स्वसिद्धान्तोपस्थापनाय तत्सिद्धये तथान्येषां सिद्धान्त-खण्डनाय स्वीक्रियते तदा सिद्धान्तानां बहुत्त्वात्तर्काः अपि अनेके जायन्ते। किन्तु प्रमाणस्य स्वरूप-प्रकार प्रामाणिकज्ञानादीनां विवेचनं समस्तेष्वपि तर्केषु समानं भवति। तत्रैकत्वे सत्यपि अनेकत्त्वं परिलक्ष्यते। अनेनैव कारणेन सर्वेऽपि तर्काः परस्परं प्रतिपक्षिणः सहयोगिनो वा भवन्ति। अत्र खण्डनमण्डनप्रक्रिया एतावती दुरूहा प्रतिभाति यस्याः निराकरणं नितान्तं दुःसाध्यं प्रतिभाति। यद्येते तर्कास्तुलनात्मकदृष्ट्या विलोक्यन्ते तदा एतेषु मतवैभिन्यं स्पष्टं दृष्टिगोचरीभवति, यतोहि न्यायवैशेषिंकं ज्ञानं गुणत्वेन स्वीकरोति। मीमांसकाः क्रियां-व्यापारञ्च, औपनिदिक-वेदान्तिनः द्रव्यं, हीनयानिनो बौद्धाः, सांख्यिकाश्च सम्बन्धं गुणत्वेन अङ्गीकुर्वन्ति।

एवमेव प्रमाणसन्दर्भेऽपि मतैक्यं नास्ति। चार्वाकाः केवलं प्रत्यक्षम्, बौद्धाः वैशेषिकाश्च, प्रत्यक्षानुमाने, सांख्यिकाः जैनाश्च प्रत्यक्षानुमानशब्दान् नैयायिकाश्च प्रत्यक्षानुमानोपमानशब्दान् प्रमाणत्वेन स्वीकुर्वन्ति॥ प्रभाकरमतानुयायिनो मीमांसकाः उपर्युक्तचतुर्णां प्रमाणानामतिरिक्त-मर्थापत्तिमपि प्रमाणत्वेन स्वीकुर्वन्ति। परं भाट्टमीमांसकास्तु पञ्चप्रमाणातिरिक्तमनुपलब्धिम् (अभावम्) अपि पृथक् प्रमाणत्वेन स्वीकुर्वन्ति। एतदतिरिक्तं तान्त्रिकाः गणितज्ञाश्च सम्भव-चेष्टा-ऐतिह्य-परिशेषादीन्त्रपि प्रमाणान्तरत्वेन मन्यन्ते।

बौद्धानां दार्शनिकविचाराः अत्यन्तं तीक्ष्णा। तै ईश्वरं भाग्यञ्च वृथा

मन्यमानैरात्मविश्वास (आत्मवाद) स्य प्रधानतायां विशिष्टं बलं दत्तं वर्तते। तैः स्वनवीनधर्मे श्रद्धादिकमपसार्य तर्क एवाश्रयत्वेन अङ्गीकृतः। तर्कद्वारा प्राप्ते नवीन–सिद्धान्ते तेषां काचिन्नवीनैव योजना, तत्र विशिष्टसिद्धान्तानां वर्तते प्रतिपादनम्। भगवतो बुद्धस्य कथनमासीद्यत् एतान्नेव सिद्धान्तान् साहाय्यत्वेन स्वीकृत्य मनुष्यः मोक्षं प्राप्तुमर्हति। ऐतिहासिकविकासदृष्ट्या यदि बौद्धतर्कं विलोकयामस्तदानेके ज्ञातव्यविषयाः दृष्टिपथमायान्ति।

चक्रवर्त्तिराज्ञा अशोकेन 'थेरबाद' एव भगवतो बुद्धस्य प्रमुखस्सिद्धान्तोऽमन्यत, तस्यैव प्रचारप्रसारश्चाक्रियत। कालेऽस्मिन् दर्शनधर्मौ पूर्णरूपेण राज्याश्रितावास्ताम्। तदानीमेव 'स्थविरवादस्य' अपि प्राधान्यं जातमासीत्। विक्रमस्यारम्भकालं यावदियमेव स्थितिः अतिष्ठत्।

विक्रमस्य द्वितीयशतके 'स्थविरवादस्य' स्थानं 'सर्वास्तिवादे'न गृहीतम्। सर्वास्तिवादस्य तात्पर्यं वैभाषिकत्वेन गृह्यते। वैभाषिकानां विशालं वाङ्मयमद्यापि 'चीनी'–भाषायां सुरक्षितं वर्तते। कुषाणनरेशेन कनिष्केनास्य महान् प्रचार–प्रसारो विहितः। मूलतः इदं साहित्यं संस्कृत एव आसीत्। चन्द्रगुप्तविक्रमादित्यकुमारगुप्तयोश्च राज्यकाले सर्वास्तिवादः चरमोत्कर्षतामाभजते। 'वसुबन्धु'–स्थूलभद्रप्रभृतिभिराचार्यै–र्महत्त्वपूर्ण–ग्रन्थानां प्रणयनद्वारा साहित्यस्यास्य महान् विकासः कृतः। कालान्तरे चेदमपि साहित्यं लुप्तप्रायमजायत।

विक्रमस्य तृतीयशतके 'सर्वशून्यवादः' प्रादुर्भवत्। बौद्धतार्किके जगति सर्वशून्यवादस्य विशिष्ट स्थानमस्ति, कालेऽस्मिन् द्वौ महान्तावाचार्यौ बभूवतुः आचार्यकुमारलात–नागार्जुनौ च। आचार्यकुमारलातेन वाह्यार्थस्य सत्तां प्रत्यक्षगम्यमानां मत्वा अनुमानगम्या सिद्धा। आचार्य–नागार्जुनश्च शून्यसिद्धान्तं तार्किकरीत्या स्थापयामास। यद्यपि कुमारलातस्य सिद्धान्तो बौद्धैर्न समादृतस्थापि क्रान्तिकारिदार्शनिकस्मन् 'सत्यसिद्धिः' नामाख्यं नवीनं सम्प्रदायमसौ प्रावर्तयत्। अस्य प्रमुखः शिष्यः चीन–वास्तव्यः अत–एवासौ आचार्यस्यास्य 'सत्यसिद्धि' नामकं ग्रन्थं चीनीभीषायामनूदितवान्। आचार्यनागार्जुनस्सिद्धपुरुषो दार्शनिकश्चाभूत्। अतएवास्य 'माध्यमिक कारिका' तर्कवादावलम्बितं शून्यवादं प्रबलतया समर्थयति।

चतुर्थे शतके विख्याता: विद्वान्स: आचार्याश्च जनिं लेभिरे तथैतयोश्शिष्यपरम्परायां कामपि नवीनां शृंखलां नियोजयामासु:।

पञ्चमे शतके बौद्धसिद्धान्ते 'विज्ञानवाद: प्रादुर्भवत्। अयं गुप्तकाल आसीद्यस्मिन् तार्किकानां महती उन्नतिरभूत् अतएवायं स्वर्णयुगमिति कथ्यते। कालेऽस्मिन् बौद्धतर्क: पराकाष्ठां प्राप्तवान्। यद्यपि विज्ञानवादस्य जन्मदाता 'मैत्रेयनाथ:' मन्यते परन्तु आचार्य 'असङ्ग-बसुबन्धु' प्रभृतयस्तर्कभित्तिं सुदृढ़ां विहितवन्त:। वसुबन्धोरेव शिष्य: आचार्य-दिङ्नागोऽभूद्येन 'प्रमाणसमुच्चय'-सदृश: प्रौढग्रन्थ: प्रणीत:। पुनश्च 'धर्मकीर्ति' द्वारा लिखितं 'प्रमाणवार्तिकं' बौद्धतर्कमेव प्रतिष्ठापयति। इत्त्थं पञ्चमशतकादारभ्य अष्टशतकं यावच्छुन्यवादविज्ञानवादयोस्समाना उन्नतिरभूत्। परन्तु अत्यन्तं कठिनत्वाद्विज्ञानवादो लोकप्रियो नैवाजायत। विज्ञानवादविषयिणो ग्रन्था: हर्षवर्धनस्य काले नालन्दाविश्वविद्यालये दृष्टिगोरचरतां गता:।

विक्रमस्य ८०० ई. त: १२०० ई. यावदर्थात् चतुश्शतवर्षात्मकैतिह्ये तिब्बतदेशे बौद्धतर्कस्य प्रादुर्भावोऽभवत्। एतस्मिन्नेव काले दक्षिणभारते महायानस्य वज्रयाने परिवर्तनमभूत्। नालन्दाया एव बौद्धाचार्य: 'पद्मसम्भव:' 'शान्तिरक्षित'श्च तिब्बतनरेशस्य निमन्त्रणं स्वीकृत्य तत्र गतवन्तौ, तत्र महता श्रमेण च बौद्धतर्कं स्थापयामासतु:। इत्त्थं—

वैभाषिका: प्राचीनाश्च—संसार: सत्यं, निर्वाणमपि सत्यम्

माध्यमिका:—संसार: सत्यं, निर्वाणमसत्यम्

योगाचारा:—संसारोऽसत्यं, निर्वाणं सत्यम्

इति कृत्वायमेव बौद्धमतावलम्बिनां तार्किक-विकासोऽस्ति। एतेषां दर्शनानामैतिहासिको विकास: अत्यन्तं रोचको वर्तते।

१. विक्रमात्पूर्वं ५०० ईस्वीत: १००० ईस्वीं यावत् युगेऽस्मिन् बौद्धतर्कस्य यथैवोदयस्तथैवाभ्युदमपि सहैवावभूताम्। 'पुद्गलनैरात्म्य' स्यासीत् प्रधानता युगेऽस्मिन् तथाहि जगत: सत्तापि सर्वथा अस्वीकृता कालेऽस्मिन्।

२. विक्रमस्य प्रथमशताब्दीत: पञ्चमशताब्दीं यावत्। युगेऽस्मिन्

'पुद्गलनैरात्म्य' स्य स्थानं धर्मनैरात्म्येनाऽगृह्यत। व्यक्तिगतकल्याणस्थाने वैश्विककल्याणभावना अस्ति विशिष्टाऽस्य युगस्य। अमुं युगलवलम्ब्य जगतः सत्तायास्सर्वथा अस्वीकारः नैव कर्तुं शक्यते। यतोह्यस्य आभासः प्राप्यते–

चतुर्विध–आर्यसत्यानां स्थाने द्विविधसत्यानां (सांवृत्तिक-पारिमार्थिकयोः) परिकल्पनायाः स्थानं प्रामुख्यं भजतेऽस्मिन् युगे।

वैभाषिकानां 'बहुत्ववाद' स्य स्थाने (अद्वैतवाद) शून्यवादोऽस्मिन् युगे स्वीकृतः। अस्मिन्नैव युगे मानवबुद्धस्य स्थाने लोकोत्तरबुद्धस्य परिकल्पना कृता।

३. विक्रमस्य पञ्चशताब्दीतः दशमशताब्दीं यावत् कालः 'विज्ञानवाद'–स्य युगत्वेन स्वीक्रियते।

विज्ञानवादानुसारं सम्पूर्णं जगत् चित्तस्याथवा विज्ञानस्यैव परिणामत्वेन गृह्यते। आचार्य 'असंग' बसुबन्ध्वोरनुसारं तर्कविद्याऽस्मिन्नैव युगे प्रतिष्ठामलभत। परन्तु उपर्युक्तविज्ञानविषयकमतस्य तर्कद्वारा खण्डनानन्तरं दिङ्नागधर्मकीर्तिभ्याम् 'आत्मनो निगूढ आलय एव-विज्ञानम्' इति स्वीकृतम्। अत्रावधेयं यत् यथा शून्यवादस्य जन्मदाता नागार्जुनो नैवास्ति तथैव विज्ञानवादस्य प्रवर्तको नैवास्ति मैत्रेयोऽपि अपितु शून्यवादस्य प्रादुर्भावो 'प्रज्ञापारमितासूत्रे' प्राप्यते तथाहि विज्ञान-वादस्योत्पत्तिः 'लंकावतारसूत्रे' परिदृश्यते।

इत्थं बौद्धतर्कस्याशयाः निम्नलिखिताः सन्ति। भगवतो बुद्धस्य समग्रोपदेशानां सारः प्रस्तुतेऽस्मिन् पद्ये–श्लाघनीयो वर्तते–'ये धर्मा हेतुप्रभवा हेतुं तेषां तथागतो ह्यवदत्। अवदच्च यो निरोधो एवं वादी महाश्रवणः[१]'। अर्थात् जगत्यस्मिन् सम्पूर्णा अपि धर्माः हेतुनैवोत्पद्यन्ते येषां विरोधोऽपि परिलक्ष्यते। अनेन प्रकारेण धर्म–हेतु–कारणेष्वेव भगवतस्तथागतस्य महत्त्वपूर्णधर्मस्य सारांशः लीनो वर्तते।

---

१. *बौद्धदर्शनमीमांसा, पृ. २४६,*

बौद्धतर्कशास्त्रे केवलं त एव विचाराः महत्त्वपूर्णाः यैः बौद्धमतानां प्रारम्भोऽवलोक्यते। इदमेव कारणं यत् केवलं प्राथम्येन परार्थानुमान-सिद्धान्तमङ्गीकरणादेव स्वतंत्ररूपेण इदं तर्कशास्त्रत्वेन स्वीकर्तुं शक्यते। याः पर्याप्तं न ज्ञातास्तथाविधा रचनाः अर्थात् याः नाम दिङनागधर्मकीर्त्योः पूर्वतमाः, परं बौद्धतर्कस्योत्पत्तौ सहायिकास्तास्तथा याः भाष्यटीकाः लिखितास्तास्सर्वाः अपि बौद्धतर्कशास्त्रान्तर्गताः एवास्माभिः स्वीक्रियन्ते।

मोक्षाकरगुप्तस्य बौद्धतर्कभाषायाः वैशिष्ट्यम्—

बौद्धतर्कभाषा धर्मकीर्त्तेः तर्कपरम्पराया एको लघुः ग्रन्थो वर्तते। तत्र तेन बौद्धमतरक्षायै कुमारिल-त्रिलोचन-वाचस्पतिप्रभृतीनां विप्रतार्किकानां मतानि खण्डितानि सन्ति। इयं तर्कभाषा लोकमंगल-कामनया विरचिता वर्तते। बौद्धपरम्परायामन्यसम्प्रदायानामिवानेकानि प्रमाणानि न स्वीकृत्य केवलं प्रत्यक्षानुमाने स्वीकृते स्तः प्रमाणत्वेन। तत्र बौद्धदृष्ट्या तर्कस्य ज्ञानस्य च संक्षिप्तं विवेचनं कृतममस्ति। 'हरि-भद्रसूरि' विरचित 'षड्दर्शन' समुच्चये गुणरत्न-रचितायां 'तात्पर्य-दीपिका' टीकायां ग्रन्थस्यास्योल्लेखः प्राप्यते। गुणरत्नस्य कालः १५०० तमी शताब्दी स्वीकृता वर्तते[१]। गुणरत्नेन तर्कस्य महत्त्वपूर्णेषु दशग्रन्थेषु तर्कभाषायाः महत्त्वपूर्णं स्थानम् अमन्यत। मोक्षाकरगुप्तस्य कालः १११० ई. मन्यते। तर्कविषये अस्य धर्मकीर्त्तेरनुयायित्त्वं तदीयेनैव मंगलपद्येन स्पष्टज्ञायते[२]। अनेनेदं स्पष्टतया स्वीकृतं यद्बालानां धर्मकीर्तेर्मतज्ञापनाय तर्कभाषा विरचितेति।

बौद्धतर्कभाषाया विशिष्टता तदा ज्ञाता भवति यदा सम्पूर्ण-भारतीयन्यायमध्ये तस्याः मूल्यांकनं कुर्मः। बौद्धानामिदं वैशिष्ट्यं यत्ते प्रमेयानां वस्तुसत्तामस्वीकृत्यापि प्रमाणव्यवस्थापनं कुर्वन्ति। षष्ठ्यां सप्तम्यां शताब्दौ च बौद्धविज्ञानवादस्य दिङ्नाग धर्मकीर्ति इति

१. *मोक्षाकरगुप्तकृत- बौद्धतर्कभाषा पृ.११,*

२. *गुरुं प्रणम्य लोकेशं शिशूनामल्पमेधसाम्।*
धर्मकीर्तिमतश्रुत्यै तर्कभाषा प्रकाश्यते॥

विभूतिद्वयस्य रचितं तर्कशास्त्रं ज्ञानमीमांसायाः विशिष्टां पद्धतिं गमयति। बौद्धतर्कः प्रत्यक्षसदृशंसामान्यविषयादारभ्य सार्वजनिकवादविवादस्य जटिलप्रक्रियां प्राप्नोति। तत्र मानवज्ञानविषयीणि समस्तान्यपि क्षेत्राण्यायान्ति। भारतीयतर्कशास्त्रस्य विस्तृतक्षेत्रे माध्यमिकबौद्धकालस्य निर्माणं सञ्जायते। बौद्धन्यायस्य कालः १५००. ई. वर्षाण्यावदतिष्ठत्। अयं सम्पूर्णोऽपि कालः—

भागत्रये विभक्तुं शक्यते। सर्वप्रथमं प्रथमद्वितीयकालसम्बद्धान् महत्त्वपूर्णपरिणामान्विवेचयामः।

आरम्भिकबौद्धतर्कविशेषताः—

(क) अनात्मवादः

बौद्धाः आत्मनाम्नीं कामपि नित्यसत्तां जीवान्तर्गतां न मन्यन्ते। एतेषामनुसारं जीवः केवलं पञ्चस्कन्धानां समूहमात्रम्। अस्याः समष्टेः अतिरिक्ता न भवति काप्यन्या सत्ता। यथा चक्र–धुरी–नेमिप्रभृतीनां समूहो रथ इति शब्द्यते तथैव पञ्चस्कन्धसमूहात्मको जीव इति निगद्यते। यावत् एतेषां स्कन्धानां संघातः तावदेव जीवस्यास्तित्त्वम्। सति च विनष्टसंघाते व्यक्तित्वमपि विनाशतां याति। बौद्धदर्शने अयं संघात एव नामरूपेण कथ्यते। तेषामयं दृष्टिकोणो वर्तते यदात्मनाम्नी नास्ति काप्यन्या सत्ता तथापि मनुष्यजीवनं विभिन्नक्रमबद्धावस्थानां वितानमात्रमस्ति यत्रानेनाव्यवहितप्रवाहकारणेनैकत्वं प्रतीयते। यथा दीपज्योतिः क्षणे क्षणे परिवर्तितं तदपि अव्यवहितसन्तानफलस्वरूपं दीपशिखा बुध्यते तथैव जगदिदमज्ञानवशान्मनुष्यस्य क्रमबद्धावस्थायाः सन्तानत्वेनात्मतत्वमात्रं नान्यत्। यथा च दीपस्यैकं ज्योतिरन्य ज्योतिषः भिन्नं सत् तत् प्रकाशयति यतोहि तत्र कारणकार्यसम्बन्धो वर्तते तथैव वर्तमान–जीवनस्यान्तिमाव–स्थातः आगामिनो जीवनस्यारम्भिकावस्थोत्पद्यते।

(ख) परिवर्तनशीलता

बौद्धतर्कस्य द्वितीयं वैशिष्ट्यं परिवर्तनमस्ति। नहि कश्चन पदार्थः न

वा कस्यापि किमपि स्थायित्वम्।[1] सर्वं पृथक्[2] सत् विना किमपि तत्त्वं कार्यसाधकशक्तेः क्षणिकस्फुरणमस्तित्वात्मकक्षणानां प्रवाहमात्रम्।

(ग) हेतुवादसिद्धान्तः—

सिद्धान्तोऽयम् "अस्मिन् सतीदं भवति" विशुद्धहेतुवादसदृश एव। अयं सिद्धान्तः हेतुवादस्य सामान्यसिद्धान्तान्तर्गतं दार्शनिकमाधारं प्राप्तवान्। अनेन क्षणभंगुरतत्त्वप्रवाहात्मिका अस्तव्यव्यस्तता समाप्तिं गता। प्रत्येकं तत्त्वं कामं तत् क्षणमेकस्यापि कृते "प्रतीत्य समुत्पन्नमिति मन्यते।"

संस्कारः कदापि नोत्पद्यते एकाकी, अपितु हेतुप्रत्यय-व्यवस्थानुसारं परस्परं सामञ्जस्यदशायां क्रियाशीलतां भजति। अत्र मौलिकधर्माणामपेक्षया अस्तित्वधर्मा एव संस्कृतधर्मा इति मन्यन्ते। नैतिकानैतिकनिर्लिप्तशक्तयश्चित्ते स्वभावत एव निवसन्ति। तादृग्वस्तुरूपेण पदार्थधर्मपरिकल्पना कृता वर्तते यद्वस्तु पदार्थापेक्षया पदार्थवत् प्रतीतिविषयतां भजति।

(घ) निवृत्ति—(मोक्ष) वादः—

वादेऽस्मिन् बौद्धदर्शनस्यैकाऽपरापि विशेषता परिलक्षिता भवति या नाम भौतिकवादीन् विहाय भारतस्य प्रायः सर्वेष्वपि दर्शनेषु समान-रूपेणोपलब्धा भवति। प्रारम्भिकबौद्धमतेनैकस्तादृशस्संसारोऽन्विष्टः यत्रैकत्र वर्तते आयतनं[3] तद्यथा—यदपि वयं शृणुमः, पश्यामः जिघ्रामः स्पृश्यामः।

अन्यत्र च वेदना-संज्ञा-संस्कारास्सन्ति। शोभनाः अशोभनाः वा इमे समेऽपि संस्काराः "मुक्तसाधारणज्ञानत्वेन" गृह्यन्ते। ईदृक् संस्कृतधर्माणां प्रवाहः, यस्मिन् किमपि वास्तविकं (पुद्गल) व्यक्तित्वं नासीत्, असौ प्रवाहः किमपि निश्चितमुद्देश्यमादायैव चलति। इदं प्रेरकव्यक्तित्वम् (पुद्गल) अथवा आत्मतत्त्वं नैवापितु हेतुप्रत्यय-व्यवस्थाऽऽसीत्।

---

१. न किञ्चित् स्थायि

२. सर्वं पृथक्,

३. रूप-रस-गन्ध-स्पर्श-आयतनानि,

अस्याः प्रमुखमुद्देश्यमासीत् निर्वाण[1]मथवा मोक्षवादः। यस्य तात्पर्यं जीवनस्य प्रत्येकं लक्षणानां चिरन्तनंशान्त्या गृह्यते यत्र समस्तास्संस्कृतधर्माः स्वसंस्कारागतशक्त्या रहितास्सन्तः शान्ताः जायन्ते। अनेनैव कारणेन बौद्धदर्शने क्षेत्रमीमांसान्तर्गतो मोक्षवादः स्वीकृतः। शान्तिमार्गस्तथा स्थापितश्च येन भ्रान्तदृष्टिकोणो दुष्टप्रवृत्तिश्च शान्तिं यान्ति श्रेष्ठा यौगिकावस्थाश्च प्राप्यन्ते। अनेनातिविशिष्टो जनः योगी आर्यो[2] वा उपर्युक्तधर्माणां संघातभूत इव जायते यत्र पूत्रजीवनस्य प्रामुख्यं भवति। अयमेव मोक्षवादः अर्हतवादो वा कथ्यते।

(ङ) धर्मनैरात्म्यवादः—

महायानबौद्धमतस्य प्रथमं प्रमुखञ्च वैशिष्ट्यमस्ति धर्मनैरात्म्यवादः। धर्मनैरात्म्यवादस्य तात्पर्यमस्ति धर्मशून्यता, स्वभावशून्यता, परस्पर-मपेक्षता, केवलं शून्यता च। अत्रावधेयं यत् ''हरिभद्र'' स्येदं युक्तिपूर्णं वचनं- धर्मस्य[3]धर्मेण शून्यत्त्वात्सर्वधर्मशून्यता सर्वधर्माणां संस्कृता-संस्कृतराशेरितरेतापेक्षत्त्वेन स्वभाव-अपरिनिष्पन्नत्वात्' अत्र शून्यताया अर्थः न केवलमभावः प्रत्युत इतरेतराभावोऽर्थात् परस्परमपेक्षता वर्तते यस्य तात्पर्यं परमसत्यस्याभावत्वेन अवगम्यते। प्राक्तनबौद्धमते समेष्वपि धर्मेषु चरमसत्याभावों वर्तते परं महायानबौद्धमते सर्वेषामपि धर्माणामपेक्षत्वात् इदं चरम सत्यं वास्तविकमेव। अनया दृष्ट्या जगतस्तादृशी गति-रहितपूर्णता वर्तते यत्र न किमप्युत्पद्यते न वा विलीयते यथा सांख्यकानां विचारोऽस्ति।

अतोऽयं सम्प्रदायः धर्माणां तच्चरमं सत्यं नैव स्वीकरोति यदारम्भिकबौद्धमते सत्यरूपेण स्वीकृतमस्ति।

बौद्धमतस्य समानशक्तित्त्वसम्बन्धसिद्धान्तः—

बौद्धन्यायस्यैकमपरमपि वैशिष्ट्यमस्ति समानशक्तिसम्बन्ध-सिद्धान्तः। नवीनबौद्ध-दर्शनेऽनुभूतस्य जगतः वास्तविकं सत्यं नैव

---

१. *निरोधः*

२. *आर्य अर्हत योगिन्*

३. *मीनायेक पाण्डुलिपिः F-C ७१७७-९,*

स्वीकृतमस्ति। इत्थं प्रकारद्वयस्य वास्तविकता ज्ञाताऽभूत् प्रथमा संवृत्तिसत्यस्य द्वितीया परमार्थसत्यस्य। इत्थमनुभूत-जगत् निरपेक्षं प्रति, जगन्निर्वाणं प्रति पूर्णरूपेण समानशक्तित्वसम्बन्धसिद्धान्तो वर्तते।[१] बौद्धमतस्यैकमपरं वैशिष्ट्यमिदं वर्तते यदनेन समस्तन्यायशास्त्रस्य भृशं निन्दा कृता। योगस्य सत्योद्घाटनस्य च प्राधान्यमदात्। बौद्धतर्कस्य द्वितीये काले गभीराणि परिवर्तनान्यजायन्त। तत्रेदं निर्णीतञ्च यज्जीवः स्वस्वाभाविकप्रवृत्त्यनुसारं स्वीये चित्ते बुद्धत्त्वबीजानुसारं[२] निर्वाणस्य कृते हीनयानमहायानयोर्वा यथेष्टं वरणं कर्तु शक्नोति।

बौद्धतर्कस्य तृतीयकालवैशिष्ट्यम्—

(क) स्वसंवेदना—

स्वसंवेदनायाः वास्तविकार्थोपस्थापनाय भारतीय सूत्रम्- 'स्वसंवेदनमङ्गीकार्यमथवा जगत् आन्ध्यं प्रसज्येत'। अस्य कालस्योल्लेखनीया विशेषता इयं वर्तते यदास्मिन्प्राक्तनानि सर्वाण्यपि रूपाण्यतिक्रम्य न्यायशास्त्रस्य सैद्धान्तिकपक्ष उपस्थापितः। पूर्ण-मायावादिसम्प्रदायस्य विरुद्धवादानामिदं कथनमासीद्यत् स्वसंवेदनं ज्ञानस्यैवं एकं सार्थकं श्रोतः, यतोहि स्वसंवेदनस्य सार्थकताऽभावे इदमपि ज्ञातुं न शक्यते यत् 'नीलपटे' नीलत्वं नाम किम्? स्वसंवेदनसमस्या सम्पूर्णं भारतं भागद्वये विभाजयामास। तत्र केचन समर्थकाः केचन विरोधिनश्च[३] समजायन्त। मूलतः अतिसंशयवादस्य प्रतीकार एवास्य मुख्यमुद्देश्यमासीत्। कालेऽस्मिन् बौद्धमतमादर्शत्त्वं प्रासवदासीत्। बौद्धैरिदं स्वीकृतं यत् प्रत्येकमस्तित्वं मानसिकमेव भवति।[४] यद्यप्यस्मद्विचारानुरूपा वाह्यपरिकल्पनायाः पुष्टिर्न भवति तथापि सर्वे विचाराः मानसिका न मन्यन्ते अपितु तेषां मात्रा निश्चिता भवति। अत्रापि प्राक्तनान् सर्वान् विचारान्नतिक्रम्य केवलं सापेक्ष्यं निरपेक्ष्यञ्च स्वीकृतम्। अतो

१. तुकि ० पृ.२०५,
२. भाग २, पृ. २९,
३. विज्ञानमात्रनादः
४. निरालम्बवाद- बौद्धन्याये। पृ.१५,

बौद्धदर्शनस्यान्तिमचरणस्य द्वितीया विशिष्टता आदर्शवादिता (विज्ञप्तिर्वादिता) वर्तते।

आलयविज्ञानम्—

इदमप्येकं वैशिष्ट्यमस्ति बौद्धदर्शनस्य, एतदनुसारं केवलमेकैव संवेदना ययाऽत्मस्वरूपस्य ज्ञानं भवति। यथा यूरोपस्य तर्कवादिन इदं स्वीकुर्वन्ति यत् सम्भाव्यवस्तूनाम् अपारविस्तार ईश्वरेच्छया भवति, स एव वस्तुषु अस्तित्त्वं प्रददाति। यूरोपतर्कवादिनां बौद्धानाञ्चायमेव भेदो यत् बौद्धैरीश्वरस्य बुद्धिस्थाने आलयविज्ञानम्[1] इच्छास्थाने चानादिवासना स्थापिता।

मध्ययुगे तर्कस्वरूपम्—

द्वितीये भागे तर्कशास्त्रस्य क्रमसिद्धान्तो निरूपितो वर्तते यस्यादिमजन्मदातारौ जैनबौद्धावास्ताम्। कालश्चास्य सम्भवतः ६०० B.C. इत्यस्ति। आभ्यां संस्थापकाभ्यां यदा कदा मूलसिद्धान्तानां भौतिकवादसिद्धान्तानाञ्च विषयेऽनेके तर्कसिद्धान्ता निरूपिताः। अनेकैस्तार्किकैः प्राचीनपद्धतिमतिरिच्यापि निजविचारोपस्थापनं कृतं, येषु बौद्धतर्कशास्त्रिणो दिङ्नागस्य, जैनतर्कशास्त्रिणः 'सिद्धसेनदिवाकर' स्य च नामोल्लेखः क्रियते। कालोऽयं ४०० A. D. तः आरभ्य १२०० A.D. यावद्वर्तते। विषयदृष्ट्या विधिदृष्ट्या च प्राक्तनमध्यकालयोर्भेदो लक्षितः। विशेषतः कालेऽस्मिन् ब्राह्मणतर्का एव प्रमुखतां भजन्ते। प्राचीनं तर्कशास्त्रं षोडशप्रकारकाणां द्रव्याणामुपस्थापनं कुरुते यन्नाम विजातीयं द्रव्यम् उच्यते। किन्तु मध्ययुगीनं तर्कशास्त्रं सर्वथास्य विपरीतं वर्तते तच्च द्रव्याणां वर्गीकरणं कस्यापि तथ्यस्य ज्ञापनाय कुरुते।

इत्थं प्रमाणसिद्धान्तविषये इदं वक्तुं शक्यते यत्तस्य मान्यतां प्रयोगं धार्मिकप्रक्रियाञ्च जैनबौद्धाः अपि स्वीकृतवन्तः। अनुमानं यच्च प्रमाणप्रकारः प्राचीनाः मध्ययुगीनाश्च तर्कशास्त्रणो इदं स्वीकृत्य प्रयोगञ्चास्य कृतवन्तः। पञ्चावयवनाम्ना चेमं सिद्धान्तं व्यवहृतवन्तः।

---

१. आगम-अनुसारिन्'। पृ.१६,

प्रमेयपदार्थोऽतएवास्मात्सिद्धान्तान्निस्सारितो यतोह्यस्य प्रयोगस्तर्कशास्त्रे आत्माजन्म मृत्युप्रभृतीनां विषयाणां कृतेऽर्थविहीनः।

जैनतर्कस्यारम्भो दृष्टिवादादारभ्यते यद्यप्यत्र पञ्चविषयाणामुल्लेखः परं प्रथमो भागः तर्कशास्त्रस्य रूपेणैवास्ति। अस्य सम्पूर्णो विकासः 'स्थूलभद्र' समयेऽभूत्।

धार्मिकग्रन्थेषु तार्किकविषयाः—

तर्कविषयवस्तु पञ्चचत्वारिशत्प्राकृतपुस्तकेषु जैनैः प्रतिपादितम्। 'भगवतिसूत्रे' प्रज्ञापारमितासूत्रे च न्यायशास्त्रं सप्तविभागेषु विभक्तम्। ते च- नैगमसंग्रह-व्यवहार-ऋजुसूत्र-शब्द-सम-विरुद्ध-इत्त्थम्भूतप्रभृतयो वर्तन्ते। 'स्थानाङ्गसूत्रे' प्रत्यक्षपरोक्षभेदाद् ज्ञानं द्विविधम्। प्रत्यक्षमपि द्विविधं कैवल्याकैवल्यभेदेन। अकैवल्यमपि तत्र. द्विविध-मवधि-मनः पर्यायभेदात्। परोक्षज्ञानमपि द्विविधं, तत्तु अभिनिबोध-श्रुतिभेदात्। स्थाना-ङ्गसूत्रभगवतिसूत्रयोः ज्ञानश्चतुर्धा विभक्तम्, तद्यथा प्रमा-प्रमाण-ज्ञान-हेतवः। हेतुशब्दः प्राकृतग्रन्थेषु कस्मिंश्चिद्विशिष्टे निश्चयार्थकेऽर्थे न प्रयुक्तः।

The Word Hetu is found in the prakriptures. but its use in there works makes it wlear that it not at this period acouireda very defenite signiflcanee.

in the sthananga sutra! it is used not only in the sense of teason. But also as a synonym for valed knowledge (pramana) and (anumana) hetu as identical with valid knowledge (pramana) is stated to be of four kinds, viz-

(1) knowledge detived ftom perneption (partyaksa)

(2) knowledge deriued from inference (Anumana)

---

१. *प्रमाणे चडव्विहे पश्यते दुविहे नाणो एस्यते।*
तं जहा पंचक्रवं चेव परीक्रणे चेव॥

स्थानाङ्गसूत्रम्। अध्याय : ६, पृ.४५,

(3) knowledge detived throufh comparis on (upamana); and

(4) knowledge derived ftom verbal testimony or reliadle autho rity (Agama).

प्रत्युत शब्दोऽयं प्रमाणानुमानयो: पर्यायत्वेन प्रयुक्त: हेतु: प्रमाणेन सहेत्त्थं समानतां संगच्छते—

(क) ज्ञानं नाम प्रत्यक्षज्जायते-(प्रत्यक्षम्)

(ख) ,, ,, अनुमानाज्जायते-(अनुमानम्)

(ग) ,, ,, सादृश्याज्जायते-(उपमानम्)

(घ) ज्ञानं नाम शब्दादासवचनाच्च जायते-(शाब्दम्)

अथ यदा हेतुत्वंमनुमानत्वेनावाप्यते तदाहि हेतोर्निम्नाङ्कितं स्वरूपमुपतिष्ठते—

(१) पर्वतो वह्निमान् यतोऽसौ धूमवान,

(२) उष्णोऽयं प्रदेश: वह्निमत्त्वात्,

(३) अनुष्णोऽयं '' वह्न्यभावात्,

(४) शैशववृक्षाभावोऽत्र वृक्षाभावात्,

ऐतिहासिकविकासदृष्ट्या जैनतर्कभाषाणां महत्त्वम्—

जैनतर्कस्य मूलं जिनसिद्धान्तेष्वागमग्रन्थेषु समुपलभ्यते। अनादिकालादेव भारतीयविचारधारा भागद्वये विभक्तेति भृशमवलोक्यते। तत्राद्या परम्परानुसारिणी द्वितीया च पुरुषार्थावलम्बिता। द्वितीया पुरुषार्थालम्बिता विचारधाराऽऽचरणप्रधाना वर्तते। इमे द्वेऽपि विचारधारे परस्परमन्योन्यपूरके विरुद्धगामिन्यौ चास्ताम्। सम्पूर्ण राष्ट्रं बौद्धिकैकतासूत्रै आबद्धमनयोरुभयोरपि समानं योगदानं वर्तते। परम्पराविचारधाराया उत्पत्तिः पंजाब-पाण्डिचेरी-उत्तरप्रदेशेषु तथाहि आचरणप्रधानपरम्परायाश्च असम-बंगाल-विहार-मध्यप्रदेश-राजस्थान-प्रदेशेषु चाजायत। श्रमण (आचरण) वादपरम्परा-जनका: जैना: अभूवन्नाविर्भावश्चास्या: वैदिकमतेभ्य: प्राक् किञ्चित्कालानन्तरमेव

वाऽभूत्।[1] वैदिकयुगेऽपि व्रात्यानां श्रमणानाञ्च[2] परम्परा प्रातिनिध्यं जैनैरेव विहितम्।

जैनधर्मप्रवर्तकाः महात्मानस्तीर्थङ्करेत्यभिधानेन अभिधीयन्ते। एते ज्ञानप्रवर्तकाः सन्तः वीतरागिणोऽपि भवन्ति। 'तरति संसारमहार्णवं येन निर्मितेन तत्तीर्थमिति। एते तीर्थङ्कराश्चतुर्विंशतिसंख्यकाः तत्तीर्थमिति[3]। अभूवन् येषु प्रथमः ऋषभदेवोऽन्तिमश्च महावीर आसीत्। ऋग्वेद-अथर्ववेद-श्रीमद्भागवतप्रभृतिषु ग्रन्थेषु ऋषभदेवस्य भूयसी चर्चा चर्चिता वर्तते[4]। अनेनास्य प्राचीनता सिद्धा भवति, तस्य व्यक्तित्त्वसन्दर्भेऽपि बहुकिञ्चिज्ज्ञातुं शक्यते एतेभ्यो ग्रन्थेभ्यः[5]। इत्थं भगवान्नरिष्टनेमिरपि वैदिकयुगस्य महापुरुषः प्रतीयते। महाभारत-कालीनस्तीर्थङ्करो 'नेमिनाथोऽपि' एतिहासिकः पुरुषो मन्यते। 'श्रेयांसनाथ' नाम्ना जैन-धर्मस्यैकादशस्तीर्थङ्करः स्वस्मृत्या अद्यापि सारनाथे विराजते। एषु २५० ईस्वीतः ८०० ईस्वीपूर्व राज्यपरिवारे जन्म गृहीतवतो महावीरस्य श्रमण-सम्प्रदायप्रतिष्ठायां महच्छ्रेय आसीत्। अवधूतत्वाज्जगद्विजयीत्वाद् भगवान् पार्श्वनाथो जिन इति। तथाहि तस्यानुयायिनो जैना इति निगद्यन्ते। पार्श्वनाथस्य मोक्षप्रात्येर्नन्तरं षष्ठशताब्द्यां महावीरो जनिं लेभे, पार्श्वनाथ इव अयमपि त्रयोदशवर्षाण्यावत् ज्ञानमधिगतवान्। जैनधर्मस्य प्रथम-संस्थापकश्रीऋषभदेवस्याष्टमोऽव-तारत्वेनासौ स्वीकृतो मतश्च। जैनानां तार्किकदृष्टिरित एवारभ्यते। भगवान् ऋषभदेवोऽहिंसामूलक-धर्मस्य, विलक्षणप्रमेयस्यानेकान्तदृष्टेः स्याद्वादस्योपदेशञ्चकार, अनेनैव सम्बद्धा वर्तते सप्तभङ्गीति।

जैनतर्कस्य मुख्यविन्दुस्ति विलक्षणपरिणामवादो, यश्च बौद्धदर्शन-

---

१. *Dr. Radhakrinan- Indian Philospi. Page-287*

२. *डा० उमेश मिश्र-भारतीय दर्शन पृ.९७,*

३. *ऋग्वेदः-१०-१६६-१०, अथर्ववेदः-११-५-२४-२६*
गोपथब्राह्मण-पूर्व-२-८।

४. *अनेकान्त-एप्रिल-१९५२, पृ.१२०-१२१,*

५. *ऋग्वेदः-१०-१७८०,*

ग्रन्थेषु दृष्टान्ता-भासरूपेण वर्णितः।[1] स्याद्वादवाद्प्रवर्तकत्वेन ऋषभ-देववर्धमानयोर्नामोल्लेखो वर्तते। स्याद्वादस्य प्रमाणव्यवस्थायाः प्रमुखो विन्दुरयमेव यदात्मा स्वतन्त्र-सत्तात्मिकैकाऽऽधारशिला यस्य स्वीकृतौ बन्धमोक्षप्रक्रियां प्रति अग्रसरणं समुपयुज्यते। तीर्थङ्करो नेमिनाथो द्वाविंशस्तीर्थकंरः, यजुर्वेदऽयैव नामोल्लेखः 'अरिष्टनेमि' नाम्ना वर्तते। जैनतार्किकसाहित्यमित्त्थं विभक्तुं शक्यते—

१. सिद्धान्तागमनकालः

२. अनेकान्तस्थापनकालः

३. प्रमाणव्यवस्थाकालः

४. नवीनन्यायकालः

दिगम्बरसिद्धान्तग्रन्थेषु षट्खण्डागम-महाबन्ध-कषायप्रभृत-यस्तथाहि कुन्दकुन्दा-चार्यस्य पंचास्तिकायप्रवचनसांरसमयसारादयो मुख्यतां भजन्ते। षड्खंडागमस्य कर्ता आचार्यपुष्पतन्तः भूतबली च। कषायप्रभृतस्य रचयिताऽऽचार्यो गुणधरो वर्तते। आचार्ययतिवृषभेन स्वीयत्रिलोकप्रज्ञसिगाथाग्रन्थे भगवतो महावीरस्य निर्वाणानान्तरात्मिकाया आचार्यपरम्परायाः ६८३ वर्षाणां च कालगणना कृता।

सिद्धान्तग्रन्थेषु जैनतर्कस्य मूलं बीजं परिलक्ष्यते यस्य समयः ६१४ इति विक्रमस्य द्वितीया शताब्दी सिध्यति।

अनेकान्तस्थापनसमये जैनपरम्परायां युगप्रधानस्वामिंनौ 'सामन्त-भद्र'-'सिद्धसेना' वभूवतुः। अनयोः कालः द्वितीया-तृतीया शताब्दीति वर्तते। एतौ स्तुतिकारावास्ताम्। आचार्यसिद्धसेनेन 'सम्मतिसूत्रे' नयस्या-नेकान्तस्य च विस्तृतं विवेचनं कृतमस्ति।

परन्त्वस्य प्रतिष्ठाभूतं कारणं न्यायविशदीकरणमेवास्ति। अस्मिन्नैव काले नागार्जुन-वसुबन्धु-असङ्ग-दिङ्नागप्रभृतयो तर्कवादिनो जनिं लेभिरे, येषां तर्कप्रहारैः काचित्क्रान्तिस्समागता। जैनतर्कस्य सम्भवत इयमेव प्रारम्भिकव्यवस्था, यस्यां परपक्ष-खण्डनं तार्किकांकस्य चोपस्थापनं

---

१. *धर्मतीर्थकंरेभ्यस्तु स्याद्वादिभ्यो नमो नमः।*
ऋषभादिवीतरागेभ्यः स्वात्मानोपलभ्यते॥

समारब्धम्। अतएव सामन्तभद्रेण आप्त-मीमांसावृहत्स्वयम्भूस्तोत्रेषु अनेकान्तस्थानं स्याद्वाल्लक्षणं सुनयदुर्नयोर्व्यवस्थापनं विधायानेकान्त-प्रक्रिया ज्ञापिता। तेन बुद्धिशब्दयोः सत्यासत्ययोराधारः मोक्षमार्गो-पयोगितास्थले, बाह्यप्राप्तिर्निगदिता।[1] 'स्वपरावभासकबुद्धिः प्रमाणम्'[2] इति प्रमाणञ्च व्यवस्थापितम्। अज्ञाननिवृतिं हानोपादानमुपेक्षाञ्च प्रमाणफलत्वेन ज्ञापयामास।[3] आचार्यसिद्धसेनेन 'न्यायावतारे' प्रमाणस्य भेदत्रयं कृतं, परन्त्वयं त्रित्ववादोऽग्रे प्रसृतो नाभूदतः प्रत्यक्षानुमानयोः स्वार्थपरार्थाविति द्वावेव भेदौ।

जैनप्रमाणशास्त्रस्य सजीवप्रतिष्ठापकः 'भट्ट-अकलंकदेवः' सप्तशताब्द्यां प्रथमतः प्रमाणस्य भेदद्वयञ्चकार। पुनः प्रत्यक्षस्य मुख्य-प्रत्यक्षअमुख्यप्रत्यक्षत्वेन द्वौ भेदावाकार्षीत्। तर्कञ्च परोक्ष-प्रमाणान्तर्गतमङ्गीचकार। प्रमाणव्यवस्थायुग एव तर्कशास्त्रस्य प्रारभ्योऽजायत। समस्तैरपि तार्किकैः स्व-स्वतर्कविस्तारोऽस्मिन्नेव युगे कृतः कालेऽस्मिन्नेव तर्काऽक्रमणं बौद्धतार्किकाभ्यां नागार्जुनदिङ्नागाभ्यां कृतम्। वैदिक-तर्कपरम्परावादिन उद्योतकरकुमारिलभट्टप्रभृतयः कालेऽस्मिन्नेवाजायन्त। पात्रस्वामि-सुमति-श्रीदत्तादय आचार्याः कालेऽस्मिन्नेव जनिमादाय जैनतर्कस्य विविधान् पक्षान् प्रकाशयांमासुः। धर्मकीर्तिद्वारा वैदिकदर्शनेषु कृताक्षेपैः जैनदर्शनमपि नावशिष्टम्।

अस्मिन्नेव संघर्षशीले काले जैनतर्कस्य प्रसिद्धौ प्रतिष्ठापकौ आचार्य अकलंकहरिभद्रौ प्रादुर्भूतावभूताम्। बौद्धैस्सह एतयोरपि महान् संग्रामोऽजायत। एतयोर्ग्रन्थानां विस्तृतो भागः बौद्धदर्शनखण्डनेन व्यापृतो वर्तते। धर्मकीर्तेः प्रमाण-वार्तिकस्य प्रमाणविनिश्चयस्य चानेकशः खण्डनं प्रमाणसंग्रहेऽष्टशतौ च वर्तते।

विक्रमस्याष्टमीनवमी शताब्दी च—

युगेऽस्मिन् आचार्यसिद्धसेनेन सन्मतिसूत्रे सिद्धविनिश्चये च

---

१. आप्तमी-श्लोकः ८७,

२. वृहत्स्वयम्भु-श्लोकः ६३,

३. आप्तमी, श्लोकः १०२,

जैनतर्कस्य महत्त्वपूर्णं स्थानमदीयत। दशमशताब्द्याम् आचार्यसिद्धसूरिणा न्यायावतारे टीका लिखिता। एकादशद्वादशशताब्द्यां शान्तिसूरिणा जैनतर्कवार्तिके अभयदेवस्य सम्मतिसूत्रे च टीका लिखिता। त्रयोदशशताब्द्याम् आचार्य-मलयगिरिणा वहव्यः टीकाः लिखिताः। कालेऽस्मिन्नेव 'कलिषेणेन' स्याद्वादमञ्जरी, 'रत्नप्रसूरिणा-' रत्नाकरावतरिका, चन्द्रसेनेन च 'उत्पादिसिद्धि' नामाख्याः ग्रन्थाः लिखिताः। चतुर्दशशताब्द्यां सोमतिलकेन षड्दर्शनसमुच्चय-वृहद्-वृत्तिप्रभृतयो ग्रन्थाः रचिताः।

नवीनन्याययुगम्—

विक्रमस्य त्रयोदशशताब्द्यां गंगेशोपाध्यायेन नव्यन्यायस्य मूलं स्थापितम्। सप्तदशशताब्द्यामुपाध्याययशोविजयेन नव्यन्यायं परिष्कृत्य 'खण्डनखाद्यादिगग्रन्थाः लिखिताः। अष्टादशशताब्द्यां 'यशः शतसागरः' सप्तपदार्थादिग्रन्थाः लिखिताः। यद्यपि जैनधर्मे आचारण-प्राधान्यमेव प्राधान्यं भजते तथापि तर्कसदृशस्य शुष्कशास्त्रस्योपयोगोऽपि समन्वयाय कृत एव।

समन्वयसमभावयोश्च स्थापनं युगस्यास्य महदवदानं वर्तते। अत्र कारणमहिंसावादिनामुच्चाऽदर्शवादिता इति। तर्कशास्त्रसदृशश्शुष्कोऽपि विषयः समुपस्थापितः। वस्तुत ईदृश्य उदारसूक्तयो विरला एव प्राप्यन्ते यथा-

भवबीजाङ्कुरजनना रागाद्याः क्षयमुपागता यस्य।
ब्रह्म वा विष्णुर्वा हरो जिनो वा नमस्तस्मै॥[१]

अर्थाद्यस्य संसारपोषकाः रागद्वेषादयो विनष्टाः कामं सः ब्रह्मा वा स्याद्विष्णुर्वा स्यात् तस्मै नमः।

पक्षपातो न मे वीरे न द्वेषः कपिलादिषु।
युक्तिमर्द्वचनं यस्य तस्य कार्यः परिग्रहः॥[२]

अर्थान्न तु महावीरे रागः, न वा कपिलादिषु विरागो वा, अथ यस्य

---

१. हेमचन्द्रः

२. लोकतत्त्वनिर्णयः

युक्तिमद्वचनं स्यात्तस्य शरणं ग्राह्यम्। जैनमतावलम्बिनः व्याप्तिग्राहकं साधनं तर्कमेवाङ्गीचक्रुः। तर्कविषयं स्वरूपञ्च अकलंकदेवः स्थिरीचकार। तर्कं परिभाषयन्नकलंकदेवोऽवादीद्यत्प्रत्यक्षानुपलब्धिभ्यां जातं ज्ञानमेव तर्केति।[१] तत्त्वार्थश्लोकवार्तिकभाष्ये तर्कः परिभाषयतोक्तमस्ति यत् साध्यसाधनविषयक्रमज्ञानमपाकर्तु यत्साधकतमं करणं तदेव तर्क इति।[२] प्रत्यक्षविषये साध्यसाधन एव न प्रत्युत अनुमानागमयोर्विषयभूत-पदार्थेषु अन्वयव्यतिरेकद्वारा अविनाभावनिश्चय एव तर्कः।[३] आचार्यहेमचन्द्रेण प्रसङ्गेऽस्मिन्माणिक्यनन्दिनोऽक्षरशः अनुगमनं कृतमस्ति। इत्थं प्रायेण सर्वैरेव जैनाचार्यैः व्याप्तिनिश्चयात्मकं साधनं तर्क इति स्वीकृतमस्ति।

---

१. प्र. स. का. १२,
२. बौद्धदर्शनं, पृ.११९,
३. प. मु. सु. ३ (७-९),

खण्ड-ग

यशोविजयकृता तर्कभाषा जैनपरम्परायां महत्त्वपूर्णं स्थानं स्थापयति। जैनदृष्टिकोणे तर्कस्य किं स्वारस्यमिति तत्र सम्यग्विवेचितमस्ति। जैनमते व्याप्तिनिश्चयात्मकसाधनमेव तर्क इति स्वीकृतम्—

'व्याप्तिनिश्चयसाधनं तर्कप्रमाणादयः स्याद्वाद् न्यायवादैस्तैर्निरासः, भाष्यन्तेऽनयेति तर्कभाषा'।

जैनशब्दस्योत्पत्तिरपि जिनशब्दात् वर्तते। कश्चन् जनः येन स्वजीवने मनसि कामनासु च विजयोऽधिगतः आवागमनेन सर्वथा मुक्तश्च स्यात्, इत्थं जिनानामुपदेशस्य पालनकर्तारो जैना इति कथ्यन्ते, येषां दार्शनिकसम्प्रदायसिद्धान्तः जैनतर्क इति कथ्यते। पुनश्च जैनतर्कप्रमाणानां व्यवस्थापनं यया भाषया पद्धत्या वा विधीयते सा तर्कभाषेति संज्ञां प्राप्नोति। ऐतिहासिकजैनतर्कस्य प्रथमं स्थानमस्ति नास्तिकदर्शनेषु। यद्यपि चार्वाका इव जैनमतावलम्बिनोऽपि वेदविरोधिनः परं तत्रं अयमेव भेदो यत् ते वेदस्थाने तीर्थंकराणां वचांसि उपदेशांश्च मन्यन्ते। जैनपरम्परायाः स्वीयं स्वतंत्रमस्तित्त्वमस्ति। अस्याः परम्परायाः भारतीयजीवनस्य प्रत्येकं क्षेत्रे विशिष्टता। आचारविचारयोरपि काचिद्भिन्नैव दृष्टिर्जैनानाम्। अधुना सर्वप्रथमं विचारक्षेत्रमर्थात् दर्शनक्षेत्रं व्याख्यास्यामः।

स्याद्वादः—

जैनतार्किकपरम्परायां प्रत्येकं द्रव्यं सत्पदार्थो वा परिणामत्वात् एकं धर्मं विहाय द्वितीयं स्वीकुरुते। अनया प्रकृत्या प्रत्येकं सतः उत्पादः, व्ययः (विनाशः) च भवति। तथापि तस्य सत्पदार्थस्य स्वत्त्वं न विनश्यति। तत्रोत्पादव्ययौ च सदैव सत्तां स्थापयतः। एतद् 'ध्रौव्यम्' इति कथ्यते। अनया विवेचनयेदं स्पष्टं भवति यदुत्पादव्ययभ्यां सह सत्पदार्थे 'ध्रौव्य'

नामकः तृतीयोऽपि धर्मः भवत्येव। यथा–मृत्तिकानिर्मितघटे विनष्टेऽपि मृत्तिकायाः सत्त्वं तिष्ठति तथैव कस्यापि तत्त्वस्य स्वरूपज्ञानार्थ तस्य अनेके धर्माः विचारणीयाः भवन्ति। अस्मादनेकधर्मत्वादेव किमपि वस्तु अनेकान्तत्वं प्राप्नोति। तदर्थ 'स्यात्' इत्यस्यापि प्रयोगो विधीयते यस्यार्थो भवति 'कथञ्चित्'।[१] अर्थात् तद्वस्तु तद्रूपत्वेन नहि अपितु भिन्नरूपत्त्वेन भवत्येव। अस्य सत्यस्याभिव्यक्तिरेव स्याद्वादः, योऽयं पुनरप्यनेकान्त-वादत्वेन व्यवह्रियते।[२]

अन्यजैनचिन्तकानामनुसारमनेकान्तवादः वास्तविकं सत्यं प्रतिपादयति।[३] स्याद्वाद् इत्यत्र स्यादिति पदं तिङ्त्वं, परन्त्विदमव्ययपदं यत्कथञ्चिदथवा अमुकदृष्ट्यर्थस्य द्योतकत्वेन गृह्यते।[४] वादशब्दः सिद्धान्तवाचको मतवाचको वा। इत्थं स्थाद्वादस्याभिप्रायः सापेक्षवाद-सिद्धान्तवादपेक्षावादकथञ्चिद्वादत्वेन ज्ञेयः। एभिर्बहुशः वस्तुतत्त्वस्य निरीक्षणं विधीयते। प्रसिद्धजैनाचार्यहेमचन्द्रसूर्यनुसारं स्याद्वाद्सिद्धान्तो विविधाभिरपेक्षाभिः एकस्मिन्नेव वस्तुनि नित्यताऽनित्यतासदृशता-विसदृशतावाच्यताऽवाच्यतासत्ताऽसत्ताप्रभृतिनां परस्परं विरुद्धं प्रतीय-मानानां धर्माणां प्रतिपादनं विधाय युक्तियुक्तं समन्वयं प्रस्तौति।[५]

अनेकान्तदृष्टौ प्रत्येकं वस्तु नित्यमनित्यञ्च, द्रव्यं नित्यं पर्यायमनित्यं यतोहि जीवद्रव्यं विनाशतां न सम्पद्यते। पर पदार्थाः परिवर्तनशीलाः। 'तत्त्वार्थसूत्रानुसारं'[६] प्रत्येकं सद्पदार्थः उत्पाद्–व्यय–ध्रौव्यात्मकश्चास्ति, अतः सः पर्यायेणोत्पद्यमानः विनश्चयन् च द्रव्यवृत्त्या ध्रुवमस्ति। अत्र जैनमतानुसारं सत्पदार्थः न कदाचिद्विनश्यति न वा असत् पदार्थः

---

१. मोहनलाल मेहता, जैनधर्मदर्शन, पृ.३५८,

२. लघीयस्त्र टीका, पृ.६२,

३. देवेन्द्रमुनिशास्त्री, धर्म और दर्शन, पृ.१०४,

४. अष्टसाहस्त्री, पृ. २९६,

५. अन्ययोगव्यवच्छेद, द्वात्रिंशिका, श्लोकः–२५,

६. तत्त्वार्थसूत्रम्– ५,

कदाचिदुत्पद्यत एव।[१] तेष्वनन्तघर्मेषु विधिनिषेधभावनया प्रत्येकं धर्मस्य साधुव्यवस्थापनाय सप्तभावनाः परिकल्पिताः एता एव सप्तभंगीनयत्वेन[२] व्यपदिश्यन्ते।

नयवादः—

एकान्तभावेन कस्यापि वस्तुनः एकस्मिन्नेव बहुषु रूपेषु वा ग्रहणज्ञानत्वं नयत्त्वम्। अयं नयः द्रव्यार्थिक–पर्यायार्थिकभेदेन द्विविधः, तत्र प्रथमस्य नैगमसंग्रहव्यवहारत्वेन त्रिविधत्वम्। द्वितीयस्य सृजसूत्र–शब्दसमभिरूढैवंभूतत्वेन चतुर्विधत्वम्। सर्वोऽपिद्रव्यार्थिको नयः वस्तुनः सामान्यांशमेवगृह्णाति तथैव सर्वोऽपि पर्यायार्थिको नयः वस्तुनो विशेषांशमेव स्वीकुरुते।

अधुना जैनाचारस्य अधोलिखिताः विन्दवो विवेच्यन्ते–

(क) अहिंसा—

अहिंसायाः यावत्सूक्ष्मविवेचनं जैनपरम्परायां दृष्टिपथमायाति न तथान्यत्र क्वचिद्यतोहि सर्वेऽपि प्राणिनो जिजीविषवोः मुमुर्षा तु कस्यापि नैव, कामं ते कीटपतंगपशुपक्षिमनुष्याः वा स्युः। अतएवेदमस्माकं कर्तव्यमस्ति यन्नैव मनसा वयं कमपि पीडयामो।[३] वनस्पतेः आरभ्य मानवपर्यन्ताऽहिंसा शुद्धाऽहिंसेति निगद्यते।[४] अतएव जैनाचारपरम्परायाः महत्त्वपूर्णा विशेषता अहिंसैवास्ति। एतदतिरिक्तमहिंसां केन्द्रीकृत्य अमृषावादऽस्तेयाऽमैथुनाऽपरिग्रहाणामादर्शाः जैनाचारपरम्परायाः महत्त्वपूर्णाः विशिष्टाश्च वर्तन्ते।

(ख) अपरिग्रहता—

स्वाधीनताया रक्षायै अपरिग्रहस्य सिद्धान्तोऽत्यन्तं मान्यः।

---

१. पञ्चास्तिकाय–१५,

२. सूत्रकृताङ्ग–१–१–११,

३. आचाराङ्ग–१.१०.६,
जैनधर्मदर्शन, पृ.१०८,

४. आचारङ्ग–१.१.०६,
जैनधर्मदर्शन, पृ. ११०

अपरिग्रहस्य मार्गः विश्वशान्तेः प्रशस्ततमो मार्गः हि परिग्रहो नामात्म-विकासस्य नितान्तं विरोधी वर्तते। परिग्रहो नाम पापसंग्रहस्थानम्। परिग्रहबुद्धौ मानसमाजे वैषम्योत्पादनस्य महदवदानमापतति। अस्य अन्यदभिधानं 'ग्रन्थि' रपि वर्तते। यस्य ग्रन्थिर्यथा वर्द्धते तथा परिग्रहोऽपि, अनेनैव कारणेन महावीरस्वामिना विशिष्टं बलं दत्तमस्ति। इत्थं निर्ग्रन्थतापि जैनपरम्पराया अत्यन्तं विशिष्टं वैशिष्ट्यं वर्तते।

(ग) कर्मवादः—

प्रत्येक कार्यं प्रति किमपि कारणं भवति, तथाहि प्रत्येकं कारणं किमपि कार्यमवश्यमुत्पादयति। वयं कीदृगपि फलं बिना कर्म नैव प्राप्नुमः। कर्मफलयोर्धनिष्ठाः सम्बन्धा आचारशास्त्रस्य मूलमस्ति।

(घ) इच्छास्वातन्त्र्यम्—

जैनपरम्परा नियतिवादे नैव विश्वसिति प्रत्युतेच्छास्वातन्त्र्यं दृढ़ीकरोति। तदपि नामैकं निश्चितं सीमानं यावत्। अत्र प्राणिनां रागद्वेषात्मिकावृत्तिः भावकर्मनाम्नाऽभिधीयते। भावकर्मद्वारा आकृष्टः सूक्ष्मभौतिकपरमाणुर्द्रव्यकर्मत्वं प्राप्नोति। इत्थं दर्शनस्यास्य कर्मवादः अनादिकालात् जडचेतनयोर्मिश्रणद्वारा निर्मिता द्वन्द्वात्मिकाऽऽन्तरिकी प्रक्रिया वर्तते। प्रक्रियामिमामाधारीकृत्यैव पुनर्जन्मनो विचारो भवति। अस्याः प्रक्रियायाः समाप्तिरेव मोक्षः। आत्मनः स्वस्वरूपे स्थितिरेव दर्शनस्यास्य परमेश्वरवादः। प्रत्येकमात्मनोऽन्त इदं पदं प्रतिष्ठतं वर्तते। 'जे अप्पा ते परमप्पा' अर्थात् यः आत्मा स एव परमात्मा इति। साम्यदृष्टेरन्तिमस्वरूपत्वात्समवादस्य विकासत्वाच्च जैनदर्शनेऽस्य विशिष्टं वैशिष्ट्यं वर्तते।

निष्कर्षः—

तर्कभाषायाः मूलरूपं वैदिकबौद्धजैनेषु च भूयसा विलोक्यते। वैदिकतर्कभाषकारेषु वात्स्यायन - उद्योतकर - वाचस्पति - जयन्त-विश्वनाथप्रभृतयः प्रमुखाः वर्तन्ते। एभिस्सर्वैरपि त्रीन्नपि तर्कान्नाधारीकृत्यं सतः किं स्वरूपम्? अनेन वस्तुसत्तासिद्धिः। इत्यादिषु गहनविचारः कृतो वर्तते। विकासे चास्य प्रशस्तपाद-माठर-कुमारिल सदृशानां वैदिक-

तार्किकानामतिरिक्तं वसुबन्धु-दिङ्नाग-धर्मकीर्ति-धर्मोत्तर-प्रज्ञाकर-शान्तिरक्षित-अर्चटादि बौद्धनैयायिकानां तथाहि समन्तभद्र-सिद्धसेन-पात्रस्वामि-अकलङ्क-विद्यानन्द-माणिक्यनन्दि-प्रभाचन्द्रदेवसूरि-हेमचन्द्रादिनां प्रमुखजैनतार्किकानां विशिष्टं योगदानमस्ति।

निस्सन्देहमिमास्तिस्त्रोऽपि तर्कभाषाः केवलं बौद्धिकव्यायामं यावन्न सीमिताः प्रत्युत आसु प्रतिपादितप्रमाणदिविषयाणामध्ययनमननेन निश्रेयस् सिद्धिरपि भवति। अतएव स्वतन्त्रदृष्ट्या भारतीयसमस्तास्तिक-नास्तिकपरम्परायामेताः तर्कभाषाः आधारीकृत्य प्रमाणादिनां व्यवस्था कथं कृता? तस्यैतिहासिकविकासक्रमः कः? पूर्वापरदृष्टिकोणेन विकसिताऽविकसितस्वरूपं किमीत्यादिनां समीक्षात्मकरूपरेखां समुपस्थापयामः।

न्यायपरम्परायां तर्कभाषायाः स्वरूपम्-'तर्क्यन्ते प्रतिपाद्यन्ते इति तर्काः, प्रमाणादयष्षोडशपदार्थास्ते भाष्यन्तेऽनयेति तर्कभाषा'। भारतीयं तार्किकं वैदिकाऽवैदिकभेदेन द्विविधम्। वैदिकतर्कभाषामेवाधुनिकाः इतिहासकाराः 'ब्राह्मण-तर्कभांषा' इति व्यवहरन्ति। स्व-स्वरूप-विस्तारगम्भीरतायाश्च कृते वैदिकतर्कभाषा न्यायशास्त्रे महत्त्वपूर्णं स्थानं स्थापयति। अवैदिकतर्कभाषा च बौद्धजैनभेदेन द्विधा मन्यते। गौतमप्रणीतं वैदिकं न्यायवाङ्मयं प्रमेयप्रधानप्रमाणप्रधानमिति द्विधा विभक्तम्। गौतमादारभ्य गंगेशोपाध्यायात्प्राक्वर्तिनामाचार्याणां कृतयः 'प्रमेय-प्रधानाः' तथाहि तदुत्तरवर्तिनामाचार्याणां कृतयः "प्रमाणप्रधानाः" इति स्वीक्रियन्ते। प्रमेयप्रधानं नाम प्राचीनन्यायं तथाहि प्रमाणप्रधानञ्च नव्यन्यायमिति आचक्षन्ते विद्वांसः। न्यायदर्शने प्रमेयप्रतिपादनस्य प्राधान्यं न तु प्रमाणप्रतिपादनस्य। यतोहि पञ्चाध्यायात्मकन्यायदर्शने कानिचिदेव सूत्राणि प्रमाणप्रतिपादने विनियुक्तानि।

यथा वा—

प्रथमाध्याये प्रथमाह्निके प्रमाणलक्षणे षड्, द्वितीयाध्याये प्रथमाह्निके प्रमाणसामान्यपरीक्षाप्रकरणे त्रयोदश, प्रत्यक्षपरीक्षाप्रकरणे द्वादश, अनुमान-परीक्षाप्रकरणे द्वे, उपमानपरीक्षाप्रकरणे पञ्च, शब्दसामान्य-

परीक्षाप्रकरणे त्रयोदश, शब्दविशेषपरीक्षाप्रकरणे द्वादश, द्वितीयाध्याये द्वितीयाह्निके प्रमाणचतुष्टय, परीक्षा-प्रकरणे च द्वादश, इत्त्थं न्यायदर्शनस्य ५२८ सूत्रेषु केवलं ७० सूत्राण्येव प्रमाणानि प्रतिपादयन्ति। तथा आत्मादिद्वादशप्रमेयेषु अन्तर्गतानां प्रभेदानां प्रतिपादनमस्ति। अतएव न्यायदर्शनं प्रमेयप्रधानमस्ति। गंगेशोपाध्यायस्य ''तत्त्वचिन्तामणि'' ग्रन्थे प्रमाणस्यात्यन्तं गभीरं विस्तृञ्च विवेचनमस्ति। विस्तृतविवेचनेन सह येऽपि ग्रन्थाः प्रणीतास्ते सर्वे प्रमाणप्रधानत्वान्नव्यन्यायसंज्ञामधिगच्छन्ति। प्राचीननव्यन्याययोश्शैली-भाषयोर्भेदो वर्तते। प्राचीनन्याये यत्र प्रकारता-विशेष्यता-संसर्गता-अनुयोगिता-प्रतियोगिता-अवच्छेदकता-अवच्छेद्यता-निरूपकता-निरूप्यतादिशब्दाः यथा कथञ्चित्प्राप्यन्ते तथैव नव्यन्याये एतेषां बाहुल्यता दृश्यत एव। प्राचीनन्यायस्य भाषा अत्यन्तं सरलाऽऽडम्बरहीना संक्षिप्ता सांकेतिका च वर्तते, अतएव तत्र शब्दानामत्यन्तं संक्षिप्तत्वात् स्फुटतया अर्थबोधो न जायते। किन्तु नव्यन्यायस्य भाषाऽडम्बरयुता दुर्गमा सत्यपि शैलीकारणेन अर्थावबोधने काठिन्यं नैवोत्पादयति। विषयप्रतिपानयोरुभयोरपि गुणदोषाः स्पष्टतया दृश्यन्त एव। प्राचीनन्याये विषयस्य प्रतिपादनं स्थूलतया भवति। विषयस्य वाह्यस्वरूपं किञ्चित्स्पृश्य विरमन्ति प्राचीननैयायिकाः।

नव्यन्याये च विषयप्रतिपादनं सूक्ष्मतया भवति। विचाराः विषयं सर्वाङ्गतया स्पृशन्ति, सत्यं वास्तविकञ्च तथ्यमुद्घाटयन्ति। एतसर्वं सदपि मूलं श्रोतः एकमेव। तच्च न्यायदर्शनं न्यायसूत्रं वा कथ्यते।

वेदसमाना इव समस्तविद्याः सृष्टेः आरम्भकालादेव विद्यमानास्सन्ति, यदा कश्चन्वर्णयिता तं विषयं संक्षिप्य विस्तार्य वा रोचकतयोपस्थापयति तदा सः तस्य विषयस्य कर्तेति मन्यते। 'आदिसर्गात्भृति वेदवदिमाः विद्याः प्रवृत्ताः, संक्षेपेण विस्तारविवक्षया तांस्तांस्तत्र कर्तृन्नाचक्षंन्ते' जयन्तभट्टस्य कथंनमिदं सर्वथोपयुक्तम्। यतोहि न्याये येषां मतानां निरासो वर्तते तानि सर्वाण्यपि मतानि चिरन्तनानि सन्ति। जैनबौद्धाभ्यामेतान्येव परिष्कृतानि पल्लवितानि च। न्यायसूत्रेषु विभिन्न-कालवर्तिनां विदुषाम्मतोल्लेखः प्राप्यते, येषु बौद्धमतं प्रामुख्यं भजते। एतेषां

समेषामपि विवेचन इदमेव स्पष्टं भवति यन्नायायस्य प्रादुर्भावः ईशातः पूर्वं नैव सम्भवति, अतएव न्यायसूत्राणां रचनाकालः ईशातः द्वितीयशताब्द्याः मध्यकालः स्वीकार्यः।

केशवमिश्रेण प्रणीता तर्कभाषा न्यायमार्गाऽरोहणे सोपानमिव प्रयुक्ता वर्तते। न्यायदर्शनान्तरगतानि द्वादशप्रमेयानि सन्ति चतुर्थ-प्रमेयस्यार्थः मध्यवैषेशिके द्रव्यादि षड्पदार्थानां परिगणनमेव। न्यायवैषेशिकयोः समन्वय एव तर्कभाषेति दिक्। इत्थं न्यायदर्शनस्य प्रादुर्भावो द्वादशशताब्द्यां बभूव। न्यायदर्शनानुसारं 'सत्' खलु भावपदार्थोऽर्थात् सतः समुद्भावभावनम् अथवा प्रमाणविषयत्त्वञ्च। असत्तु अभाव रूपपदार्थः। असत् भावोऽर्थात् अविद्यमानता अथवा द्विविध-प्रमाणानां विषयत्त्वेन ग्रहणम्।

यथा तत्प्रकृतिर्यदि विपरीताऽभावरूपपदार्थः न स्यात् तदा तत् भावरूप-पदार्थस्य तत्त्वमिति निगद्यते। अर्थात् 'नास्तीति' 'असदिदम्' इति प्रकारेण कथयितुं शक्यते। इत्थमभावरूपज्ञानत्वमेव तस्य अभावरूपत्वम्। एतद्विपरीतं (भावरूपं) न स्यात्तर्हि तत्तस्याऽभावपदार्थस्य तत्त्वं (वास्तविकं रूपम्) इति निगद्यते। अत्रायं प्रश्नस्समुदेति यत् अभावरूपपदार्थस्य उपलब्धिर्ज्ञानप्रमाणेन कथं सिद्धयति, अत्रोच्यते यत्-सद्भावरूपपदार्थस्योपलब्धिग्रहणे एव तस्याऽसत् पदार्थस्य ग्रहणं प्रदीप इव जायते। अतः सत्पदार्थः स्वतन्त्रस्सन् प्रमाणविषयत्वमादधाति, असद्पदार्थोऽपि सतोऽन्तर्गतत्वादुपेक्षितो नैव भवति। अतएव सत्प्रकाशनकालेऽपि असदपि प्रकाशते तथैव यथा-दीपद्वारा घटदर्शन-काले तद्देशवर्तिसमस्तपदार्थो दृश्यन्त एव। पदार्थादिभेदेन प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-निर्णय-तर्क-वाद-जल्प - वितण्डा-हेत्वाभास-छल-जाति-अवयव-निग्रहेति एतेषां षोडशपदार्थानां तत्त्व-ज्ञानेन निश्रेयस् (मीक्ष) प्रासिर्भवतीति दिक्। तत्र तावत्प्रमाणलक्षणं यथा-

प्रमाणम्—

प्रमाकरणम्प्रमाणम्' लक्षणेऽस्मिन् प्रमाणमिति लक्ष्यपदं तथाहि प्रमाकरणमिति लक्षणपदम्। कस्यापि ज्ञानस्य उद्देश्य-लक्षण-

परीक्षाकरणमावश्यकम्। यतोहि शास्त्रप्रवृत्तिरेभिरेव कारणैर्जायते। उद्देश्यं नाम नामनिर्देशः, पदार्थस्य नामनिर्देशे जातेऽपि लक्षण–परीक्षा आवश्यकी। यतोहि कस्यापि पदार्थस्य यथार्थज्ञानमस्मादेव जायते। यद्यपि महर्षिणा गौतमेन प्रमाणसामान्यं लक्षयितुं किमपि सूत्रं नैव समुपस्थापितं यतस्तस्य कथनमस्ति यत् प्रमाणशब्दनिर्वचनादेव तस्यार्थप्रतीतिः।

प्र 'उपसर्गपूर्वकं मा धातुना करणार्थक ल्युट्प्रत्यये सति प्रमाण' मिति पदं यतः सिध्यति ततः प्रमायाः करणम्प्रमाणमिति व्यवस्थितम्। अतएव उपलब्धि ज्ञानमथवा प्रमा तस्याः करणं साधनं प्रमाणमित्युच्यते। इदञ्च प्रमाणं 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानी'ति वचनात् चतुर्विधम्।

प्रत्यक्षम्—

साक्षात्कारिप्रमा प्रत्यक्षमित्युच्यते। अत्र 'स्त्रियाः पुवद्भाषित–पुस्कादनङ्' तथाहि 'सामानाधिकारेः स्त्रियामपूरणी प्रियादिषु' इति सूत्राभ्याम् अनङ्पुंवद्भावश्च भवति। इन्द्रिजन्यैव प्रमा साक्षात्कारिणी नान्या। अक्ष्णा इन्द्रियेण सहितः सन्निकृष्टः साक्षः, अर्थादिन्द्रियसन्निकृष्टः। अभिप्रायोऽयं यत्प्रमोत्पत्ति आत्मन एव जायते। अतः आत्मगतप्रमया वस्तुनो ग्रहणं तदैव भवति यदा इन्द्रियवस्तुनस्सामीप्यं स्यात्, इदञ्च सामीप्यं परम्परानुसारमेव भवेद्यथा–आत्मनो मनसा, मनसा इन्द्रियेण, इन्द्रियस्य वस्तुना सह संयोगो भवति। अनयैव रीत्या वस्तुन इन्द्रियेण, इन्द्रियस्य मनसा, मनसः आत्मना च संयोगेन वस्तु आत्मसामीप्यं व्रजति। अथात्मनि उत्पद्यमानायाः प्रमायाः वस्तुसामीप्यत्वात् तत् ग्रहणे सौकर्यमायाति। प्रत्यक्षप्रमाणविषये न्यायसूत्रवृत्त्यनुसारं–'प्रतिगतमक्षं यस्मै प्रयोजनाय तत् प्रत्यक्षम्' अर्थात् विषयसन्निकृष्टेन्द्रिय इत्यर्थः क्रियते। न्यायभाष्यानुसारम् 'अक्षस्य अक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम्' इति प्रत्यक्षस्य व्युंत्पत्तिर्वर्तते। प्रत्यक्षप्रमा द्विविधा सविकल्पक–निर्विकल्पकज्ञानेन भवति। परन्त्वस्योत्पत्तिर्निर्विकल्पकज्ञानाश्रिता वर्तते। अस्मादेव कारणान्निर्विकल्पकस्य पूर्वविधानम् अथ सविकल्पकस्य पश्चात्। यत्र कस्यापि वस्तुनः नामजात्यादिरहितं ज्ञानं स्वरूपात्मक–

मात्रमेवोत्पद्यते तत्र निर्विकल्पकं ज्ञानम्, 'बालमूकादिविज्ञानसदृशं ज्ञानं निर्विकल्पकम्' इति निर्विकल्पकस्य लक्षणम् एतद्विपरीतं ज्ञानमेव सविकल्पकज्ञानम्।

अनुमानम्—

प्रायशस्सैर्वैरपि दार्शनिकैरनुमानमित्त्थं व्याख्यातम्-'अनुमिति-करणमनुमानम्' इति। न्यायभाष्यानुसारं ज्ञातलिंगद्वारा लिंगिरूपार्थस्य पश्चाद्भावि यज्ज्ञानं तदेवानुमानमिति।[१] नव्यन्यायमते व्याप्तिविशिष्टपक्ष-धर्मताज्ञानात् उत्पद्यमानं ज्ञानमनुमिति तत्करणत्वेन च अनुमानमिति स्वीकृतम्।

उपमानम्—

अप्रसिद्धनामपदार्थे प्रसिद्धनामपदार्थस्य सादृश्यादुत्पद्यमानं ज्ञानमुपमानमिति निगद्यते। य उष्ट्रं न जानाति केनचिद् बोधितस्सन् यदुष्ट्रोऽन्य पशुभ्यो भिन्नः, लम्बग्रीवः, चंचलोष्ठः, पृष्ठात् कच्छ इव, इति सादृश्यज्ञानेन अन्यं पशुं विलोक्य अपि निश्चयं करोति यदयमेव उष्ट्र इति। अनेनानुभवेन सादृश्यज्ञानमिव वैसादृश्य-ज्ञानमपि उपमानप्रमाणं स्वीकार्यम्।

शब्दः—

आप्तवाक्यं शब्दप्रमाणमित्युच्यते। आप्तस्य तात्पर्यं-यथाभूतार्थस्योपदेष्टा। यद्वस्तु यादृशं वर्तते तस्य तथैव ज्ञापकः आप्तः इति। आकांक्षा-योग्यता-सन्निधिवशात्समवेतानि पदानि, यानि केनचित् सदुपदेशकेनोच्चार्यन्ते तानि शब्दप्रमाणत्वं भजन्ते।

.....यथा 'सुरभिचन्दन' वाक्यमिदं केनचित्सदुपदेशकेनोच्चरितं तस्याभि-प्रायश्च वस्तुतः सुगन्धियुतचन्दने वर्तते। अत्र पदान्यपि परस्परं साकाङ्क्षीणि। यतोहि सुरभिपदश्रवणानन्तरं किं सुरभिः ? इत्याकांक्षायाः पूर्तिः चन्दनपदेनैव भवति, तथाहि चन्दनपदश्रवणेन, कीदृशमिति चेत् सुरभिपदेनाकांक्षापूर्तिः। वाक्येऽस्मिन्परस्परमन्वययोग्यार्थप्रतिपादकता

---

१. अनुमानम्-मितेन लिंगेन लिंगिनोऽर्थस्य पश्चान्मानमनुमानम्। न्यायभाष्यं-पृ.८८,
भारतीय दर्शनमें अनुमान, सन्दर्भ-१२२,

वर्तते, चन्दनेन सह सौरभस्य प्रमाणिकसम्बन्धत्वात्। समूहत्वाच्च निःसन्देहं शब्दप्रमाणस्य प्रत्यादेशः।

(२) प्रमेयम्—

अस्यार्थः स विषयो वर्तते यः प्रमया सह सम्बद्धः स्यात्तथा येन मानवः निश्रेयसमवाप्नुयात्। प्रमेयशब्देन तेषां पदार्थानां ग्रहणमस्ति येनासौ संसारसागरस्तरंगायते येषां तत्वज्ञानाच्चासौ पुनश्शुष्यत्यपि। प्रमेयानीमानि द्वादशसंख्याकानि यानि खलु महर्षिणा गौतमेन न्यायदर्शनप्रथमाह्निकस्य नवमसूत्रे ग्रथितानि तानि यथा–आत्मा–शरीर–इन्द्रिय–अर्थ–बुद्धि–मन–प्रवृत्ति–दोष–प्रेत्यभाव–फल–दुःख अपवर्गाश्च।

एषु समस्तप्रमेयेषु प्रधानत्वेन आत्मनो ग्रहणम्, असावेव मिथ्याज्ञानद्वारा बध्नाति तथाहि तत्त्वज्ञानेन मुच्यते। 'आत्मत्वं सामान्यम्' इति आत्मनो लक्षणम्। अर्थात् आत्मत्वजात्याश्रितः आत्मेति। अयमात्मा प्रत्येकं शरीरे भिन्नः,नित्यः, व्यापकः, देहेन्द्रियादिविलक्षणः, मनसा मात्रगोचरो भवति यतोहि प्रत्येकं मनुष्यः आत्मनोऽस्तित्वं मनसाऽनुमन्नहं गच्छामि, अहं जानामीत्यादीनि वाक्यानि प्रयुंक्ते। अनेके विद्वान्सः आत्मानं प्रत्यक्षगम्यं न मत्वाऽनुमानगमयम्मन्यन्ते। तेषामनुसारं बुद्धि–सुख–दुःख–इच्छा–द्वेषगुणादयः प्रत्यक्षसिद्धाः वर्तन्तेऽत्र नास्ति कश्चन सन्देहः, अतएव एभ्यो गुणरूपलिंगेभ्यः आश्रयत्वेन भिन्न आत्माऽनुमानगम्य एव। इदमित्थं विचारयामो–

(१) बुद्ध्यादयो गुणाः, प्रतिज्ञा

(२) अनित्यत्वादपि इन्द्रियत्वात्–हेतुः,

(३) यथा रूपादयोऽनित्या अपि चक्षुरसनाघ्राणत्वक्–श्रोत्ररूपैकेन्द्रियमात्रेणैव ग्राह्या- उदाहरणम्,

(४) तथा बुद्ध्यादयोऽप्यनित्या मनः इन्द्रियग्राह्याः–उपनय

(५) अतो यथा रूपादयस्तथैव बुद्ध्यादयोऽपि गुणाः–निगमन,

(३) संशयः—

एकस्मिन्धर्मिणि परस्परं विरुद्धानामनेकधर्माणामवमर्शः संशयः इत्युच्यते। यथा किमयं स्थाणुर्वा पुरुषो वेति?।

(४) प्रयोजनम्—

तत्त्वतो ज्ञातव्येषु षोडशपदार्थेषु प्रयोजनश्चतुर्थः पदार्थः। प्रयुज्यते प्रवर्ततेऽनेनेति प्रयोजनमिति व्युत्पत्यनुसारं प्रयोजनस्यार्थः प्रवर्तक इति। येन प्रेरितस्सन् मनुष्यो जगतः विभिन्नेषु कर्मसु प्रवृत्तो भवति तन्प्रयोजनमिति कथ्यते। समस्त-प्राणिवर्गस्य प्रवृत्तिः सुखप्राप्तौ दुःखनिवृत्तौं च भवति, एतस्य प्रयोजनस्य सिद्धये प्रयत्नशीलस्तिष्ठति। अस्य महनीयपदार्थस्य प्रभावः समस्ते जगति वर्तते। विषयेऽस्मिन्भाष्यकारवात्स्यायनस्य मतमिदम्—

'येन प्रयुक्तः, प्रवर्तते तत्प्रयोजनम्' यमर्थमभीप्सन् जीहीर्षन् वा कर्मारभते तेनानेन सर्वे प्राणिनः सर्वाणि कर्माणि सर्वाश्च विद्या व्याप्ताः तदाश्रयश्च न्यायः प्रवर्तते'। इति।

(५) दृष्टान्तः—

षोडशपदार्थेषु पञ्चमोऽयं पदार्थः। योऽर्थः वादिप्रतिवादिनोर्मध्ये समानरूपेण मान्यो भवेत् सोऽर्थः दृष्टान्त इति निगद्यते यथा— 'शब्दोऽनित्यः उत्पत्तिमत्त्वाद् घटादिवत्'। अयं दृष्टान्तः साधर्म्य-वैधर्म्याभ्यां द्विविधः। एतावेव क्रमेण अन्वयव्यतिरेकि दृष्टान्तावपि कथ्येते।

(६) सिद्धान्तः—

योऽर्थः प्रामाणिकरूपेण स्वीकृतः स एव सिद्धान्त इति प्रसिद्धम्। सर्वतन्त्र-प्रतितन्त्र-अधिकरण-अभ्युपगभेदेनास्य चत्वारो भेदाः स्वीकृताः।

(७) अवयवः—

सप्तमोऽयं पदार्थः। अनुमानवाक्यचैको भागः। अनुमानवाक्यं न्यायवाक्यमपि कथ्यते। न्यायस्यावयवभूतानि पञ्चवाक्यानि वर्तन्ते यानि- प्रतिज्ञाहेतूदाहरणणोपनयनिगमनत्वेनाख्यातानि।

(८) तर्कः—

अनिष्टप्रसङ्गस्तर्क इत्युच्यते, योऽसौ न्यायस्य षोडशपदार्थेष्वष्टमो पदार्थः। यद्यपि तर्कः स्वयं प्रामाण्यं नाऽदधाति किन्त्वन्यप्रमाणानां

सहयोगीत्वेन अवश्यं परिकल्प्यते। यथा-'पर्वतोऽयं वह्निविहीनः' इमाम्मान्यतां सिद्धयितुं तर्काश्रयः स्वीक्रियते। यदि पर्वतो बह्निविहीनो भवेत्तदात्र धूमहीनतापि भवेदतो वह्निविहीनत्वेन पर्वते धूमहीनत्वापत्तिस्तर्केति कथयिष्यते।

(९) निर्णयः—

अवधारणात्मकं ज्ञानं निर्णय इति निगद्यते। इदमेव प्रमाणानां फलम् अथवा प्रमाणैरेव अयं सिद्ध्यति उत्पद्यते वेति।

(१०) वादः—

तत्त्वजिज्ञासया कस्यापि विषयस्य विचारचर्चा वाद इति संज्ञां प्राप्नोति। गुरुशिष्ययोर्मध्येऽस्य व्यवहारः, तथाहि वादेऽस्मिन् यत्किमपि कथ्यते श्रूयते उपस्थाप्यते वा तत्सर्व्वं प्रमाणपुरस्सरमेव।

(११) जल्पः—

विजयकामनया कृता चर्चा जल्प इति प्रचक्षते। अत्र पक्षप्रतिपक्षयोः साधनं विधीयते।

(१२) वितण्डा—

न्यायशास्त्रे परिगणितानां षोडशपदार्थानामन्तः वितण्डा नाम द्वादशः पदार्थः। परपक्षस्य खण्डनमेव वितण्डापदार्थस्यार्थः।

(१३) हेत्वाभासः—

अनुमाननिरूपणे हेतोरनुमापकतासम्पादकानि पञ्चतत्त्वानि, यानि च पक्षसत्त्वसपक्षसत्त्वविपक्षसत्त्वाऽबाधितसाध्यकत्त्वाऽसत्प्रतिपक्षत्वेन बहुशः न्यायशास्त्रे व्याख्यातान्येव। एषु कस्याप्येकस्यानुपस्थितित्वादनुमानमहेतुकञ्जायते। अहेतुकमपि कतिपयरूपैर्युक्तत्वाद्धेतोः, हेतुरिवाभासते। अयमेव हेत्वाभास इति निगद्यते। अयमसिद्धविरुद्धानैकान्तिकव्यभिचारिप्रकरणसमभेदात्पञ्चधा।

(१४) छलम्—

वचनविघातोऽर्थविकल्पोपपत्या छलम्। अर्थभेदमादाय वादिनो वचनखण्डनमेव छलम्। सूत्रकारः इदं त्रिविधं निरूपयामास। वाक्छलम् सामान्यछलम् उपचारछलमिति भेदात्।

(१५) जातिः—

असदुत्तरं नाम जातिः। साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानञ्जातिः। इयमुत्कर्षापकर्षसमादिभेदेभ्यश्चतुर्विंशति-प्रकारा।

(१६) निग्रहस्थानम्—

पराजयस्य स्थितिर्निग्रहस्थानमित्युच्यतेऽर्थात् पराजयहेतुः निग्रह-स्थानम्। इदमपि बहुविधं भवति।

इत्थमेते निश्रेयस् (मोक्ष) सिद्धये न्यायशास्त्रविद्भिः बहुशो व्याख्याताः आख्याताश्च षोडशपदार्थाः, येषां तत्त्वज्ञानान्नूनं निश्रेयस्-सिद्धिरादिमेनैव न्यायप्रणेत्रा गौतमेन प्रतिज्ञायि। अधुना बौद्धतर्क-भाषामादाय बौद्धैः कृतं सतः स्वरूपनिर्धारणं प्रमाणादिविषये तेषां दृष्टिकोणञ्चोपस्थापयामः।

बौद्धतर्कभाषा, माध्यमिक-बौद्धकालं निर्माति, बौद्धदर्शनक्षेत्रे च कामपि समुल्लेखनीयां विशिष्टतां प्रस्तौति।[१] भारतीयं बौद्धमतैतिह्यं कालत्रये विभाजयामो यत् बौद्धैरपि स्वीकृतमस्ति। इदं कालत्रयमपि धर्मस्य त्रीणि चक्राणीव स्वीकुर्वन्ति बौद्धाः। एषु सर्वेष्वपि केन्द्रीयसत्तारूपेण बौद्धमतास्तित्वं गतिशीलत्वं निर्लिप्तप्रवाहत्वञ्च स्थापितमस्ति, परन्तु ईसाप्रथमशताब्द्यां, पञ्चमशताब्द्याञ्चेत्थं परिवर्तनमजायत यत्प्रत्येकं कालस्य नवानवा केन्द्रीयधारणा समुत्पद्यते।

यदि अस्माभिरिदं स्वीक्रियेत यत् बौद्धतर्कस्यास्तित्त्वं १५०० वर्षाण्यावदतिष्ठत्तदा अस्याः अवधेः कालत्रयविभाजनेन प्रत्येकं भागः ५०० वर्षात्मको भविष्यति। अत्रादौ प्रथमद्वितीयकालयोर्विभाजनसम्बद्धाः कृतयो विवेच्यन्तें—

बौद्धेषु श्रेणिविभागः प्राय इत्थं कृतः—

वैभाषिकः	वाह्यप्रत्यक्षवादः
सौत्रान्तिकः	वाह्यार्थानुमेयवादः
योगाचारः	विज्ञानवादः
माध्यमिकः	शून्यवादः

वैभाषिकसिद्धान्तः—

वैभाषिकानां कथनमस्ति यद्यैर्वस्तुभिरस्माकञ्जीवनमस्ति तस्य सत्यता स्वयमेव स्फुटा। एते वाह्यार्थमेव प्रत्यक्षरूपेण सत्यम्मन्यन्ते।

सौत्रान्तिकसिद्धान्तः—

एतेषां कथनमस्ति यद्वाह्यार्थस्य सत्ताऽनुमानाश्रिता भवतीति, यतोहि वाह्यवस्तुनः प्रत्यक्षं ज्ञानं नैव भवति। यदा समे पदार्था क्षणिकास्तदा कस्यापि वस्तुनः प्रत्यक्षज्ञानमसम्भवमेव। यथा-दर्पणं विलोक्य बिम्बसत्तानुमानं कुर्मस्तथैव चित्तपटस्य प्रतिबिम्बैरेतत् प्रतीयते यद्वाह्यार्थस्यापि सत्ता वर्तत एव।

योगाचारसिद्धान्तः—

एतेषामनुसारं वाह्यं जगन्नितान्तं मिथ्या, यतोह्येते प्रतिबिम्बद्वारा बिम्बसत्तां नैव स्वीकुर्वन्ति। एतेषां मते चित्तमात्रं सत्ता यस्य बहुविधान्नाभासान्वयं जगदिति नाम्नाऽऽकारयामः। इदमेव चित्तविज्ञानम्।

शून्यवादः—

सत्ताविषयकमिदं चतुर्थम्मतम्। एते इत्थं निगदन्ति यथा वाह्यार्थोऽसत्तथा विज्ञानमपि। शून्यमेव परमार्थः, जगतः सत्ता व्यावहारिकी तथाहि शून्यसत्ता च पारमार्थिकी।

एतेषाम्मतसिद्धान्तानामेकत्र वर्णनं यथा—

मुख्यो माध्यमिको विवर्तमखिलं शून्यस्य मेने जगत्-
योगाचारमते तु सन्ति मतयस्तासां विवर्तोऽखिलः।
अर्थोऽस्ति क्षणिकस्त्वसानुममितो बुद्ध्येति सौत्रान्तिकः-
प्रत्यक्षं क्षणभंगुरञ्च सकलं वैभाषिको भाषते॥

एषु वैभाषिको हीनयानेन तथाहि अन्ये त्रयोऽपि महायानेन सम्बद्धास्सन्ति। एते त्रयोऽपि सत्ताविषयकं भिन्नभिन्नं मतमुपस्थापयन्तोऽपि महायानस्य सामान्यमतं स्वीकुर्वन्त्येव।

बौद्धतर्कस्याऽभ्युदयकालः विक्रमपूर्वं पञ्चशताब्दीतः आरभ्य

---

१. आन्त्यधर्म चक्रपरिवर्तन,

दशमशताब्दीं यावत् मन्यते। इयमवधिः १५०० वर्षात्मिका, प्रथमकालविभागस्य प्रधानसिद्धान्तः "पुद्गलनैरात्म्यम्" "आत्म-निषेधः" इति वर्तते यत्र वाह्याऽयतनसत्तायाः निषेधो विहितः। इदञ्जगत् सत्ताविहीनं क्षणिकं सन्तानमात्रञ्चास्ति। अयं बौद्धतर्कस्यादिकालो वर्तते यस्यारम्भो मानवव्यक्तित्वनिर्मातृणां त्रिभिन्नतर्काणां सूक्ष्मविश्लेषणेन अभवत्। अस्य विश्लेशणस्य मुख्याधारो नैतिकता एव यतोह्यस्य परिकल्पना मोक्षकल्पना रूपेणाथवा निरोधावस्थरूपेण च कृता। अतएव आरम्भिकबौद्धतर्कान्नाश्रित्यादौ अनात्मवाद एव प्रतिष्ठापितः, यस्यान्तर्गतस्सः धर्मोऽन्विष्टः यः खलु प्रत्येकं जनस्य तले स्थितः निरपेक्ष आधारभूत[1]श्चासीत् परन्तु सामान्यतया कस्यापि निर्धारणं नाभूत्। अतएवेदं स्वीकृतं यन्न किमपि आत्मतत्त्वं[2] व्यक्तित्वं[3] वर्तते अपितु तथा-कथितव्यक्तित्वं सततपरिवर्तनशील-धर्माणां समुदायेन निर्मितम्। विकसित-बौद्धतर्के वाह्याऽयतनस्यापि[4] महत्त्वमङ्गीकृतं वर्तते। बौद्धमतेभ्यः पूर्ववर्तीनि मतानि अपि ऐन्द्रिकविषयं सुसंहृतं वस्त्वात्मकं नित्यं तत्त्वप्रधानं परिवर्तनशीलञ्चाभिव्यञ्जयन्ति। स्वीये विकसितस्वरूपे बौद्धमतावलम्बिभिरयं सिद्धान्तः परित्यक्त एव। तत्र भौतिकतत्त्वान्यपि तथैव परिवर्तनशीलानि अनित्यानि प्रवाहमानानि चामन्यन्त यथा मानसिकानि मन्यन्ते स्म। सिद्धान्तस्यास्यानुसारञ्जगतः कश्चन्नपि पदार्थः स्थायी नास्ति, सर्व्वं पृथक् सत् विनैव केनापि तत्त्वेन कार्यसाधकशक्तेः स्फुरणमात्रमस्ति। इतोऽपि विकसितावस्थायां हेतुवादसिद्धान्तः प्रादुर्भूतः, यतोहि संस्कारः कदापि एकाकी न अपितु हेतुप्रत्ययव्यवस्थानुसारं परस्परमन्योऽन्यदशायामेव क्रियाशीलतां व्रजति अतएव अयं सहसंस्कृत-धर्मः संस्कारो वा अकथ्यत। उद्दिष्टमभीष्टञ्चास्य[5] निर्वाणमासीत्।

---

१. चित्तमहाभूमिका धर्माः,

२. अनात्मवादः,

३. पुद्गलो नास्ति अनात्मत्वनैरात्म्यपुद्गलशून्यता,

४. अत्र षड्भिरिन्द्रियैस्सर्व वाह्यं विलोक्यते,

५. चत्वार्य-सत्यानि, आर्यस्य बुद्धस्य तत्त्वानि,

यस्याशयः जीवनस्य प्रत्येकं लक्ष्यस्य चिरन्तनशान्तिः धर्मकायस्य निष्क्रिया अवस्था चासीद्यत्र सर्वे धर्माः स्वसमस्तसंस्कारगतशक्त्या रहितास्सन्तश्चिरन्तनीं शान्तिं भजन्ते।

बौद्धतर्कस्य द्वितीयकालीनं सत्स्वरूपम्—

बौद्धतर्कस्य द्वितीयकालविभागः विक्रमस्य प्रथमशताब्दीतः पञ्चमशताब्दीं यावन्मन्यते यस्मिन् शून्यवादस्य प्रादुर्भावोऽजायत, यतोहि पुद्गलनैरात्म्यस्थाने धर्म-नैरात्म्यव्यवस्था विहिता। व्यक्तिगतकल्याणस्थाने विश्वकल्याणव्यवस्था कल्पिता। शून्यवादेऽङ्गीकृतमेतद्यत् जगतस्सत्ता नितान्तं मिथ्या नैव, यतः तत्सत्ताऽऽभासो भवत्येव। आर्यसत्यस्थाने साम्वृत्तिक-पारमार्थिकयोः कल्पनं युगस्यास्य महत्त्वपूर्णं तथ्यम्। वैभाषिकानां बहुत्त्ववादस्थानेऽद्वैतवादसिद्धान्तः स्थापितस्तदानीं रहस्य-वादं प्रत्यपि विदुषां विशिष्टमाकर्षणमासीत्। अस्मादेव कारणाद्युगेऽस्मिन् तर्कबुद्धेः महती आलोचना कृता। अस्मिन्नेव काले च मानवबुद्धस्थाने लोकोत्तरबुद्धपरिकल्पना कल्पिता। पुरातनबौद्धतर्के केवलं सत्यमेव स्वीक्रियते, परन्तु नवीनबौद्धतर्के तस्य चरमसत्यस्य स्वीकृतिर्नास्ति। इत्थं नवीनबौद्धतर्कः सर्व तत्त्वं सम्पूर्णतायां विलीय वास्तविकहेतु-वादनिराकरणं कुरुते। एतदनुसारमनुभूतवास्तविकता चरमवास्तविकतायाः प्रतिवादात्मिका, इत्थं संवृत्तिसत्य सांवृत्तसत्ये चाऽजायेताम्। एकः वास्तविकतायाः भ्रान्तिमान् पक्षोऽपरस्तु वास्तविकताया स्वरूपपक्षः।

सत्यज्ञानोपलब्धिरहतयौगिकज्ञानञ्च तैर्नवीनबौद्धग्रन्थैरुद्घाटितं ज्ञानमस्ति यत्र जगत एकतत्त्वात्मकदृष्टिकोण एवाद्वितीयवस्तुत्त्वेन प्रस्तूयते, अतएव समस्तन्यायशास्त्रस्य बौद्धदर्शनधारणायाश्च चतुर्विधसत्यानां विरोधित्वान् महती भर्त्सना कृता वर्तते।

बौद्धतर्कस्य तृतीयकालीनं सत्स्वरूपम्—

बौद्धतर्कस्य तृतीयविकासकालः विक्रमस्य पञ्चमशताब्दीतः दशमशताब्दी यावद्वर्तते। तर्कविद्याया उन्नतिर्युगस्यास्य महदवदानम्।

युगेऽस्मिन् सत्स्वरूपनिर्धारणे शून्यवादं दोषमयं स्वीकृत्य विज्ञानवादत्वेनाङ्गीकृतः। विषयगतप्रत्ययवादसिद्धान्तस्सर्वैरपि विद्वद्भि-रङ्गीकृतः। तर्काऽधारे सत्स्वरूपं विज्ञानवादत्वेनोपस्थापनस्य श्रेयः आचार्य-असंगवसुबन्धोरेव वर्तते, आभ्यां द्वाभ्यामपि सत्स्वरूपस्य कश्चिन्नवीनः पन्थाः प्रदर्शितस्तथाहि बौद्धदर्शनस्य च प्राग्वर्तीनि सर्वाणि सैद्धान्तिकस्वरूपाण्याक्रान्तानि।

'अहं विचारयामि अतएवाहमस्मि' इति स्वसंवेदनस्य एकं भारतीयं रूपमासीद्यतोह्यस्माभिर्यदि एतदेवाऽस्वीक्रियते चेत् चेतनाऽपि अस्वीकरणीया भवेत्, पुनः सम्पूर्णं जगदन्धत्वावस्थां परिणेष्यति। यतोहि रूपं विलोक्यैव मूलात्त्वादीनां ज्ञानञ्जायते, अतएव स्वसंवेदनं ज्ञानस्यैकं स्वरूपमस्ति। स्वसंवेदनद्वारा माध्यमिकानामतिसंशयवादोऽपि खण्डितोऽस्ति। तृतीयकाले बौद्धदर्शनमादर्शवादिरवमङ्गीचकार। तत्र सापेक्ष-निरपेक्ष-भेदाभ्यां द्वे वास्तविके स्वीकृते, यद्बौद्धतर्कभाषा स्वपृष्ठभूमौ समस्तान्विचारान् अवास्तविकत्त्वेन शून्यत्त्वेन च स्वीकृतवती आसीत्। यदा बौद्धतार्किककैर्न्यायशास्त्रमधीतन्तदा विविधाः विसङ्गतयः स्वीय एव शास्त्रे दृष्टिगोचरतां प्रयाताः। परन्तु तेषु ससदार्शनिकमतानि विभिन्नावस्थानिर्माणे समर्थकत्त्वेन निषेधकत्त्वेन च स्वपक्षं समुपस्थाप-यन्ति तानि यथा-भौतिकवादमतम्, जैनदर्शनम्, सांख्यस्य सृष्टिवादः, योगरहस्यवादः, वेदान्तैकत्त्ववादः, आस्तिकमीमांसकानां यथार्थ-वादस्तथाहि न्याय वैशेषिकयोर्यथार्थवादश्च। न्यायसम्प्रदायस्याधार-भूतगौतमन्यायसूत्रे मिश्रितवादस्य तर्कशास्त्रसम्बन्धिनः केचन्नियमाः समुल्लिखिताः येषां तर्कशास्त्रीयाँशः अनुमानपरार्थानुमानाभ्यां सम्बद्धः। सत्त्वमीमांसापद्धतिः सहयोगिसम्प्रदायसूत्रेषु निहिताऽऽसीत्।

बौद्धमते प्रमाणस्वरूपं तद्भेदाश्च—

बौद्धानां प्रमाणपाटवमत्यन्तं प्रसिद्धं, यतोहि ते प्रमेयाणां वस्तुसत्ताम-स्वीकृत्यापि प्रमाणव्यवस्थापनं कुर्वन्ति। तेषां दृष्टौ प्रमाणव्यवस्था विशुद्धरूपेण ज्ञानक्षेत्रीयसमस्या, अतएव ते स्वोत्कर्षे

वाह्यप्रमेयसत्तावादं बाधकत्त्वेनैव मन्यन्ते। आचार्यधर्मकीर्तिना स्वप्रसिद्ध 'प्रमाणवार्तिक' ग्रन्थे बौद्धप्रमाणमीमांसासम्बन्धः बुद्धवचनैः संस्थापितः। एतत् स्वीकुर्वता तेन—

यत्किञ्चिदुदयधर्मकं तत्सर्वं निरोधधर्मकम् इत्यभाणि। भगवता बुद्धेन स्वयमपि समसामायिकमतानाम्महती आलोचना कृता वर्तते। स्वानुयायिनस्तदर्थमेव तेन प्रेरिताः यत्ते प्रमाणसत्तां सिद्धयन्तोऽन्यमतानि खण्डयेयुरिति–यथा वा–'न तावाहं पापिम परिनिव्वायिस्सामि यावं मे मिक्खु... उत्पन्नं परप्पवादं सहधम्मेन सन्निगहितम्' निग्गहेतवा सप्परिहारियं धम्मं देसेस्सन्तीति'। अस्यायमाशयो यत् यावद् भिक्षवस्तर्केण युक्तया वा प्रतिपक्षिणां प्रश्नान् नहि उत्तरयन्ति स्वीयं पक्षं प्रबलतया नोपस्थापयन्ति तावत्तेषां निर्वाणलाभोऽसम्भव एव। बौद्धतार्किकैः प्रमाणशास्त्रं विशेषतया ध्यातमस्ति यतोहि ब्राह्मणतार्किका इव बौद्धा अपि ज्ञानप्राप्तिद्वारा निर्वाणसम्भावनमिति ज्ञानन्ति स्म यथा वा 'ऋते ज्ञानान्न मुक्तिरिति तैरधिगततमासीत्। अविद्या एव समस्ताऽनर्थानां मूलकारणं, तस्याः परित्यागश्च विशुद्ध ज्ञानप्राप्तैव सम्भवति। प्रमाणव्यवस्था अस्यैव प्रयासस्य फलमासीदतः आदौ प्रणामव्यवस्थामेव विवेचयामः।

प्रमाणम्—

प्रमाणं[1] नाम तज्ज्ञानं यदाऽज्ञातार्थं प्रकाशयति तथाहि वस्तुस्थितिश्च नोल्लङ्घयते। अतः प्रमाणमविसंवादि। यज्ज्ञानं कल्पनामाश्रित्य तिष्ठति तद्विसंवादी त्युच्यते।[2] अर्थक्रियावलम्बितं ज्ञानमविसंवादीति।[3] प्रमाणविषये बौद्धानां विलक्षणमेव मतं यतोहि ते प्रत्यक्षानुमानत्वेन द्वे एव प्रमाणे स्वीकुर्वन्ति।

---

१. प्रमाणमविसंवादी ज्ञानमर्थक्रियास्थितिः।
अविसंवादनं शाब्देऽप्यभिप्रायनिवेदनात्॥ प्रमाणवार्तिकम् २-१,

२. प्रमाण्यं व्यवहारेण शास्त्रं मोहनिर्वर्तनम्। ", २-४,

३. मानं द्विविधं विषयद्वैविध्यात् शक्तशक्यतः।
अर्थक्रियायां केशादिर्नार्थोऽनर्थादिमोक्षतः॥ प्र.वा., ३-१,

वस्तुनस्तत्स्वरूपं यच्छब्दादिश्रवणं विनैव गृह्यते, पदार्थश्च पृथक-पृथक् सत्तात्त्वे नाङ्गीक्रियते। अनेकवस्तुभिस्सह गृहीतवस्तुनः सामान्यरूपं प्रत्यक्षविषयत्वं व्रजति, तत्र च केवलं कल्पनाप्रयोग एव। द्वितीयं सामान्यलक्षणमनुमानविषयत्वं भजति। प्रथममर्थक्रियाकरणे समर्थं, द्वितीयमसमर्थञ्चेति।

प्रत्यक्षम्—

कल्पनारहितनिर्भ्रान्तज्ञानत्वमेव प्रत्यक्षस्य प्राथमिकस्वरूपम्। असङ्ग-दिङ्नाग धर्मकीर्तिप्रभृतिभिराचार्यैः प्रत्यक्षस्य एकमेव लक्षणं मन्यते तद्यथा-'प्रत्यक्षं कल्पनापोढ़ं नामजात्याद्यसंयुतम्' इति। इदं नाम प्रत्यक्षम्-इन्द्रिय-मानस-स्वसंवेदन-योगिभेदाच्चतुर्विधम्। इन्द्रियद्वारा वस्तुलक्षणज्ञानं भवति तथाहि इन्द्रियज्ञानादुत्पन्नं ज्ञानं मानसं, निर्विकल्पकज्ञानमेव स्वसंवेदनम्, चित्तैकाग्रतया समुत्पन्नं योगीति इमान्येव चतुर्विधप्रत्यक्षप्रमाणानि।

अनुमानम्—

प्रमाणस्य द्वितीयो नाम भेदोऽनुमानम् अनुमानप्रयोजनं निगदताऽऽचार्यधर्मकीर्तिनाऽभाणि यद्वस्तुनो यन्निजस्वरूपं वर्तते तदर्थं कल्पनारहितं प्रत्यक्षमपेक्षते परन्त्वन्यवस्तुभिस्सह समानत्वकारणेन यत्सामान्यरूपं वर्तते तद्ग्रहणं कल्पनातिरतिरिक्तेन केनचिदन्यवस्तुना नैव सम्भवत्यतएवानुमानमङ्गीकार्यम्। कस्यापि सम्बन्धिना धर्मेण धर्मिविषयकं यत् परोक्षज्ञानं भवति तदेवानुमानमिति निगद्यते। अनुमानमेतत्सदैव व्याप्त्याऽश्रितं भवति। स्वार्थपरार्थभेदेनेदं द्विविधम्। केनापि हेतुना कस्यचित्साध्यस्य स्वविषयकं ज्ञानं स्वार्थानुमानमिति तथाहि त्र्यावयववाक्येनान्यविषयकं ज्ञानं परार्थानुमानमित्युच्यते।

जैनतर्कमाश्रित्य सत्स्वरूपनिर्धारणं प्रमाणादिव्यवस्था विवेचनश्च—

जैनतर्कोद्गमो दृष्टिवादे निहितो यथा-उत्पादः, आगायणीयः, वीर्यानुप्रवादः, अस्ति-नास्तिप्रवादः, ज्ञानप्रवादः, सत्यप्रवादः, आत्मप्रवादः, कर्मप्रवादः, प्रत्याख्यानप्रवादः, विद्यानुवादश्चेति।

दिगम्बरपरम्परानुसारं वर्तमानं यच्छ्रुतप्राप्तं तत्सर्वमपि दृष्टिपरम्पराया अंशः। आचार्यभूतबलिपुष्पदन्तकृतषड्षण्डागमे[1] यो दृष्टिवादोऽसावपि अयज्जता दव्वमाणेण केवणिया (असंखेजा)[2] यथा स्याच्छब्दं प्रश्नोत्तर-शैलीञ्चाऽधारीकृत्य यानि प्रचुरवाक्यानि प्राप्यन्ते तान्येव तर्कस्य प्रारम्भिकविन्दवस्तस्मादेव तस्योत्पत्तिर्जायते। षड्षण्डागमाधारे रचितेषु कुन्दकुन्दाचार्यस्य पञ्चास्तिकाय-प्रवचनसारादिग्रन्थेषु आर्षग्रन्थेषु[3] चोद्गमबीजानि प्राप्यन्ते। इत्थमेतत् प्रतीयते यज्जैनतर्कोद्भवो दृष्टिवादाङ्गादेव श्रुतः। दृष्टिवादस्य यत्स्वरूपं निर्धारितं तेनाप्यस्य पुष्टिर्जायते। तत्र विविधदृष्टिवादैः मान्यताप्ररूपणं समीक्षणञ्च जायते। एतत्तदैव सम्भवति यदा हेतवो युक्तयश्च सहयोगित्वेनोपस्थाप्यन्ते। आचार्ययशोविजयेन स्पष्टं लिखितं यत्—

"स्याद्वादार्थो दृष्टिवादार्णवोत्त्थः" इति। आचार्यसमन्तभद्रेण सर्वे तीर्थङ्कराः स्याद्वादिनस्तत्प्रतिपादकाश्चाऽमन्यन्त। अत्रायं प्रश्नस्समुदेति यत्किं जैनतर्कोत्पत्तिः ब्राह्मणबौद्धतर्काभ्यामजायत परन्त्वेतन्नैव समुचितं प्रतिभाति। यतोहि दृष्टिवादः बौद्धजैनतर्केभ्यः एव श्रुतोऽस्ति, अतो जैनतर्कस्योदयस्तु दृष्टिवादादेव मन्तव्यः। अपरञ्च वैदिकतर्के ब्राह्मणतर्के स्याद्वादस्य समर्थनं नापितु तस्य मीमांसा वर्तते। अनेनेदं निश्चीयते यज्जैनतर्कोदयः दृष्टिवादश्रुतादेवाऽजायत। आचार्यसिद्धसेन[4]-अकलंक[5]-विद्यानन्द[6]प्रभृतय इदमेव स्वीकुर्वन्ति। अकलंकदेवेन स्व "न्याय-विनिश्चय" ग्रन्थे इदमभाणि यद्गुणद्वेषितार्किकाः स्वदुर्बुद्ध्या अज्ञानेन स्वच्छन्यायशास्त्रसरः मलिनयन्ति। अनेनेदमपि ज्ञायते यज्जैनतर्कः वैदिकबौद्धयोः पूर्ववर्ती अस्ति यश्च मलिनीकृतः यस्य च मालिन्यम-

---

१. षड्षण्डागम - १-१-७९. ध.व.कु. २११,

२. षड्षण्डागम - १-२-५०, पृ. ३, पृ. २६२,

३. पञ्चास्तिकाय - १४-१३,

४. द्वात्रिंशिका - पृ. १-३०, ४/१५॥

५. तत्त्वार्थवार्तिकं, पृ. २९५

६. अष्टसाहस्री, पृ. २३८,

कलंकदेवेनापसारितम्। अतः जैनतर्कारम्भो दृष्टिवादाज्जात इति निश्चितम्। एते त्रयोऽपि आचार्याः समकालीनाः प्रतीयन्ते अतएव एतेषामादानप्रदानं स्वाभाविकमेव।

जैनतर्कविकासः—

कालदृष्ट्या जैनतर्कविकासस्त्रिषु भागेषु विभज्यते—

१. आदिकालोऽथवा समन्तभद्रकालः

(ई. २०० तः ई. ६५० यावत्)

२. मध्यकालोऽथवा अकलंककालः

(ई. ६५० तः ई. १०५० यावत्)

३. उत्तरकालोऽथवा प्रभाचन्द्रकालः

(ई. १०५० तः ई. १६०० यावत्)

आदिकालः—

कालेऽस्मिन्तर्कस्य स्वरूपं केवलमागमिकमासीत्। स्याद्वादोऽपि आगमिकत्वेन ख्यात आसीत्। कालेऽस्मिन्विशेषयुक्तिवादं नादाय आगमिकतत्त्वानामेव विवेचनं क्रियते स्म, किन्तु समन्तभद्रकाले दार्शनिकक्रान्तिकारणेन युक्तिवादस्यावश्यकतानुभूता, यस्य परिणाम-स्वरूपं खण्डनमण्डनप्रणालिराविर्भूता। कालेऽस्मिन्दार्शनिकवादविवादे विरोधिपक्षान्सम्यगधीत्य निष्पक्षदृष्ट्या स्याद्वादद्वारा उभयोस्सामञ्जस्यं स्थापयति स्म समन्तभद्रः, तेन "नययोगन्नसर्वथा[1]" "नयेर्नय-विशारदः[2]"-आदि-पदद्वारा सप्तभंगीभिर्वस्तुव्यवस्थाव्यवस्थापनं ज्ञापितं तथाहि "कथञ्चिते सदेवेष्टम्[3]" सदैव सर्वं को नेच्छेत् स्वरूपादिचतुष्टयात्-प्रभृतिभिर्वचनैस्तद्विधानं व्यवहृतञ्च। तेन प्रमाणनय-सप्तभंगीस्याद्वाद्हेतु - प्रमाणफलव्यवस्था - वस्तुस्वरूपसर्वज्ञसिद्धि-प्रभृति जैनन्यायास्यांगप्रत्यंगानां प्रतिपादनं कृतं यच्च तस्मात्पूर्वं न

---

१. आप्तमी. पृ. १४,

२. तत्रैव पृ. २३,

३. आप्तमी का. पृ. १४

जातमासीत्। अतएवायं जैनन्यायस्यादिकाल उच्यते तथाहि समन्तभद्र-कालत्वेन संबोध्यते वा।

मध्यकाल:—

समन्तभद्रकाले जैनन्यायस्य या उत्तमा पृष्ठभूमिस्तस्यामेव तर्कवादी अकलंकदेव: प्रादुर्भूत:। युगेऽस्मिन्परपक्ष: असद् आह्वानेन पराजयते स्म। अन्येऽपि तथैव सिद्धान्तास्तुच्छा इव मत्वा तिरस्क्रियन्ते स्म। कालेऽस्मिन्नेव क्षणिकवाद-शून्यवाद-विज्ञान-वादादिपक्षाणां समर्थनं विधाय तर्कस्योपहासोऽप्यजायत। स्याद्वाद्सिद्धान्तस्य सम्यङ्नावबोधनेन वैदिक-विद्वद्भि: पक्षाग्रही दृष्टिरेवसमर्थिता। अतएवाचार्याकलङ्कदेवेन महत्त्वपूर्णं कार्यद्वयं सम्पादितम्। प्रथमं स्याद्वादन्याये समारोपितदोषाणां निराकरणं तथाहि द्वितीयञ्च बहुविधं नूतनतर्कसाहित्यनिर्माणम्। तेन न्यायशास्त्रमधिकृत्य सोपज्ञवृत्तिसहितन्यायविनिश्चय-सिद्धिविनिश्चय-प्रमाणसंग्रह-लघीस्त्रयेति चत्वार: कारिकात्मकग्रन्था: रचिता:, अतएव सर्वै: जैनतार्किकैरयमनुसृत:।

उत्तरकाल:—

जैनतर्कविकासस्यान्तिमोऽयं काल:। अस्मिन्नेव काले हेमचन्द्र-देवसूरि-अभयदेव-नरेन्द्रसेन-यशोविजयप्रभृतयो जैनतार्किका: जैनन्यायं संक्षिप्य सरलभाषया प्रस्तुतवन्त:। यशोविजयेन अष्टसाहस्रीविवरण-ज्ञानविन्दु-तर्कभाषासदृशा: ग्रन्था: रचिता, इत्त्थं जैनमनीषिभिर्यत्र जैनन्यायं विकास्यं नीत्वा भारतीयं ज्ञानं दृढ़ीकृतं तत्रैव जैनन्यायं वाङ्मयं च परिवर्द्धितम्।

जैनदृष्टौ सत्स्वरूपम्—

जैनागमेषु सच्छब्दप्रयोगो द्रव्यलक्षणप्रयोगे न प्रत्युत द्रव्यस्यैव तत्त्वविधाने कृत:। द्रव्यवर्णनरूपे च सत: स्वरूपस्य समस्तं वर्णनं विहितम्। 'अनुयोगद्वारसूत्रं' द्रव्यमेव तत्त्वसामान्यलक्षणत्वेन स्वीकृतम्।

अथ विशेषलक्षणरूपेण जीवद्रव्यमजीवद्रव्यञ्च स्वीकृतम्। उमास्वातिः' आगमिकमान्यतानुसारं द्रव्यमेव सत्तत्त्वेनाङ्गीचकार। तेन 'सत्' न केवलं द्रव्यं प्रत्युत परिवर्तनशीलत्वेनाप्यमानि। उत्पाद-व्यय-ध्रौव्याणां निर्विरोध- समन्वयमेव सतः लक्षणमस्ति। तत्रोत्पादव्यये अनित्यसूचके तथाहि ध्रौव्यञ्च नित्यसूचकमस्ति। पदार्थः स्वत एव सदस्ति। यतोहि यत् स्वतः असत् तत्सत्ता सम्बन्धेऽपि सत्तत्त्वं नैव धारयति यथा- 'गगनारविन्दः'। इत्थमिदमेव मन्येत यत्कश्चन्नपि पदार्थः प्रकृत्या सत् भवति सत्पदार्थयोः भेदो न बोद्धव्यः। महावीरस्यानुसारं सर्वं सत्। अयं दृष्टिकोणोऽपि सर्वथा नैवोचितः। इत्थं सर्वमसत् इत्यपि नैवोचितम्। वस्तुतो यत् सत् स्यात् तदेव सदिति मन्तव्यम्। समस्तमपि द्रव्यक्षेत्रादि अपेक्षया सदस्ति परं द्रव्यं क्षेत्राद्यपेक्षया असत् वर्तते।

जैनदृष्टिकोणे प्रमाणं, तद्भेदाश्च—

मणिक्यनन्देरनुसारं तदेव ज्ञानं प्रमाणमित्युच्यते यत्स्व-स्याऽपूर्वार्थस्य च निर्णयं कुरुते।[1]

अर्थात् ज्ञानरूपात्मकं प्रमाणन्तदेव येन आत्मनोऽर्थस्य च बोधो भवेत्। इष्टवस्तुनो ग्रहणमनिष्टपरित्यागः ज्ञानं प्रति कारणत्वं भजते। 'वादिदेवसूरि'-मते स्वस्य परार्थस्य च निश्चयात्मकं ज्ञानमेव प्रमाणम्।[2] तेनं अपूर्वेति विशेषणमपसारितम्, एतदनुसारं पूर्वार्थः स्यात् अपूर्वार्थो वा यदि तज्ज्ञानं निश्चयात्मकं तदा तस्य प्रमाणत्वं सिद्धयत्येव यतोहि ज्ञानेनैव अभीप्सितानभीप्सितयोर्बोधो जायते।[3] इत्थञ्जैनदर्शने ज्ञानं स्वापर-प्रकाशकत्वेन स्वीकृतम् अर्थात् तदेव ज्ञानं प्रमाणं यनिश्चयात्मकं व्यवसायात्मकं निर्णयात्मकञ्च भवेत्। जैनदर्शनं प्रत्यक्ष-परोक्षभेदेन ज्ञानं द्विविधं स्वीकरोति। साक्षादात्मनोत्पन्नं ज्ञानं प्रत्यक्षम् इन्द्रियादिजन्यञ्च परोक्षमित्यनयोर्भेदः।

---

१. परीक्षामुख, १०२०.

२. स्वपरव्यवसायात्मकं ज्ञानं प्रमाणम्, प्रमाणनयतत्त्वालोकः-१-२,

३. तत्रैव- १-३,

प्रत्यक्षस्याशयः स्पष्टता[1] वर्तते यस्य प्रतिभासाय प्रमाणान्तरं नापेक्षते तद्वैशद्यमिति कथ्यते। यतोहि प्रत्यक्षं स्वतः समर्थ पूर्णञ्च, अतएव जैनतार्किकाणां दृष्टौ प्रत्यक्षप्रमाणस्यापि भेदद्वयम्। पारमार्थिकं सांव्यावहारिकञ्च। तत्राद्यं पारमार्थिकं द्विविधं सकल-विकलभेदात्। परं चतुर्विधम्-अवग्रह-ईहा-अवाय-धारणभेदात्। तत्र केवलं ज्ञानं सकलम्। अवधिज्ञानं विकलप्रत्यक्षमित्युच्यते।

यस्मिन् प्रतिभासे मध्ये व्यवधानञ्जायेत तथाहि प्रतीत्यन्तरस्यापेक्षामपेक्षेत ईदृशं व्यवहितं प्रतिभासं परोक्षप्रमाणमिति निगदन्ति जैनन्यायविशारदाः। इदं परोक्षप्रमाणं स्मृतिप्रत्यभिज्ञानतर्कानुमानागमभेदात् पञ्चधा। तत्राऽती स्मरणं स्मृतिः, दर्शनस्मरणाभ्यां समुत्पन्नम् 'इदं तदेवेति' 'तत्सदृशमिति' 'तस्माद्विलक्षणमिति' रूपेण जातं संकलनात्मकं ज्ञानं प्रत्यभिज्ञानम्।[2] उपलम्भानुपलम्भनिमित्तज्ञानं तर्कः। उपलम्भस्यार्थः लिंगपरामर्शेन साध्यस्य सद्भावज्ञानम्।

साधनेन साध्यज्ञानमनुमानम्[3] यथा धूमसाधनद्वाराऽग्निसाध्यज्ञानम्। इदमनुमानं द्विविधं स्वार्थपरार्थभेदात्। साध्येन सहाविनाभावसम्बन्धेन निश्चितसाधनेन साध्यस्य ज्ञानं स्वार्थानुमानम्।[4] अत्र हि जनोऽपराश्रितो न भवति प्रत्युत साधनं विलोक्य साध्यानुमानं शक्त्या कुरुते। साधनसाध्ययोरविनाभावसम्बन्धेनोत्पन्नं ज्ञानं परार्थानुमानमिति कथ्यते।[5] अत्र हि कश्चन जनोऽपरं कमपि बोधयति, अत तस्य बोधनेनोत्पन्नं ज्ञानं परार्थानुमानम्। परार्थानुमानं ज्ञानात्मकं भवति किन्तूपचारेण ज्ञापनात्तद्वचनमपि परार्थानुमानम्। ज्ञानात्मकं परार्थानुमानं वचनात्मकपरार्थानुमानमाश्रयते।

---

१. *विशदः प्रत्यक्षम्, प्रमाणमीमांसा - १-१-१३,*

२. *दर्शनस्मरणसम्भवं तदेवेदं........प्रत्यभिज्ञानम्-प्रमाणमीमांसा-१. २. ४.,*

३. *साधनात्साध्यविज्ञानमनुमानम्, प्र. मी.-१. २. ७,*

४. *स्वार्थं स्वनिश्चितसाध्यविनाभावयिकलक्षणात्साधनात् साध्यज्ञानम्,-*
प्र. मी.-१. २. ९,

५. *यथोक्तसाधनाभिधानजम् हि परार्थम्,-प्र. मी. २. १. १,*

इत्थं केशवमिश्रप्रणीततर्कभाषायाः, गौतमीयतर्कभाषायाः बौद्ध-तर्कभाषाणामनुसारं सतः स्वरूपं प्रमाणादिनां व्यवस्थापनं तासामैति-हासिकता च विवेचिता। आसान्तिसृणामपि तर्कभाषाणामध्ययनेन एतज्ज्ञायते यद् भाषाविषयदृष्ट्या एताः समकालीना एव किन्त्वासु बौद्धतर्कभाषा प्राक्तनी। मोक्षाकरगुप्तः (१११०) ई. वर्षे बौद्धतर्कभाषां रचयामांस, यतोहि गुणरत्नरचितायां तात्पर्यदीपिकायामस्याः निर्देशः प्राप्यते, गुणरत्नस्य च कालः पञ्चदशी (१५००) शताब्दी मन्यते। तत्र तेन वैदिकमतानि विखण्ड्य बौद्धदृष्ट्या न्यायशास्त्रं विवेचितन्तदनु केशवमिश्रेण गौतमीयतर्कभाषाया रचना (१२७५) ईसवीये वर्षे कृता। तत्र तेन गौतमन्यायसिद्धान्तः प्रतिपादितः। यशोविजयेन जैनतर्कभाषाया रचना (१६०८-१६८८) ईसवीये कृता यत्र जैनन्यायस्य विवेचना कृता वर्तते।

☆

द्वितीयोऽध्यायः

बौद्धतर्कभाषाकर्तृमोक्षाकरगुप्तस्य परिचयः—

बौद्धतर्कभाषारचयितृमोक्षाकरगुप्तस्याभिधानं नैयायिकेषु सादरं गृह्यते। कालश्चास्य १११० ई. वर्षं मन्यते। विद्वान्नयं राजजगद्दलवास्तव्य इति ऐतिह्यविद्भिः स्वीकृतः। यद्यपि विषयेऽस्मिन्विशिष्टोल्लेखः नास्ति तथापि प्राप्तावशेषैरिदं निश्चीयत एव यदयं पूर्वबंगालसविधे "बोगरास्थाने वसतिं चक्रे। इदमपि न निश्चितं यत्तथ्यमिदं समीचीनमेव। जगद्दलविहारस्य स्थापना राज्ञा "रामपालेन" ११०० ई. वर्षे कृता यश्च पालराज्यस्य पञ्चदशः शासकोऽभूत्। अस्य जगद्दलस्य वस्तु-स्थितिनिर्धारणं साक्ष्यानामभावाद्दुष्करमेव, अतएव प्रामाणिकश्रोत-सामभावे मोक्षाकरगुप्तस्य कालविषयिणी समस्याऽद्यावधि वर्तत एव। अनेन विरचितग्रन्थेषु केवलं तर्कभाषैव समुपलभ्यते। या च पालराजसंरक्षणे संरचिता। अस्यां कृतौ विद्वान्नयं "बौद्धभिक्षु" रिति पदेन सम्बोधितो वर्तते। ग्रन्थेऽस्मिन् बौद्धदृष्ट्या तर्कस्य ज्ञानस्य च संक्षिप्तविवेचनं विवेचितमस्ति। 'हरिभद्रसूरि' विरचिते षड्दर्शनसमुच्चये "गुणरत्न" विरचितषड्दर्शनसमुच्चये तथाहि "तात्पर्यदीपिकायाञ्च मोक्षाकरगुप्तकृततर्कभाषायाः सन्दर्भः प्राप्यते। गुणरत्नस्य कालः पञ्चदशशताब्दी मन्यतेः, येन बौद्धतर्कस्य दशमहत्त्वपूर्णग्रन्थेषु तर्कभाषाऽपि परिगणिता।"

तर्कभाषालेखकेन ग्रन्थरचनोद्देश्यमादावेव समुपस्थापि यत् सौकर्येण बालानां बौद्धप्रमाणव्यवस्थायास्संक्षिप्तेन बोधो जायेत, यतोहि इतः प्राग्वर्तिनो न्यायग्रन्थाः अत्यन्तं दुरूहाः निर्बोधाश्च। तर्कभाषायाञ्च क्वचित् क्वचित् प्रमाणवार्तिकस्यापि समन्वयो दृश्यत एव। मोक्षाकरगुप्तस्य जीवनपरिचय- सम्बन्धे "बड़ौदातः". प्रकाशिततर्कभाषायां कश्चन

सामान्योल्लेखः वर्तते। एतद्यथा-"समयस्तु क्रयीस्तैकादशशतकस्यान्तिभो भागः। इदञ्च नगरञ्चिरेणैव कालेन विविधदेवि-देवालयैस्सम-लङ्कृतञ्चोद्यानैर्विविधदेशीयपण्यद्रव्य-भूयिष्ठैरापणैः परिष्कृतमभूत्। आसीच्चास्मिन्नगरेऽवलोकितेश्वराभिख्यस्य बोधितसत्त्वस्याऽचार्यमूर्त्तिः। अस्य विहारस्य निर्माणारम्भसमयः प्रायः क्रयीस्ते द्वादशशतकस्य पूर्वो भागः भवितुमर्हति। प्रथितश्चाभूत्पुरा भारते विहारोऽस्मिन्विहारे महाविद्यालयः कश्चन प्रतिष्ठितोऽभूदिति ज्ञायते। बहवः पण्डिताः भिक्षवोऽस्मिन् विहारे आसन्। तेषु चत्वारः सप्रथिताः विभूतिचन्द्रो, दानशीलः, शुभाकरः मोक्षाकरगुप्तश्चेति। टिबटन (तिब्बतन) भाषायामपि, चतुर्षु तेषु सुप्रथिता विभूतिः विभूतिचन्द्रः निष्पन्नपाण्डित्यान् कांश्चन सौगतसंस्कृतग्रन्थान् टिबटन्भाषात्मना पर्यवर्तयत्। तथैव दानशीलोऽपि। शुभाकरगुप्तस्य शुभंकरगुप्त इत्यासीत् प्रथा। अयं रामपालसमयात् क्रैस्तैकादशशतकान्तिकभागतोऽप्यासीत्। अनेन राजजगद्दलविहारे निवसता सिद्धैकवीरतन्त्रटीकाख्यो निबन्धो व्यरचि।

अयं खलु निबन्धस्तर्कभाषेत्याख्यया ख्यायमानः सौगत-दर्शननिष्ठानां भवत्यादरपात्रम्। तद्दर्शनं जिज्ञासमानानां प्रमाणप्रमेय-स्वरूपमवगमयन् भवत्युपकारकश्च.....।

मोक्षाकरगुप्तेनादावेव तर्कभाषा-निर्माणोद्देश्यं ज्ञापयता उक्तमेतद्यत् विद्यार्थिनां धर्मकीर्तेर्मतज्ञापनार्थं विरच्यते तर्कभाषा। अनेनेदं निश्चितं यत् मोक्षाकरगुप्तः धर्मकीर्तेः पश्चाद्वर्ती। स च सप्तशताब्द्याः प्रथमभागादारभ्य चतुर्थं भागं यावदतिष्ठत्।

मोक्षाकरगुप्तप्रणीतग्रन्थेषु केवलं तर्कभाषैव प्राप्यते या खलु प्रमाणवार्तिक-न्यायविन्दुसिद्धान्तानां विवेचनेन पूर्णा सती मोक्षाकरगुप्तस्य धर्मकीर्त्यनुयायित्वं ख्यापयति। यतोहि इयमपि तस्या एव परम्पराया एका शृंखला वर्तते। अत्र त्रयः परिच्छेदाः वर्तन्ते। येष्वादिमे प्रत्यक्ष-विवेचनन्तथाह्यवशिष्टपरिच्छेदयोरनुमानं वैशद्येन विवेचितमस्ति। अन्यभारतीयदार्शनिकसम्प्रदायेषु प्रत्यक्षानुमानातिरिक्तम् उपमान-शब्दार्थापत्ति अनुपलब्ध्यादयः प्रमाणत्वेनाङ्गीकृता वर्तन्ते। अतएव

मोक्षाकरगुप्तेन प्रमाणपरिभाषामादाय एतद्विनिश्चेतुं प्रयासो विहितः यत् समस्तान्यपि प्रमाणानि तार्किकनिकषे खण्ड्यन्ते तथाहि केवलं प्रत्यक्षानुमान एवावशिष्येते। अतएवेते मुख्यत्त्वेनाधारीकृते। तेन स्वार्थपरार्थभेदेनानुमानस्य द्वैविध्यं स्वीकृतम्। प्रक्रियादशायां परार्थानुमानमपि साधर्म्यवैधर्म्यभेदाभ्यां द्विधात्वं भजते। पूर्वपरिच्छेदे वर्णितप्रकृतिकार्यानुपलब्धिहेतुत्वात् कृतमनुमानं साधर्म्यवत्। वैधर्म्यप्रयोगव्याख्याप्रसंगे लेखकेन बौद्धदर्शनस्य क्षणवादो विवेचितस्तत्र नैयायिकानामीश्वरसाधकानुमानखण्डनं, बौद्धदर्शनस्य चतुर्णां सम्प्रदायानां मतेषु परतत्त्वस्वरूपविवेचनं कृतमस्ति। सहैव व्याप्तिग्रहण-प्रमाणहेत्वाभासादीनामपि निरूपणं कृतमस्ति। अस्यामत्यन्तसंक्षिप्तायामपि तर्कभाषायां बौद्धतर्कस्य अंगप्रत्यंगविवेचनमस्ति, अन्ते च जैनदर्शनस्य अनेकान्तवादोऽपि खण्डितो वर्तते। खण्डनांशोऽय-मनेकान्तवाद निरासे'ति शीर्षकात् 'जितरिपादस्य' कृते संकलितः। मोक्षाकरगुप्तोऽयं धर्मग्रन्थप्रवर्तकत्वेनापि प्रसिद्धिं गतः। प्राचीनकालेऽयं नियम आसीत् यद्विद्वज्जनानां कथनं व्याख्यानञ्च संकलय्य संक्षिप्य च विद्यार्थिनां कृते शिक्षाप्रदानम्। इत्थं केशवमिश्रयशोविजययोस्तर्कभाषायाः सम्यगवबोधो भवति मोक्षाकरगुप्तविरचितबौद्धतर्कभाषाबलात्।

अत्र प्रश्नस्समुदेति यद्यदा धर्मकीर्तिदिङ्नागप्रभृतिबौद्धदार्शनिकैः स्वस्वप्रमाण-व्यवस्थापनं कृतमेवासीत् तदा पुनर्मोक्षाकरगुप्तस्य प्रमाणव्यवस्थापनापेक्षा कथमापतिता? अत्रोच्यते यद्यपि बौद्धप्रमाण-व्यवस्था बौद्धवचनैरेव पवित्रतां संगच्छते, यतोहि भगवता बुद्धेन धर्मचक्रपरिवर्तनसूत्रे आर्याष्टांगिकमार्गेषु सम्यग्ज्ञानमार्गः सम्यग्दृष्टिमार्गश्च प्राधान्येन व्यपदिष्टः, अयमेव च सम्पूर्णबौद्धविकासस्य आधारस्तम्भः। गुप्तमोक्षाकरोऽपीदमेवाऽश्रित्य तर्कभाषां रचयामास। या तिब्बतीभाषायां 'रितोयगहिस्कद' इतिं नाम्नाऽभिधीयते। तत्र तर्कस्यानेकाः विधाः निरूपिताः अथ संस्कृतातिरिक्तं तस्याः तिब्बतीभाषायामनुवादोऽपि जातः, यश्चानुवादः 'वुस्तोन हयबुर' इति नाम्नाऽभिहितः। तच्च पुस्तकं त्रिषु भागेषु विभक्तमस्ति-प्रत्यक्ष-स्वार्थ-परार्थानुमानभेदात्। बौद्धतर्कभाषायाः

सावधानतयाऽध्ययनेन इदं ज्ञायते यन्मोक्षाकरगुप्तेन स्वतर्कभाषायां प्रमाणानां तेषां विभागानाञ्च मूलतः कारिका प्रमाणवार्तिकन्याय-विन्दुग्रन्थाभ्यां गृहीता। इदं विविच्य वक्तुं शक्यते यन्मोक्षाकरगुप्तः एतद्ग्रन्थद्वयस्य पश्चाद्वर्ती। मोक्षाकरगुप्तस्य तर्कभाषायाः काश्चन विविधाः विशेषताः सन्ति याः पूर्वग्रन्थेषु नासन्। यतोहि बौद्धदर्शन न्यायस्य पारिभाषिकशब्दावलिः अत्यन्तञ्जटिला दुरूहा चाऽसीत्। तर्कभाषायामियं दुरूहता न तथावलोक्यते। ग्रन्थेऽस्मिन् न्यायविन्दुहेतुबिन्दु प्रभृतिपुस्तकानां प्रमाणांशोऽपि विचारितो वर्तते। अत्रायं पुनस्समुदेति प्रश्नो यत् अस्याः तर्कभाषायास्तादृशं किं वैशिष्ट्यं येनान्यबौद्धन्यायग्रन्थो न प्रभावितः। तत्रोच्यते ग्रन्थादावेव गुप्तमोक्षाकरेण निजमंगलपद्ये उक्तमेतद्यत् 'गुरुं लोकेशं बुद्धं प्रणम्य, अल्पमेधसां बालानां धर्मकीर्तिमतज्ञापनाय प्रयासो विहितः'। अनेन स्पष्टमेतद्यत् बहुजनहिताय प्रणीतेयम्। अस्यां हि तेन बौद्धप्रमाणव्यवस्थायाः मंतव्यानां संक्षेपतया किन्तु महत्त्वपूर्णांशानामुपर्येव दृष्टिपातः कृतो वर्तते। तत्कृततर्कभाषायाः काश्चन्विशेषताः याः समुपलब्धास्ताः निम्नतया दृश्याः-

बौद्धतर्कभाषायाः अस्याः रचना स्वातन्त्र्येण न कृताऽपितु तल्लेखकेन धर्मकीर्तेर्न्यायविन्दुप्रणाणवार्तिकयोसाहाय्यमगृह्यत। किन्तूपर्युक्ते पुस्तकेऽत्यन्तं कठिने, ययोर्वाक्शैलीभ्रमितजिज्ञासूनां न किमपि निष्कर्षागमः। किञ्चास्य विपरीतम्मोक्षाकरगुप्तेन निजायां तर्कभाषायां बौद्धप्रमाणव्यवस्थात्यन्तं सारल्येन समुपस्थापि। भारतीयदर्शनस्यान्यान्यसम्प्रदायेष्वनुमानमंतिरिच्य उपमान-शब्दार्था-पत्त्यनुपलब्धयोऽयङ्गी कृतानि प्रमाणत्वेन। किन्त्वनेन प्रमाण-परिभाषाऽनुसारमिदं व्यवस्थापि यत् बौद्धमतसिद्धे प्रत्यक्षानुमान एव द्वे प्रमाणे येऽतिरिच्यान्यप्रमाणस्वीकरणम् अयुक्तिसंगतम्। एतदनुसारम्—

'अपूर्वविषयकसम्यग्ज्ञानत्वं प्रमाणत्वम् तथाहि—प्रत्यक्षं कल्पनारहिताऽभ्रान्तस्वलक्षणात्मकज्ञानमेव। चतुर्विधत्त्वञ्च प्रत्यक्षस्य इन्द्रिय-ज्ञानप्रत्यक्षं, मानसप्रत्यक्षं, स्वसंवेदनप्रत्यक्षन्तथाहि योगिज्ञान-प्रत्यक्षमिति भेदात्। तर्कभाषायाः प्रथमपरिच्छेदे एतत्सर्व्वमेव विचारितम्।

द्वितीयपरिच्छेदे चास्याः स्वार्थानुमानं विवेचितम्। नव्यन्यायमिव बौद्धन्यायेऽपि स्वार्थपरार्थानुमानत्वेनानुमानस्य द्वैविध्यमंगृह्यत। अथ स्वार्थानुमानं नाम मानसिकी प्रक्रिया, यस्यां कस्याप्यनुमेय-पदार्थस्यानुमितिर्जायते। प्राप्ताया अनुमितेश्शब्देनाभि- व्यक्तिरन्यस्य बोधाय अनुमीत्यै वा यदा क्रियते तदेव परार्थानुमानमिति न्यायविदः। अथानुमानस्यापि कारणान्यथवा हेतवस्त्रिविधाः यथा स्वभावहेतुः, कार्यहेतुस्तथाऽनुपलब्धिहेतुः। एत एवाधारीकृत्यानुमानं संसिद्ध्यति। पुनस्त्रयाणां परामर्शवाक्यान्यपि प्रसिद्धानि, येषां निरूपण-मुचितैरुदाहरणैस्सह कृतं वर्तते। तर्कभाषायास्तृतीयपरिच्छेदे परार्थानुमान-विवेचनं कृतं वर्तते। अत्र च हेतुः अन्वयव्यतिरेकपक्षधर्मताऽऽदि-विशेषताभिर्विशिष्यैव साध्यस्य साधकत्वं सिद्ध्यति। अतस्त्रिविधरूपेण हेतोः कथनमेव परार्थानुमानमिति निगद्यते। नैजप्रक्रियायां परार्थानुमानस्य द्वैविध्यं साधर्म्यवत् वैधर्म्यवदिति भेदात्। अनयोस्संक्षेपेण सरलतया च विवेचनं प्रस्तूयते।

द्वितीयं वैशिष्ट्यम्—

यथार्थता बौद्धतर्कभाषायाः द्वितीयं वैशिष्ट्यं, तत्रार्थसारूप्ये विशिष्टं बलं प्रदत्तमस्ति। इत्त्थन्तावदत्र निगदितं यदर्थेन सह यत्सादृश्यं तदेव प्रमाणमिति। प्रत्यक्षज्ञानस्यार्थः विषयाकारेव ज्ञानोत्पत्तिरनेन, यदा नीलसादृश्यमनेन अनुभूयते तदा नीलत्वावच्छिन्नं ज्ञानं व्यवस्थापितं भवति। तर्कभाषायामस्यां ज्ञानस्य यथार्थताऽस्माद्धेतोरपि प्रमाणिता भवति यतोह्येतत् संदेहविपर्यासदोषरहितमतिसंवादकतायुतं भवति। तत्र घटादिविषया अपूर्वत्वं भजन्ते। यज्ज्ञानं समक्तवावच्छिन्नं तदेव ज्ञानं प्रामाणिकं यथार्थं वा मन्यतेऽतो यथार्थताऽपि महत्त्वपूर्णं स्थानमुपस्थापयति तर्कभाषायाः अस्याः वैशिष्ट्यनिरूपणे।

तृतीयं वैशिष्ट्यम्—

वैज्ञानिकता नाम बौद्धतर्कभाषायास्तृतीयं वैशिष्ट्यं, यतोहि तत्कर्ता

गुप्तमोक्षाकरोऽपि विज्ञानवादी आसीत्। अनेन प्रमेयद्वयाऽधारे प्रमाणद्वय-व्यवस्था कृता तदनुरूपञ्च प्रमालक्ष्यञ्चके। यतोहि बौद्धदर्शने सम्यग्ज्ञानमेव प्रमाणत्वेन व्यवस्थितमेतदनुसारं द्वैविध्यं ज्ञेयस्य प्रमेयस्य वा। यथार्थज्ञानत्वं प्रमाणत्वमेव व्रा प्रमेयत्वेन ज्ञायते। अथ प्रमासाधनत्वेनैव प्रमाणत्वं स्वीकृतम्। प्रमेयप्रमाणयोरादिमस्साध्यस्तथाऽपरः साधनत्वे-नाङ्गीक्रियते। अनयोस्साध्यसाधनयोर्मध्ये कश्चन्नपि भेदो न जायते। उभेऽपि ज्ञाने क्रियायाः अंगद्वयम्। अंगद्वयकारणेनैव तद्द्वितयमपि ज्ञानरूपत्वेन स्वीक्रियते। इदमेव कारणं यत् बौद्धतर्कभाषायां सम्यग्ज्ञानं नाम प्रमा-प्रमात्वेन चाङ्गीकृतं वर्तते। प्रत्यक्षलक्षणं यथा कृतं तर्कभाषायामेव-

'अक्ष्णा (इन्द्रियैः) सम्बन्धितं ज्ञानमेव प्रत्यक्षमिति तथाहि अक्षपदेन चक्षुर्त्वक् श्रौत्रघ्राणजिह्वाः'

यतोहि गृळयन्ते तस्मात्प्रत्यक्षस्य तादृग्वैज्ञानिकविवेचनादेवास्याः तर्कभाषायाः वैज्ञानिकतापि संसिद्ध्यति।

परन्तु प्रत्यक्षशब्दस्य पूर्णार्थग्रहणेऽशक्यत्वात् परिभाषेयं न युक्ता यतोहि इन्द्रियार्थसम्बद्धं ज्ञानमेव प्रत्यक्षम् इति कथ्यते। प्रत्यक्षस्य केवलमियमेव परिभाषा, परन्तु प्रत्यक्षणशब्दप्रयोगार्थं साक्षात्करणत्वमेव प्रवृतिनिमित्तत्त्वमुपयाति। यस्मिन् कस्मिन् वा रूपे वा अयमर्थः सञ्ज्ञायेत। अस्यायमेवाशयो यद्विज्ञानं पूर्वत एव विषये प्रवृत्तं भवति तदेव प्रमाणमिति। यथा 'पंकजाज्जातः, किन्त्वयं शब्दः स्थलकमलायापि प्रयुज्यते। कश्चन वैज्ञानिकः किमपि यन्त्रमेकं परिष्कृत्य यथा तत्र बहूनि यन्त्राणि व्यवस्थापयति तथैव मोक्षाकरगुप्तेनापि कामपि परिभाषां निर्धाय तत्र वसुबन्ध्वादीनां सहयोगो गृहीतः। वसुबन्धोः प्रत्यक्षलक्षणे तत्, अर्थ विज्ञानमिति त्रीणि पदानि सन्ति।

तदिति पदस्यार्थोऽस्ति सः, शब्दोऽयं सदैव 'यत्' इत्यनेन शब्देन सह अन्वितो भवति, 'यत्तदोर्नित्यसंबन्ध' इति नियमात्। अतः तदित्यनेन सह यदित्यस्यपि अध्याहार आवश्यकः। अर्थो विषयः, विज्ञानञ्च तस्मादुत्पन्नं ज्ञानम्। बौद्ध-नैयायिकवसुबन्धोरपि इदं कथनमस्ति यत् यस्य विषयस्य यद्विज्ञानं यदि तत्तस्मादुत्पद्येत तत्प्रत्यक्षम्। शूक्तौ रजताकारकं

यज्ज्ञानं तज्ज्ञानं रजताद् भिन्नं शूक्त्याः उत्पन्नं यतोहि तत्र रजताऽभावः। अनेनेदं सिद्ध्यति यत् यत्र व्यपदिश्यमानविषयज्ञानेन निश्चयसम्बन्धो नास्ति तत्प्रत्यक्षं न, अस्मात् संवृत्ति-ज्ञानस्यापि निराकरणञ्ज्ञायते। यदि वयं विज्ञानमेव प्रत्यक्षत्वेन कथयिष्यामस्तदा घटोऽयमित्याकारकज्ञानमपि प्रत्यक्षसंज्ञां प्राप्स्यति अतः वैज्ञानिकतापि तर्कभाषायाः विशिष्टा विशिष्टता।

चतुर्थं वैशिष्ट्यम्—

क्षणभंगवादोऽपि विषयेऽस्मिन्विशिष्टतां स्थापयति। तत्र प्रत्येकं प्रमाणज्ञानमपूर्वविषयं गृह्णाति यः पूर्वतो न ज्ञातः स्यात्। बौद्धाः क्षणभंगवादिनोऽतः तेषां दृष्टौ कस्यापि वस्तुनः सत्ता भवति उत्पत्त्यनन्तरन्तस्य विनाशश्च। यतोहि मोक्षाकरगुप्तो निजतर्कभाषायामिदं स्वीचकार यत् सत्भूतत्वात् उत्पत्तिस्सहेतुकी, असत्भूतत्वात् विनाशोऽहेतुक इति। मोक्षाकरगुप्तेन उत्पत्त्यनन्तरमर्थविनाशः क्षणशब्दत्वेन स्वीकृतस्तथाहि तस्मिन्नेवार्थे क्षणिकशब्दस्यापि प्रयोगो वर्तते यतोहि क्षणिकत्वात्किमपि वस्तु अवलोकनानन्तरमेवोत्पद्यते विनश्यते च, अतएव यज्ज्ञानं ज्ञातार्थं ज्ञापयति तत्कथमपि प्रमाणत्वं न वारयति। अत्र स्थिरवस्तुवादिनैयायिकेभ्यः बौद्धानां मतभेदो वर्तते यतोहि तेषां प्रमाणलक्षणं बौद्धैर्भिन्नं वर्तते। अत्र स्थिरवस्तुवाद एव तत् इत्यस्मिन् तत्त्वप्रकारकं ज्ञानं सम्भवति। क्षणिकवाददृष्ट्या एतस्मिन्नेव तत्त्वनिश्चयो भवति। क्षणिकतायाः विषये एकं तथ्यमिदमपि ध्यातव्यमस्ति यत्क्षणिकतायाः मापकाः देशकालाकारादयो भवन्ति। यदा वयं किमपि वस्तु विलोकयामस्तत् देशकालाकारादयस्सहैव उपस्थिताः भवन्ति। तत्र देशकालौ कामं विनष्टौ जायेताम्, किन्तु आकारः कदापि न विनश्यति यतोहि बौद्धमतानुसारं ज्ञानं यत् पश्यति तन्नैव प्राप्नोति प्रत्युत तदन्यं विलोकयति अन्यच्च प्राप्नोति।

अत्र प्रश्नस्समुदेति यत् यदा ज्ञानंमन्यद्विलोक्यन्यत् प्राप्नोति तदा तु ज्ञानस्य अविश्वसनीयता एव? ज्ञानस्येदं स्वरूपमपि अविश्वसनीयज्ञायेत। अत्र मोक्षाकरगुप्तो निगदति यत् ज्ञानं प्राप्तवस्तु च पृथक्-पृथक् वर्तेते,

किन्तु निरन्तरं भिन्नभिन्न सजातीयवस्तुक्षणानामुत्पत्तिकारणात् इदं तदेव यदस्माभिः पूर्वं दृष्टमिति बोधो जायते। इत्त्थं भिन्नानां नैरन्तर्यत्वात् एकत्त्वं निश्चीयते। अस्मादेव कारणात् कश्चन जन इदं ज्ञानं दृढ़ीकरोति यत्तेन दृष्टं तत् तेन प्राप्तमिति।

पञ्चमं वैशिष्ट्यम् :—

व्यवस्थावादिता नाम पञ्चमं वैशिष्ट्यं बौद्ध तर्कभाषायाः, एतदनुसारं प्रत्यक्षानुमान एव द्वे प्रमाणे स्वीकृते। तयोर्विषयावपि द्वावेव स्वलक्षणसामान्यलक्षणभेदाभ्याम्। सामान्यं तावत् प्रत्यक्षस्य विषयत्वं नोपयाति, अनुमानञ्च स्वलक्षणविषयत्वं न गृह्णाति। अत उभेऽपि प्रमाणे विशिष्टविषययुते स्तः, उभयोरपि क्षेत्रं पृथगेव। तत्रानुमानस्यापि द्वौ भेदौ स्वार्थपरार्थभेदात्। अनुमानावयवसम्बन्धेऽपि अस्य व्यस्थावादिता स्पष्टं परिलक्ष्यते। वसुबन्धोरनुसार त्रिविधं न्यायवाक्यम्। धर्मकीर्तिमोक्षाकर गुप्तयोरनुसारमवयवो द्विविधः। मीमांसासांख्ययोरनुसारमवयवस्त्रिविधः। न्यायदर्शनानुसारं प्रतिज्ञा-हेतु-उदाहरण-उपनय-निगमनभेदात्पञ्चा-वयवाः। इत्त्थमवयसंख्याविवादेऽपि मोक्षाकरगुप्तेन तर्कभाषायां द्वावेवावयवावित्त्थं समुपस्थापितौ याभ्यामनुमानं सम्यग् ज्ञातुं शक्यते। तौ च व्याप्तिपक्षधर्मतानामाख्यौ। आचार्यधर्मकीर्तिस्त्रैरूप्यसम्पन्नहेतुकथनमेव परार्थानुमानमिति स्वीचकार। अत्र अनेकेषां विदुषां मतमित्त्थं यदाचार्य-धर्मकीर्तिदिङ्नागाभ्यां द्वावेवाऽवयवौ स्वीकृतौ। आचार्यधर्मकीर्तिः एकत्र पक्षवचनं साधनवाक्यञ्च अवयवत्वेन न स्वीकरोति परमन्यत्र दृष्टान्तमपि न निर्दिशति, अतोऽस्यानुसारं द्वावेव अवयवौ मान्यौ, परमाचार्यधर्मकीर्तिरयं हेतुं त्रिरूपयुक्तं मन्यते। येनार्थप्रतीतिर्भवति, अतो दृष्टान्तनामाख्यं किमपि पृथगवयवो न किन्तु हेतावेव तस्यान्तर्भावः।

गुप्तमोक्षाकरकृततर्कभाषाया उपयोगिता प्रतिपादने इत्त्थं वक्तुं शक्यते यद् ग्रन्थोऽयं बौद्धपरम्परायाः व्यापकः, यस्मिन् लेखकेन बौद्धन्यायसिद्धान्ताः सम्यग्विवेचिताः सन्ति। ग्रन्थस्यादावेव इदं विवेचितमस्ति यद्धर्मकीर्तेः प्रमाणव्यवस्थायाः ज्ञानं सर्वजनसंवेद्यं

स्यादिति। तत्र न्यायस्य समस्तपदार्थाः संक्षेपेण किन्तु पूर्णतया विवेचितास्सन्ति। प्राचीनभारतीयदार्शनिकानामभिरुचिः बौद्धदार्शनिक-परम्परा- स्थापनायामादानप्रदाने च दृश्यत एव। भारतीयदर्शनानि तदैव ज्ञातुं शक्यन्ते यदा बौद्धविचाराणामपि परिचयः स्यात्। वस्तुतस्सत्यमेतत् यद् बौद्धदर्शनस्य प्रारम्भिकजिज्ञासुणां विना काठिन्यं यथावत् ज्ञानं प्रदीयेत, तत्र प्रारम्भे द्विविधं काठिन्यमनुभूयते, तत्र तावदादिमं बौद्धपारिभाषिकशब्दानां, द्वितीयञ्च अन्यदर्शनप्रयुक्तानां समानशब्दानां बौद्धदर्शनेऽपि प्रयोगः। समानशब्दप्रयोगद्वारा केवलं सामान्याभिप्राय एव ज्ञातुं न शक्यते यतोहि ईदृशाश्शब्दाः बौद्धदर्शने रूढ़ितां गताः दृश्यन्ते। प्रसङ्गेऽस्मिन्नेकान्याऽपि वार्ता ध्यातव्या वर्तते यद् बौद्धन्यायस्य साङ्गोपाङ्गमूल्यांकनं तावन्नैव सम्भवति यावदस्य विकासक्रमो नावलोक्येत। अभावे चास्य लक्षणेषु निर्दिष्टविशेषणानां स्वारस्यमेव ज्ञातुं शक्यते, न वा निदर्शनैस्सहास्य तात्त्विकभेदः, न च बौद्धदर्शनेन सहास्याऽदानं प्रदानं वा। अस्मादेव कारणात् इदं बहुविधं काठिन्यं हृदि निधाय मोक्षाकरगुप्तेन प्रमाणव्यवस्था निरूपिता। यद्यपि दिङ्नागधर्म-कीर्तिप्रभृतिभिराचार्यैः स्व-स्वग्रन्थेषु प्रमाणविवेचनं वैशद्येन कृतमस्ति परं जटिलत्वान्न तु ते सर्वजनसंवेद्याः। अतएव तान् विषयान् सरलीकृत्य रचिता बौद्धतर्कभाषा।

उदाहरणार्थं यथा-न्यायविन्दिविति नामके ग्रन्थे प्रमाणशब्दस्थाने सम्यग् ज्ञानमिति पदं प्राप्यते। सम्यग्ज्ञानविषये च **सम्यग्ज्ञान-पूर्विकासर्वपुरुषार्थसिद्धिः तद् व्युत्पाद्यते** इति लिखितम्। अर्थात् समस्तपुरुषार्थाणां सिद्धिः सम्यग्ज्ञानादेव जायते। बौद्धतर्कभाषायां प्रमाणपरिभाषा यथा-**अपूर्वविषयकं सम्यग् ज्ञानम्** अर्थात् यथार्थज्ञानं तत् यस्य विषये पूर्वतः न किमपि ज्ञातं भवेत् अथवा येन कस्यापि विषयस्य सम्यग्ज्ञानमुत्पद्यते तद् यथार्थज्ञानं प्रमाणमिति मन्यते। इत्थं 'न्यायविन्दु' इत्याख्ये ग्रन्थे प्रमाणव्यवस्था किञ्चित् क्लिष्टा, किन्तु मोक्षाकरगुप्तस्य तर्कभाषायामियम् अत्यन्तं सरला सुस्पष्टा च।

तर्कभाषा प्रसिद्धबौद्धनैयायिकस्य धर्मकीर्तेस्तर्कपरम्पराया एकः

लघुकायो ग्रन्थः वर्तते। आचार्यस्यास्य प्रमाणवार्तिकन्यायविन्दु इत्याख्यौ द्वौ ग्रन्थौ अत्यन्तं विशालौ, बौद्धदर्शनपरम्परायास्सम्पूर्णसिद्धान्तविवेचकौ चास्तः। बौद्धसिद्धान्तवादी सतः निरन्वयं विनाशं तथाहि असत् उत्पतिञ्च मन्यते। अत्र सः सांख्यस्य सतः सदुत्पत्तिमस्वीकरोति यथा–परस्य चासत् उत्पादोत्पत्तिमत्त्वं सतश्च निर्वयो विनाशोऽनित्यत्वञ्च सिद्धम्[1]। बौद्धैः विज्ञानमिन्द्रियमायुनिरोधञ्च मरणत्वेनाङ्गीकृतम्। यथा वा धर्मकीर्ति–नाऽवादिविज्ञानेन्द्रियार्युर्निरोधलक्षणस्य मरणस्याभ्युपगमात्[2]।

बौद्धवादिभिस्सुखादीनि तत्त्वानि अचेतनत्त्वेनाङ्गीक्रियन्ते यथा–अचेतनाः सुखादय इति साध्योत्पत्तिमत्त्वं नित्यत्वं वा, सांख्यस्य स्वयंवादिनोऽसिद्धम्।[3] बौद्धाः आत्मानं मरणं वा नैव स्वीकुर्वन्ति परन्त्ववरोधं मन्यन्ते।[4] एते प्राणान् मन्यन्ते परन्त्वनात्मवादित्वात् सात्मकं निरात्मकं वा न मन्यन्ते। तत्र धर्मकीर्तेः कथनमेतत् यत्–सात्मकत्त्वेन निरात्मकत्वेन वा प्रसिद्धेः प्राणोदरसिद्धिः।[5] इत्थं पश्यामो यत् न्यायविन्द्विवत्यादिग्रन्थेषु धर्मकीर्तिद्वारा बौद्धसिद्धान्ता अपि वर्णितास्सन्ति परं मोक्षाकरगुप्तेन केवलं तत्र बौद्धप्रमाणव्यवस्थैव विशेषतया वर्णिता।

धर्मकीर्तिप्रभृतिबौद्धनैयायिकाः अनियमवादिन आसन् किन्तु तर्कभाषायां नियमाः परिपालिताः। अतः नियमवादितापि श्रेणिविशेषे स्थापयति इमं ग्रन्थं, यथा आचार्यधर्मकीर्तिः स्वन्यायविन्दुग्रन्थे विना प्रमाणलक्षणं तस्य भेदान्निरूपयामास। अत्र आचार्योऽयं प्रमाणस्थाने सम्यग्ज्ञानमिति प्रयोगश्चक्रे। सम्यग्ज्ञानविषये कथितं यत्–"अविसंवादकं ज्ञानं सम्यग्ज्ञानम्"।[6] यः पूर्वतः ज्ञातपदार्थे प्रयोजयति लोके सः संवादक इति कथ्यते। ज्ञानविषयेऽपि परिभाषेयं संघटते यतोहि ज्ञानमपि

१. *न्याय, पृ. २१, पं. ०३,*
२. *न्याय, पृ. ८९, पं. १३*
३. *न्यायपृष्ठ ९०,*
४. *न्यायपृष्ठ – ८३, पं. २,*
५. *न्यायपृष्ठ १०७, पं. २०,*
६. *न्यायविन्दु पृ. ५, पं. ९*

अर्थे नियोजयत् सत् संवादकत्वं व्रजति, अतोऽविदितार्थस्य ज्ञापकं ज्ञानं सम्यग् ज्ञानं कथ्यते यथा अनधिगतविषयं प्रमाणम्।[१]

यद्यपि बौद्धानां प्रमाणसंख्या सर्वेभ्यो भिन्ना किन्तु वैशेषिकानां समाना इव वर्तते। धर्मकीर्तिः प्रत्यक्षं परोक्षञ्चेति प्रमाणद्वयं स्वीकरोति।[२] भेदः अयमेव यद्वैशेषिकाः अर्थापत्तिमुपमानञ्च अनुमान एव अन्तर्भावयन्ति। किन्तु बौद्धाः स्वभाव-कार्य-अनुपलब्धि-हेतु-जनितं ज्ञानमेवानुमानं मन्यन्ते। अतएव बौद्धानुमाने तस्य पूर्णोऽन्तर्भावो नास्ति। बौद्धाः कल्पनारहितं निर्भ्रान्तं ज्ञानञ्च प्रत्यक्षं मन्यन्ते। एतदाचार्यधर्मकीर्तिद्वारा अप्यनुमोदितमस्ति। एते अर्थसानिध्यात् प्रत्यक्षं स्वीकुर्वन्ति अन्याप्वस्थासु न।[३] प्रत्यक्षस्य चतुरो भेदान् धर्मकीर्तिस्स्वीकारयामास, इन्द्रिय-मन-स्वसंवेदन-योगि-प्रत्यक्षभेदात्। यज्ज्ञानमिन्द्रियाश्रितं तत् प्रत्यक्षमिति।[४] इन्द्रियविज्ञानस्य द्वितीये क्षणे यदा इन्द्रियज्ञानं समनन्तरप्रत्ययत्वं प्राप्नोति[५] तदा तेनोत्पन्नं ज्ञानं मनः विज्ञानं मनःप्रत्यक्षं वा निगद्यते,[६] भेदः केवलमयमेव यत् अत्रालम्बनप्रत्ययमिन्द्रियविज्ञानं भवति। इन्द्रियविज्ञाने आलम्बन-प्रत्ययः संघटते। इन्द्रियविज्ञाने च घटपटादयो भवन्ति। यद्यपि धर्मकीर्तिः आत्मा जीवनामकं वा न कमपि पदार्थं स्वीचकार किन्तु स्वसंवेदनात्म-संवेदन-प्रत्यक्षं वा स्वीकुरुते, यतोह्यनेनैवाहं सुखी, अहं दुःखीति बोधो भवति। योगि-प्रत्यक्षं केवलं योगिनामेव। प्रत्यक्षस्यापि विषयः एकः क्षणवर्ती-पदार्थः किन्तु अनुमानस्य विषयः सामान्यलक्षणम्।

प्रत्यक्षप्रमाणस्य फलं प्रत्यक्षज्ञानम्। ज्ञानस्य पदार्थेन सह समवेतत्वं नाम प्रमाणं यतोहि तस्मादेव पदार्थोऽवगम्यते।[७] मोक्षाकरगुप्तेनापि प्रथमं

---

१. न्यायविन्दु पृ. ६, पं. १,
२. न्यायविन्दु पृ. १०, भाषाटीका-पृ. १
३. न्याय-पृ. १३,१४,१५।
४. न्याय पृ. १७-भा. पृ. २, पं.८।
५. भा पृ. २, पं. ८१
६. पृ. १८-१९, भा. पृ. २।
७. न्यायपृष्ठ-२२

प्रमाणलक्षणं निरूप्य पुनस्तस्य भेदद्वयं स्वीचकार। **''प्रमाणं सम्यग्ज्ञानमपूर्वगोचरं प्रमीयतेऽर्थोऽनेनेति प्रमाणम्''**[1] अर्थात् तज्ज्ञानं, यस्य विषयः पूर्वतो ज्ञातः न स्यात् तत् प्रमाणमिति। पुनश्च-''तदैव सम्यग् ज्ञानं सन्देहविपर्यासरहितत्वादविसंवादकं ज्ञानं लोके सम्यग्ज्ञानमभिधीयते, न च संशय-विपर्यासज्ञानयोरविसंवादकत्वमस्ति, यथा, स्थाणुर्वा पुरुषो वेति ज्ञानस्य, मरीचिकासु वा जलज्ञानस्य। अपूर्वा गोचरोऽस्त्येति अपूर्वगोचरम्। गोचरविषयो घटादिः तस्मादुत्पन्नं तदर्थप्रापणयोग्यं ज्ञानं प्रमाणम्''। अस्यायमाशयो यत् यज्ज्ञानं संशयविपर्यासदोष-रहितमविसंवादकं वा भवति, यस्य घटादिविषयाः गोचरतामुपयान्ति, अपूर्वाज्ञातत्वं वा भजन्ते तत् प्रमाणम् इति। मोक्षाकरगुप्तेनाऽदौ प्रमालक्षणं निरूप्य तद्भेदाः कृताः, परं धर्मकीर्तिः विना लक्षणम् अनुमानं न्यगदत् यदनुमानं द्विविधं, तत्राद्यस्य लक्षणं यथास्वार्थं नाम त्रिरूपात्मकं, लिंगाद्यनुमेये ज्ञानं तदनुमानम्।[2] द्वितीयस्य **''त्रिरूपलिंगास्थानं परार्थानुमानम्।''**[3] अर्थात् यज्ज्ञानमनुमेये त्रिरूपलिंगादुत्पद्यते तत्वार्थानु-मानमिति। तथाहि त्रिरूपलिंगकथनं परार्थानुमानमिति। एभिर्लक्षणैरिदं निश्चीयते यत्स्वार्थानुमानं ज्ञानरूपं तथाहि परार्थानुमानं वचनरूपञ्चेति। उभयोरपि एकलक्षणं भवति। यतोहि यद्यपि उभेऽपि ज्ञानरूपे वचनरूपे चास्तस्तथाप्युभयोरुपत्तिस्त्रिलिंगादेव।

तर्कभाषाया अस्याः महत्त्वमितोप्यधिकं वर्द्धते यतोह्यत्रानुमान-परिभाषां व्यवस्थाप्य तद्भेदाः कृतास्सन्ति। **मीयतेऽनेनेति मानं पश्चादर्थे पश्चान्माननुमानम्।** लिंगग्रहलिङ्गिस्मरणयोः पश्चान्मानमनुमानम्। लिंग-ग्रहणलिङ्गिसम्बन्धस्मरणयोः पश्चात् यद्विज्ञानं पर्वतादौ धर्मिणि परोक्षवस्त्वालम्बकं तदेवानुमानशब्देनाभिधीयते। एतच्च रूढ़िवशादव-गन्तव्यम् अर्थात् येनार्थः प्राप्यते तन्मानमनुमानमिति कथ्यतेऽर्थाद्धेतोः ज्ञानं हेतुसाध्यसम्बन्धस्मरणानंन्तरं पर्वतादिपक्षेषु परोक्षवस्तुनः (अग्रेः)

१. बौद्धतर्कभाषा-प्रमाणसामान्य-लक्षण-पृ. १-२,

२. न्यायविन्दु पृ.२९,

३. न्यायविन्दु-पृ.६१

सम्बन्धादुत्पन्नं ज्ञानमनुमानमिति निगद्यते। तत्र बौद्धतर्कभाषायास्सन्दर्भोऽयं-स्वस्मै यत्तत्स्वार्थानुमानं ज्ञानात्मकं, पर्वतादौ धर्मिणि धूमादिकं दृष्ट्वा यस्य प्रतिपत्तुः वह्निज्ञानमुत्पद्यते तेन ज्ञानेन परमर्थं प्रतिपद्यत इत्येव स्वार्थानुमानम्। परस्मै यत्तत्परार्थं, परार्थानुमानं वचनात्मकम्।

तर्कभाषाकृन्मोक्षाकरगुप्तः प्रत्यक्षानुमानयोरुभयोरपि सम्बद्धमर्थसारूप्यं प्रमाणत्वेन स्वीकरोति। अर्थेन सह ज्ञानस्य यत्सम्बद्ध- सादृश्यं तदेवानुमानम् अस्याभिप्रायो यत् यस्मात् विषयात् यज्ज्ञानमुत्पद्यते तत् तस्य वस्तुनः सादृश्यं प्राप्नोति। इत्थं श्रीगुप्तः विषयाकार इव समुत्पन्नं ज्ञानं प्रत्यक्षत्वेन स्वीकरोति, तस्य व्यवस्थावादिता इत्थमनुभूयते यत् यदा प्रत्यक्षेन नीलसादृश्यमुत्पद्यते तदा "नीलोऽयं घटः" इति आकारकं ज्ञानं व्यवस्थाप्यते। इत्थमनुमानज्ञानमपि नीलाऽऽकारादुत्पन्नम्।

सत् नीलत्वं बोधयत्येव अतः सादृश्यलक्षणद्वारा बुद्धेरेव प्रामाणिकता न तु प्रमाणादिनाम् ज्ञानादेव कस्यश्चिद्वस्तुनो हेयोपादेयता ज्ञायतेऽतस्तदपि ज्ञानं प्रमाणत्वेन स्वीकार्यमिति। वस्तु किमपि इन्द्रियाऽधारमधिकृत्य नैव ग्रहीतुं शक्यते यावत् तद्विषयिणी बुद्धिर्न स्यात्। इत्थं विलोकयामो यत् व्यवस्थावादिताकारणत्वात् बौद्धतर्कभाषा स्वीयं महत्त्वं स्थापयति।

वैज्ञानिकताऽपि बौद्धतर्कभाषायाः काचिद्विशिष्टा विशेषता, अत्र ग्राह्याकारिताऽपि बुद्धेः परिच्छेदस्तस्मादेव कारणात् अन्य व्यावृत्तवस्तुविशेषस्य परिच्छेदो भवति। सः परिच्छेद एव ज्ञानरूपफलस्यात्मवेदनं भवति। यदा परिच्छेदादेव आत्मवेदनं व्यवस्थाप्यते तदा निश्चितमेव फलभूतस्य आत्मवेदनस्य साधनं प्रमाणञ्च मन्स्यते। कस्यापि ज्ञानस्य प्रामाणिकता द्वयोस्तथ्ययोराधारे निश्चीयते तत्र प्रथमं ज्ञानं सम्यग्भवेत् तथा द्वितीयं ज्ञानस्य विषयः अपूर्वः स्यात्। यतोहि सम्यक्तवं नाम स्पष्टरूपेण असंवादिकत्वम्। असंवादिकं ज्ञानं तदुच्यते यत्र ज्ञातुर्ज्ञानद्वारा वस्तु प्राप्तिर्जायेत, यतोहि कस्यापि वस्तुनः सत्ता तस्यार्थक्रियाकारितयैव ज्ञातुं शक्यते। प्रयोजनं निष्पादकत्वं नामार्थक्रियाकारित्वम्। यथा-जलात्

तृप्तिरग्रेस्तापो वा भवति। कस्याश्चित् अर्थक्रियाया एकस्याः स्थानं द्वितीयाऽर्थक्रिया न गृहणाति। यथा घटः पटस्थानं न गृह्णाति। मोक्षाकरगुप्तेन प्रामाणिकतासम्बन्धिविवेचनमत्यन्तं सूक्ष्मेक्षिकया कृतमस्ति। तदनुसारं भिन्नता केवलं घटात् पटात् एव न प्रत्युत एक एव घटः भिन्न भिन्न-प्रयोजनानां निष्पादकत्वात् वैभिन्यं गृहणाति। वस्तुनो क्षणिकता अर्थक्रियाकारितया जायते। एतस्य नेदं तात्पर्यं यत् वस्तु विनश्यत्यपितु वस्तुनः सत्ता तिष्ठति परन्तु क्षणविशिष्टग्राहिताकारणात् हेयोपादेयतास्वरूपे बोधिताऽबोधितास्वरूपे च तिष्ठति, इदमेवाविसंवादि-ज्ञानमुच्यते। अस्मिन्नेवाधारे ज्ञानस्य प्रामाणिकता निश्चीयते। ग्रन्थ-स्यास्याऽवसानेऽपि लेखकेनेदं निर्दिष्टं यत् अनया रचनया यत् पुण्यार्जनं जातं तत् संसारस्य दुःखनिवृत्तये बुद्धत्त्वप्राप्तये च साधनीभूतं भवेदिति।

अनेनेदं स्पष्टीभवति यदस्या रचनाया उद्देश्यं निजस्वार्थः हितं वा नापितु लोककल्याणदृशा निरूपितेयमिति दिक्॥

☆

तृतीयोऽध्यायः

वैदिकतर्कभाषाकर्तुः केशवमिश्रस्य परिचयः—

मिथिलायाः श्रेष्ठनैयायिकेषु केशवमिश्रोऽन्यतम आसीत्। किन्तु यथाऽन्यग्रन्थकृद्भिः निजविषये न किमपि लिखितं तथैवानेनापि न कश्चन नैजः परिचयो निर्दिदेश। गोवर्धनमिश्रः यो हि केशवमिश्रस्य शिष्यः, सः गौतमीयतर्कभाषामाश्रित्य तर्कप्रकाशनाम्नीं टीकां लिखितवान्। टीकायामस्यामादावेव मंगलपद्ये तेन निर्दिष्टं यत्केशवमिश्रो नाम तस्य गुरुः। तच्च मंगलपद्यं यथा–

> "विजयश्री तनूजन्मा गोवर्धन इति श्रुतः।
> तर्कानुभाषां तनुते विविच्य गुरुनिर्मिताम्।।[१]

अत्र विविच्य गुरुनिर्मितामित्यस्यायमाशयो यत् गुरुणा पित्रा वा लिखिता तर्कभाषा। तत्र तृतीयचरणेनेदं ज्ञायते यत् गोवर्धनस्य पितुर्नाम बलभद्रः। तर्कभाषायाष्टीकानामनुक्रमणिकयेदं प्रतीयते यत्बलभद्रेणापि तर्कभाषायां तर्कप्रकाशनाम्नी टीका लिखिताऽऽसीत्।[२] आचार्य-विश्वेश्वरोऽपि तृतीयमंगलपद्येनेदं निर्धारितवान् यत् गोवर्धनस्य पितुर्नाम बलभद्रः भ्रातुर्नाम पद्मनाथमिश्रश्चाऽऽसीत्। किन्तु अनेन श्लोकानुशीलनेन गोवर्धनकृततर्कभाषापुष्पिकया इदं ज्ञायते यद्बलभद्रः गोवर्धनस्य पिता पद्मनाथस्तस्य ज्येष्ठभ्रातेति। तन्मंगलपद्यं यथा–

---

१. तर्कभाषाप्रकाशः गोवर्धनमिश्रः श्लोकः-२,

२. दि भण्डारकर इन्ट्रोडक्शन, पृ.२०

श्री विश्वनाथानुजपद्मनाभानुजो गरीयान् बलभद्रजन्मा।
तनोति तर्कान्नधिगम्य सर्वं श्रीपद्मनाभो विदुषः विनोदं॥

पुष्पिकायां च-यथा—

"इति श्री जगद्गुरुमिश्रबलभद्रात्मजविजयश्रीगर्भसम्भव-विश्वनाथानुजपद्मनाभानुजमिश्रगोवर्धनकृततर्कभाषाप्रकाशः समाप्त"॥

सुरेन्द्रलालगोस्वामिना तर्कभाषाया एकस्मिन् संस्करणे काचित् परम्परा समुल्लिखिता, तदनुसार केशवमिश्रो मिथिलायाः "सरिसोपाहि" ग्रामवास्तव्यंस्तथा अभिनववाचस्पतेः प्रपौत्रश्चासीत्। केशवमिश्रस्य काल-(तिथि) सम्बन्धे अनुमानाश्रय एव एक आधारः। असिद्ध-हेत्त्वाभाससन्दर्भे केशवमिश्रेण नामोल्लेखपुरस्सरमुदयनाचार्यस्य मतमुद्धृत-मस्ति।[१] अनेनेदं निश्चीयते यत् केशवमिश्रःउदयनाचार्यस्य उत्तरवर्ती। उदयनाचार्यस्य समयः दशमशताब्दी मन्यते। तर्कभाषायाः टीकाकाराणां कालनिर्णयमाश्रित्य केशवमिश्रस्य समयसीमा निर्धार्यते। तत्र तर्कभाषायाः प्राचीनटीकाकृत्सु "चिन्नंभट्ट" स्याभिधानं प्रामुख्यं भजतें, यद्यपि तेन केशवमिश्रविषये स्पष्टं न किमपि लिखितं किन्तु टीकायाः पुष्पिकायामिदं लिखितं यत् हरिहरमहाराजाऽश्रितश्चिन्नंभट्टः लिखितवान् इमां तर्कभाषाप्रकाशिकम्। इतिहासे "हरिहरबुक्कारायौ" भ्रातरौ निर्दिष्टौ स्तः। ययोः कालः-१३५०-१४०० ई. वर्षं मन्यते। इत्त्थं केशवमिश्रस्य समयः १०००-१४०० ईसवीयस्य मध्यवर्तिकालं मन्तुं शक्यते। केशवमिश्रस्य ज्येष्ठभ्राताऽपि एकः श्रेष्ठः नैयायिक आसीत्। तेन वैशेषिकदर्शने प्रशस्तपादभाष्ये उदयनाचार्यविरचितकिरणावलिष्टीका विशदीकृता। एतदतिरिक्तमपि तेन "किरणावलिप्रकाशः"-कणादरहस्यमुक्ताहाराख्यौ ग्रन्थौ लिखितौ।

वास्तविकं त्विदं यत् केशवमिश्रेण निजाग्रजात् मिश्रपद्मनाथात्तर्क-शास्त्रमधीतम्। नव्यन्यायप्रवर्तकस्य श्रीगंगेशोपाध्यायस्य शिष्यः "बर्द्धमानोपाध्यांयः" किरणावलिमाश्रित्य १२७५ ई. वर्षे "किरणा-

१. तर्कभाषा पृ. २७१

वलिप्रकाश" नामकं ग्रन्थं रचयामास। किन्तु पद्मनाभमिश्रः बर्द्धमानोपाध्यायस्य किरणावलिप्रकाशापेक्षयाऽऽत्मनः किरणावलि-प्रकाशस्य वैशिष्ट्यं प्रतिपादयामास। इदं न्यगदच्च यत् ये अर्थाः बर्द्धमानेन न स्पृष्टास्तादृशानां गुरूपदिष्टानां नवीनार्थानां प्रयोगं कुर्मः।[१] अनेन श्लोकेन इदं प्रतीयते यत् पद्मनामः केशवमिश्रस्य ज्येष्ठभ्राता, वर्द्धमानोपाध्यायस्य समकालीनोऽथवा किञ्चित्पश्चाद्वर्ती भवेत्। एतयोर्द्वयोरपि मैथिलविदुषोः समयः १२७५ ई. मन्यते। नव्यन्यायस्य मैथिलशाखायाः उद्‌भटो विद्वान् बर्द्धमानः स्वीक्रियते तस्य कालः १२७५ ई. तः पश्चादेव। तथैव केशवमिश्रस्याग्रजेन पद्मनाभेन यतः बर्द्धमानमिश्रस्य किरणावली-प्रकाशस्योपरि टीका लिखिता तस्मादेवेदं स्वीक्रियते यदेते त्रयोऽपि मैथिलविद्वान्सः आसन्। तथाह्येतेषां समयः १२७५-१४०० ई. वर्षपर्यन्तं यत्स्वीक्रियते तत्समकालीन एव। सुरेन्द्रलालगोस्वामिना निजतर्कभाषा-संस्करणे इदममानि यत् "द्वैतपरिशिष्टस्यापि लेखकः केशवमिश्रः एव। द्वैतपरिशिष्टे केशवमिश्रेण स्वपरमगुरोः "तत्त्वालोके" कृतमहार्णवे च प्रकटितविचाराणां समुल्लेखः कृतो यत् एतेषां ग्रन्थानां रचयिता अभिनववाचस्पतिः। केशवमिश्रस्य परमगुरुत्वेन यदि तस्य पितामहः श्रीवाचस्पतिमिश्रः स्वीक्रियते तदा न काचिदापत्तिः।

केशवमिश्रकृतगौतमीयतर्कभाषायाः विशेषताः—

न्यायशास्त्रं, यन्नामभारतीयदर्शनानां प्रवेशद्वारं तस्य प्रारम्भिकोऽयं ग्रन्थः तर्कभाषा, न्यायशास्त्रं कदा, कुत्र, कथञ्च प्रादुर्भूतमस्मिन् विषये किमपि विशिष्टं निरूपणं न प्राप्यते तथापि तद्प्रतिपाद्यविषयमननेन तदाविष्कारस्याभासो जायते। शास्त्रस्यास्य सम्पूर्णाऽपि शक्तिः वादजल्पादीनां स्वरूपपरिमार्जने परिष्कारे नियमने च व्ययीभूतेति प्रतीयते। वादि-प्रतिवादिभ्यां कथं स्वपक्षोपस्थापनं करणीयं, कया शैल्या करणीयं, कीदृश्यस्त्रुटयः पक्षं दौर्बल्यत्वेनोपस्थापयन्ति, वाददिवादस्य शैलीत्यादि

---

१. उपदिष्टा गुरुवचनैरस्पृष्टा वर्धमानेन।
किरणावल्यामर्थास्तिन्यन्ते पद्मनाभेन।
किरणावलीप्रकाशः

विषये विशदं निरूपणमस्ति कस्मिंश्चिन्महति भागे। एतदतिरिक्तं यः न्यायशास्त्रांशोऽवशिष्यते सः देहादिव्यतिरिक्तस्यात्मनः सत्तासाधने नियोजितः। अतएव न्यायस्य द्वावेव मुख्यप्रतिपाद्यौ विषयौ, शास्त्रस्यास्यानयोर्द्वयोर्मध्ये एकः विषयः साध्यत्वेनापरः साधनत्वेन स्वीकृतः। अत इदं सहजतया ज्ञातुं शक्यते यत् न्यायशास्त्रस्यादिमः सूत्रपातः आत्मवादनैरात्म्यवादयोस्संघर्षे तथास्य विकासः पारस्परिकवादविवादैरेवाभूत्। वस्तुतस्तु न्यायशास्त्रं मनुष्याणां विचारस्यैव परिशोधकं संरक्षकञ्चास्ति। किन्तु न्यायस्य प्रमुखं कार्यमस्ति प्रमाणतर्कैः कस्यापि सिद्धान्तस्य स्थापना। स्वसिद्धान्तानां परिष्काररक्षा प्रचारकार्येषु च मनुष्याणां सर्वोत्कृष्टसहायकत्वेन न्यायशास्त्रं प्रामुख्यं भजते। सामान्यतया तर्कभाषा न्यायशास्त्रस्य ग्रन्थः किन्त्वस्मिन् अन्यान्यपि शास्त्राणि चर्चितानि।

प्रस्तुतेयं तर्कभाषा न्यायवैशेषिकयोस्समन्वितस्वरूपं प्रस्तौति। इदमेव च कारणं येन न्यायवैशेषिके समानतन्त्रत्वेन स्वीकृते। इदानीमनुशीलयामो यत् किं तर्कभाषाया उद्देश्यम्? कथमस्यां केशवमिश्रेण न्यायवैशिकयोस्समन्वयं स्थापितम्? कानि कानि च चर्चितान्यस्मिन् शास्त्राणि? केषां समागमो व्यवच्छेदनं वा कृतमस्याम् इति।

तत्रावधेयं यत् यद्यपि न्यायवैशेषिकयोरुभयोरपि उद्भवः विकासश्च स्वतंत्र्येणाऽजायत तथाप्यनयोंरस्ति घनिष्ठः सम्बन्धः। उभेऽपि दर्शने माहेश्वर-सम्प्रदायस्यैवार्थात् अनयोरुभयोरपि प्रवर्तकऋषी शिवस्यावतारभूतसोमशर्मगुरोः शिष्यावास्ताम्।[१] महाभारतस्यैकेन सन्दर्भेणापीदं प्रतीयते यत् न्यायवैशेषिकयोर्घनिष्ठः कश्चन्नासीत् सम्बन्धः। तत्र न्यायविद् संयोगसमवायज्ञातृत्वेनाभिहितोऽस्ति।[२] चरकसंहितायां यत् न्यायवैशेषिकपदार्थानां निरूपणं कृतमस्ति तेन ज्ञायते यत्तदानीमुभयोरपि कश्चन मतभेदो नाऽसीत्। बौद्धपरम्परायां तु पञ्चमशताब्दीं यावत् न्यायं वैशेषिकञ्च पृथक्-पृथक् सत्तात्वेनास्ताम्। न्यायसूत्राणां वैशेषिकसूत्राणामनुशीलनेनेदं

---

१. भण्डारकरतर्कभाषा, इन्ट्रोडक्शन, पृ १०

२. विद्याभूषण पृ. ४३.

ज्ञायते यत् उभयोरपि सूत्रेषु बहुविधा समानता वर्तत एव।[1] आरम्भकालात् उभयोरपि घनिष्ठः सम्बन्धः आसीत् यश्चाद्यावधि वर्तत एव। वात्स्यायनेन वैशेषिकमिव मन इन्द्रियत्वेनाङ्गीकृतं,[2] सहैव तेन द्रव्यगुणकर्मसामान्य-विशेषादयः प्रमेयत्वेन स्मृताः।

उद्योतकरस्य वाचस्पतिमिश्रस्य च ग्रन्थेष्वाभ्यां कतिपय-वैशेषिकमतानि स्वसिद्धान्त इव प्रतिपादितानि सन्ति। पुनरग्रे उभयोस्स-मन्वितं रूपं प्रकरणग्रन्थ-माध्यमेन विकासितां गतम्। वैशेषिकसूत्राणां प्रणेता कणादऋषिर्वर्तते, अयं गौतमादतिप्राचीनः। सूत्राणामेषां प्रभावश्चरकसंहितायामपि दरीदृश्यते एव। अत एषां कालश्चरकसंहितातः प्राक्। कणादस्य वैशेषिकसूत्रे दश अध्यायास्सन्ति। प्रत्येकमध्याये द्वे द्वे आह्निके स्तः। वैशेषिकशास्त्रस्यारम्भः **"अथातो धर्मं व्याख्यास्याम"** इति वाक्येन भवति। तृतीयसूत्रे द्रव्यादिषड्पदार्थानां तत्त्वज्ञानेन निःश्रेयस् सिद्धिर्भवतीति ज्ञापितमस्ति। केशवमिश्रेण तर्कभाषायाः अनेकस्थलेषु वैशेषिकसूत्राण्युद्धृतानि सन्ति। शब्दं वर्णयता तेन "संयोगात् विभागात् शब्दाच्च शब्दनिष्पत्तिरिति"[3] कथितं परन्तु वैशेषिकसूत्रस्य नामोल्लेखो न कृतः।

न्यायसूत्राणां कर्ता गौतममुनिरिति स्वीक्रियते। सतीशचन्द्रविद्या-भूषणस्यानुसारं न्यायसूत्राणामेकमेवांशं गौतममुनिः रचयामास तथाहि द्वितीयमक्षपादः। दासगुप्तेनापि न्यायदर्शनस्य अंशद्वयं स्वीकृतम्। तत्र प्रथमांशः आध्यात्मविद्या द्वितीयांशस्तर्कविद्या च।[4] वात्स्यायनभाष्यद्वारा इदमपि निश्चीयते यदान्विक्षीक्याः न्यायविद्यायाः अंगद्वयं-प्रमाणद्वारा अर्थपरीक्षा आध्यात्मविद्या च तेषां पृथक् वचनमन्तरेणाध्यात्मविद्या-मात्रमियं स्यात् यथोपनिषत्।[5]

---

१. १०, पदार्थसंग्रहः, पृ.१६,

२. न्यायभाष्यं-पृ. १-१४,

३. वैशेषिकसूत्रम्-२-२ ३१,

४. २७८,

५. न्यायभाष्यं-१-१-१,

इत्थं प्राचीनन्यायविकासे युगद्वयं प्रतीयते–आध्यात्मप्रधानयुगस्य प्रणेता गौतमः, प्रमाणप्रधानयुगस्य प्रणेता अक्षपादश्च।[1] दासगुप्तेन मेघातिथिरपि एकः आख्यानिको जनः मन्यते। परन्त्वाचार्यविश्वेश्वरेण महाभारतमाश्रित्य एते त्रयोऽपि एकत्वेन स्वीकृताः।[2]

न्यायदर्शने पञ्चाध्यायास्सन्ति। प्रत्येकमध्याये द्वे द्वे आह्निके स्तः। आदौ प्रमेयप्रमाणादयो निरूपितास्तेषां लक्षणं विवेचनञ्च विधायेदं निश्चितं यदेषां षोडशपदार्थानां तत्त्वज्ञानात् निश्रेयस्सिद्धिर्भवतीति। तर्कभाषायाः रचना केशवमिश्रेण प्रकरणग्रन्थरूपेण कृता। अत्र न्यायस्य मुख्य–मुख्य पदार्थाः र्विवेचिताः, परन्तु तेषां समस्तविषयाणां सांगोपाङ्गविवेचनं न कृतमस्ति। तर्कभाषायां प्रमेयनामके द्वितीयपदार्थे वैशेषिके प्रतिपादित–द्रव्यादिषड्पदार्थानामन्तर्भावोऽस्ति। अस्मादेवायं न्यायप्रधानः प्रकरण–ग्रन्थः स्वीकृतोऽस्ति। अत्रेदं विचार्यते यत् यदि गौतमेन न्यायसूत्रेषु इमे षोडशपदार्थाः निरूपितस्तेषां विवेचनञ्च विहितं तदा कैः कारणैस्तर्क–भाषायाः रचनायाः आवश्यकताऽऽपतिता। अत्र एवमुच्यते यत् सन्ति कानिचिद् वैशिष्ट्यानि यानि न सन्ति गौतमीये। तत्र प्रथममस्ति–समन्वयवादिता। यतोहि द्वादशशताब्दीतस्त्रयोदशशताब्दीं यावत् यस्मिन् काले केशवमिश्रेण रचितेयं तर्कभाषा तदानीं न्यायं वैशेषिकञ्च समन्वितरूपेण स्थिते आस्ताम्।

उभयोरपि सिद्धान्ता उत्तरोत्तरं विकासतां गताः, परिणामस्वरूपं न्यायदर्शनस्यानेकाः कृतयो वैशेषिके,वैशेषिकस्य च कृतयो न्यायदर्शने परिगणिता अज्ञायन्त। यस्मात् उभयोरपि मौलिकभेदत्वादपि अविरोधिता प्रपूरकता चासीत्। यथा न्यायदर्शनस्य मूलमुद्देश्यमन्तर्जगतः ज्ञानतत्त्वानां समीक्षणं ध्यान–धारणादिद्वारा आत्मनः साक्षात्कारः, मनः साम्यावस्थाया अनेकोपायानां प्रतिपादनमस्ति तथैव वैशेषिकदर्शनस्यापि लक्ष्यमात्मनः आत्मेश्वरपदार्थानाञ्च साधर्म्यवैधर्म्यनिरूपणं, तेषां ज्ञानं तत्त्वज्ञानोपलब्धौ प्रकाशपातन्चास्ति। तथैव बहिर्जगतः, व्यापाराणां विस्तारेण समीक्षणं

---

१. हिन्दी–तर्कभाषा, भूमिका पृ. २७

२. महाभारतं शान्तिपर्व अ–२६३,४५ बंगवासी

परीक्षणञ्चोद्देश्यमस्य। इदं द्रव्यगुणकर्मसामान्याभावादिसप्तपदार्थानां तत्त्वज्ञानोपलब्धौ आवश्यकं मन्यते। द्रव्याणि नव द्रव्यगुणकर्माणि च एतदाश्रितानि। कर्मसंयोगात्समवायं उत्पद्यते। नानारूपधारिणां वस्तूनां वैविध्याय विशेष आवश्यकः। सामान्यविशेषयोरन्यपदार्थैस्सह सम्बन्ध-स्थापनाय समवायनामको नित्यः पदार्थः आवश्यको भवति। अभावनामाख्यः सप्तमः पदार्थः अनुष्ठानादिनिष्कामकर्मद्वारा मोक्षप्राप्त्यै प्रेरयति। वस्तुतः तर्कभाषायास्सावधानतया अध्ययनेन वस्तुवादि-ताऽधिकतया दृष्टिगोचरतां गच्छति यतोहि न्यायवैशेषिके उभेऽपि जडजगतः आत्मनश्च वस्तुसत्तां स्वीकुरुतः। जडजगति पृथ्वीं परमाणुरूपां कार्यरूपां च स्वीकृरुतः। परमाणुसत्तासिद्ध्यर्थं क्रमेण द्वयणुकादीनां विवेचनं विधाय द्रव्योत्पत्तिविनाशञ्च वर्णयतः। किञ्च उभेऽपि धर्म-धर्मिणो भेदं स्वीकृत्य, धर्माद्भिन्नां धर्मिसत्तां मन्येते। उभेऽपि असत्कार्यवादिनि दर्शने। तथाहि उत्पत्तेः प्राक् कारणेषु कार्यसत्तामस्वीकृत्य समवायि-असमवायि-निमिञ्च स्वीकुरुतः तथा शरीराद्भिन्नमात्मानं संसिद्ध्य, आत्मानं महत्परिमाणं, विभुं, नित्यं प्रतिशरीरं भिन्नं स्वीकुरुतः। तथा इदमपि स्वीकुरुतः यदीश्वर एव जन्मादीनां कारणं धर्माऽधर्मयोर्नियन्ता, सृष्टिप्रलययोः कर्ता, वेदानां निर्माता चास्ति। उभयोर्न्यायवैशेषिकयोरनुसारं बन्धनमोक्षौ च यथार्थौ। उभयोरपि स्वीकारोक्तिः यत् पदार्थानां तत्त्वज्ञानेन मुक्ति-प्राप्तिर्भवतीति। वस्तुतः केशवमिश्रेण तर्कभाषाया रचनाद्वारा इदं ज्ञापयितुं प्रयासो विहितः यन्न्यायशास्त्रे ये षोडशपदार्थाः वर्णिताः तत् वर्णनं वैशेषिकस्य षड्पदार्थानां, पृथ्व्यादिनवद्रव्यानां, रूपरसादिचतुर्विंशति-गुणानां विस्तरेण कृतमस्ति। सहैव वैशेषिकमतविशिष्टं पाकजोत्पत्तिर्वि-भागजञ्च इत्थं।

द्वित्त्वे च पाकजोत्पत्तौ विभागे च विभागजे।
यस्य न स्खलिता बुद्धिस्तं वै वैशेषिकं विदुः॥

अत्र परमाणुसिद्धिं सम्यक् प्रदर्श्य परमाणुतः द्वयणुकादीना-मुत्पत्तिक्रमो दर्शितः, सहैव सृष्टेरुत्पत्तिसंहारप्रकियापि प्रशस्तपादरीत्या प्रदर्शिता। इत्थं वैशेषिकस्य प्रतिपाद्यविषयाणां न्यायपदार्थानां विवेचनेन

सह सामञ्जस्यं स्थापितम्। यद्यपि बहूनीदृशानि स्थलानि यत्रो-भयोर्मतवैभिन्यं दृश्यते तर्कभाषायां केशवमिश्रेण उभयोरभिन्नमेव स्वरूपं प्रदर्शितम्। इत्थं "समन्वयवादिता केशवीयतर्कभाषायाः विशिष्टा विशेषता वर्तते।"

मोक्षवादिता—

मोक्षवादिता नाम वैदिकतर्कभाषायाः द्वितीया विशेषता, यतोहि प्रकरणग्रन्थत्वात् तर्कभाषेयं न्यायवैशेषिकमनुसरति। यतोहि नैयायिकैरपि इदं स्वीक्रियते यत्प्रमाणप्रमेयसंशयादीनां तत्त्वज्ञानेन निश्रेयस्सिद्धिर्भवति अतो यावत् सिद्धिरपि न जायते। एतेषां सम्यग्ज्ञानञ्च उद्देश्यलक्षण-परीक्षाभिरेव भवति। नाममात्रेण पदार्थकथनं इति कथ्यते। असाधारणधर्मो लक्षणमिति कथ्यते यथा-सास्नादिमत्त्वं गोर्लक्षणत्वम्। यस्य लक्षणं क्रियते तल्लक्षणमुचितमनुचितं वेति विचारः परीक्षा। अतः प्रमाणादीनां तत्वज्ञानाय लक्षणपरीक्षे आवश्यक्यौ। इत्थं लक्षणपरीक्षाऽऽधारे यदि वयं षोडशपदार्थानां तत्त्वज्ञानं कुर्मस्तदाऽस्माकं निश्रेयस्सिद्धिर्भवतीति नैयायिकानां सिद्धान्तः।

एवमेव वैशेषिकेऽपि कणादेन आदौ शास्त्राणामध्ययनेन समस्तपदार्थानां तत्त्वज्ञानेन, विषयाणामवलोकनेन, मोक्षेच्छुकेण योगशास्त्रानुसारं ध्यानमननाभ्यां परिपक्वात् आत्मसाक्षात्कारकारकाणाम् अविद्यानाशेन निष्कामकर्मणा, अनुष्ठानसम्पादनेन धर्माऽधर्मसंस्काराणा-मुत्पत्तिर्नैव भवतीत्यभाणि। अतएव धर्माऽधर्मयोरनुपार्जका योगशक्त्या तद्विज्ञाय तत्त्वज्ञानं समवाप्य च रागद्वेषं नैव स्थापयन्ति। पूर्वकर्मणां समाप्त्यनन्तरं वर्तमानशरीरस्य नाशे सति नूतनशरीरधारणेन एकविंशतिप्रकारकदुःखानामात्मना सह सम्बन्धेन धर्माऽधर्मयोरभावः नैव जायते। एषामेकविंशतिप्रकारकदुःखानां विनाश एव वैशेषिकदर्शने मोक्ष इति निगद्यते। इमानि दुःखानि सन्ति-शरीरम्-इन्द्रियाणि।

षड्विषयाः, षड्ज्ञानानि, सुखदुःखानि च मनुष्येषु मुख्यरूपेण गौणरूपेण वा तिष्ठन्ति। एभ्य आत्यन्तिकनिवृत्तिरेव मोक्ष इति उच्यते।[1]

---

१. *तर्कभाषा, पृ. २३२,*

अतएव केशवमिश्रेण न्यायवैशेषिकयोस्समन्वयद्वारा तर्कभाषा रचिता। एतयोरुभयोरपि चरमोद्देश्यं मोक्षप्राप्तिरेव, उभयोरपि एकमेवाभिमतं यत् पदार्थानां तत्त्वज्ञानेन निश्रेयस् सिद्धिरिति। वस्तुतः मानवजीवनं द्विविधप्रेरणयोद्भावितं भवति, तत्र प्रथमा भौतिकी आवश्यकताभिस्सह सम्बन्धं स्थापयति, द्वितीया च लौकिकादर्शान् प्रति गच्छति। मानवजीवनं भौतिकपरिस्थितीनां बन्धनेनाऽबद्धमस्ति यस्मान्मोचनमेव मोक्ष इति उच्यते। निश्रेयसः चार्थः अस्ति मानवजीवनस्य महत्कल्याणं यस्मादधिकं किमपि कल्याणं न भवेत्। परन्तु भ्रमवशात् इदमपि ज्ञायते यदीश्वरप्राप्तये परलोकस्य कस्याश्चिदुच्चावस्थायाः प्राप्तेः कश्चन धार्मिकादर्शः नास्ति प्रत्युत मानवजीवनस्य भौतिकाऽवश्यकाभ्य् इतर एकोऽलौकिकाऽदर्शो वर्तते, यः प्रत्येकं जने सर्वेषु कालेषु सर्वास्वस्थासु च तिष्ठतीति। मानवजीवनस्य द्विविधे आवश्यकते। सांसारिक-अवस्थायाः पूर्त्तिः विज्ञानसम्बद्धं कार्यम्, अलौकिकतत्त्वानामन्वेषणञ्च दर्शनविषयः। मानवजीवनस्य अभ्युदयनिःश्रेयसाख्ये द्विविधे लक्ष्ये भवतः। अभ्युदयस्यार्थः सांसारिकी उन्नतिः निःश्रेयसश्च अलौकिकादर्शः। यथा वेदत्रयाणामध्ययनं यज्ञयागादिसम्बद्धं ब्राह्मणसम्बद्धञ्च। दण्डनीति अर्थात् युद्धविधा या राजनीत्या सज्ञा च सम्बद्धा। वाणिज्यं कृषिकार्येण सह सम्बद्धम्, परन्तु चतुर्थी याऽऽन्वीक्षिकी विद्या सा तु दर्शनशास्त्रसम्बद्धा। अस्मादेव कारणात् न्यायोद्देश्यं तर्कविद्यासिद्धिः अनुमान-सिद्धिश्च।

अतः केशवमिश्रेण प्रमाणादीनां वर्णनमपि कृतं तथाहि वैशेषिकस्य संसारस्य दृश्यमानद्रव्यगुणकर्मादिसप्तपदार्थानां यथार्थज्ञानात् निश्रेयस्सिद्धिरपि घोषिता।

निष्पक्षता—

केशवमिश्रकृततर्कभाषायास्तृतीयविशिष्ठता निष्पक्षताऽपि उद्धरणी-यैव। महर्षिणा गौतमेन यस्य न्यायस्य रचना कृताऽऽसीत् सा प्रमाणप्रधाना सत्यपि पक्षपातपूर्णाऽऽसीत्। अतएवं तत्र अंन्यविषयाणां समागमं सम्प्रदायविशेषस्य सिद्धान्तं पक्षं विपक्षं वा न विचार्य केवलं व्यक्तिगतदृष्टिकोण एव विलोक्यते। यतोहि न्यायशास्त्रं स्वसाध्य-

प्रधानावस्थायां प्राचीनस्वरूपे वा आन्वीक्षिकीरूपे एव ज्ञायते। विश्लेषण-माधारीकृत्य एतद् वक्तुं शक्यते यच्छब्दस्यास्य अन्तः आत्मानवीक्षणदृष्टिः स्पष्टं परिलक्ष्यते। आन्वीक्षिकी-शब्दस्यार्थं भाष्यकार इत्थञ्चकार- "**प्रत्यक्षागमाभ्यामीक्षतस्य अन्वीक्षणमन्वीक्षा तया प्रवर्तते इत्यान्वीक्षिकी न्यायविद्या न्यायशास्त्रम्**"। अर्थात् प्रत्यक्षयोगि-प्रत्यक्षद्वारा, आगमः-आप्तवचनद्वारा परिज्ञातार्थस्य आत्मतत्त्वस्य युक्तिद्वारा लौकिकपुरुषाणां परिज्ञानप्राप्तिरन्वीक्षा, अन्वीक्षाऽऽधारे प्रवृत्ता विद्या आन्वीक्षिकी अथवा न्यायशास्त्रम्। परन्तु स्वनिष्पक्षस्वरूपे आन्वीक्षिक्याः रूपं परिवर्त्य साधनप्रधानत्वमारोपितम्। फलस्वरूपं वादविद्या, न्यायविद्या, तर्कविद्यादिस्वरूपमस्या अजायत। तत्र च जयपराजयौ वादि-प्रतिवादिनावपि च प्रादुर्भूतौ। सहैव विषयप्रतिपादकस्य पञ्चावयवयुक्तस्यानुमानवाक्यस्य शैली आविष्कृता। प्रतिज्ञाहेतूदाहरणानि पृथक् पृथङ् निर्देश्य परार्थानुमानस्य शैली समुपस्थापिता। तत्र केशवमिश्रेण हेत्त्वाभास-जातिनिग्रहस्थानानि सम्यक् परिष्कृत्य अस्माकं समक्षं समुपस्थापितानि। यस्य परिणामस्वरूपं निष्पक्षरूपेण साध्यप्रधान-मात्मान्वीक्षणं गौणतां, साधनप्राधान्यं न्यायशास्त्रञ्च प्रमुखतामभजत। तेन न्यायस्वरूपमित्त्थं जातं-"**प्रमाणैरर्थपरीक्षणं न्यायः**"। अतः केशव-मिश्रस्य तर्कभाषाया इयं विशेषता यन्मिश्रोऽयं गौतम इव सूत्रक्रमानुसारिन्यायशास्त्रं न प्रवर्तयामास प्रत्युत प्रमाणपरीक्षितं न्याय-शास्त्रमनेनोपस्थापितम्। तर्कभाषायाः अस्या इदमप्येकं वैशिष्ट्यं यत् यत्र न्यायवैशेषिकयोर्मतभेदो दृश्यते, तत्र किमप्येकमेव मतं सिद्धान्तत्वेन व्यवस्थापितमस्ति, तथाहि न्यायवैशेषिकयोर्भेदत्वं नैव परिलक्ष्यते। प्रसङ्गवशात् बौद्धमीमांसावेदान्तादिदर्शनानां निराकरणमपि कृतमस्ति यथा मीमांसायाः कारण - लक्षण - प्रमाणलक्षण - ज्ञाततासिद्धान्त - स्वतः-प्रामाण्यवाद-अर्थापत्ति-अभवप्रमाणान्तरतादिविषयाः स्पष्टरूपेण निराकृतास्सन्ति। तत्र बौद्धानां प्रत्यक्षमतमपोहत्वक्षणिकत्वप्रमाण-पुञ्जत्वादीनां परिहारोऽपि कृत एव। सहैव येऽवस्तु-वादिनः विज्ञानवादिन वेदान्तवादिनस्सन्ति, ये ज्ञानाद् ब्रह्मणो वा प्रत्यक्षसत्तां निवारयन्ति तेषामपि

मतांन्यत्र निवारितानि खण्डितानि च सन्ति, फलतः ग्रन्थोऽयं निष्पक्षः स्वतंत्रश्च वर्तते। अतः निष्पक्षता नाम केशवमिश्रकृततर्कभाषायाः अद्वितीयं वैशिष्ट्यं वर्तते।

यथार्थवादिता—

यथार्थवादिता, ग्रन्थस्यास्य चतुर्थं वैशिष्ट्यं वर्तते। यतोहि केशवमिश्रेण स्पष्टमिदमत्र स्वीकृतं यदुद्देश्य-लक्षण-परीक्षाद्वारा प्रमाणप्रमेयादिषोडश-पदार्थानां यथार्थज्ञानेन निश्रेयसप्राप्तिर्भवतीति। अत्र प्रमाणादारभ्य निग्रहस्थानपर्यन्तं द्वन्द्वसमासो वर्तते, येषां स्वरूपज्ञानं तत्वज्ञानमित्युच्यते। मिश्रमहोदयस्य दृष्टौ तत्त्वज्ञानं सम्यग्ज्ञानमितिं वर्तते। श्रवणमनननिदिध्यासनानि तत्त्वज्ञाने साधनानि सन्ति। शास्त्रतो गुरोर्वा तत्त्वज्ञानं श्रुत्वा मननं कृत्वा निदिध्यासनद्वारा यत्साक्षात्कारात्मकं ज्ञानमुत्पद्यते तत्तत्वज्ञानत्वने गृह्यते। तदेव च निश्रेयस्साधनमिति कथ्यते। निश्रेयसस्तात्पर्यं मोक्ष इति। यद्यपि संसारे बहुविधानि निःश्रेयांसि सन्ति परन्तु निश्चितं श्रेयः-निश्रेयस्[१] इति व्युतपत्या अस्यार्थः मोक्ष इति गृह्यते। अत्र केशवमिश्रेणेदं सम्यग्बोधितं यत्प्रमाणादीनां यथार्थज्ञानेनैव मोक्षप्राप्तिर्भवतीति। तत्त्वं ज्ञायतेऽनेनेति व्युत्पत्त्या तत्त्वज्ञानस्यार्थः शास्त्रज्ञानमपि भवति, अभिप्रायोऽयमिति यत् तत्वज्ञानाज्झटिति मोक्षप्राप्तिर्नापितु तत्वज्ञानात्प्रथमं मिथ्याज्ञाननिवृत्तिस्तदनु दुःखादीनां नाशस्तदनु मोक्षप्राप्तिरिति, यथा वा केशवमिश्रेण न्यायशास्त्रानुसारं स्वग्रन्थे उद्धृतमस्ति।[२]

वैदिकतर्कभाषायामिदं स्वीकृतं यत् प्रमाणद्वारा उत्पन्नस्य पदार्थज्ञानस्य प्रमात्वमप्रमात्वं वा यथार्थतस्तदैव ज्ञातुं शक्यते यदाऽस्माभिरिदं स्वीक्रियेत यन्निर्विकल्पकप्रत्यक्षातिरिक्तं सर्वं ज्ञानं यथार्थाऽयथार्थज्ञानमिति द्विविधम्। यथार्थज्ञानं प्रमाऽथवा प्रमाणशब्देन तथाहि अयथार्थज्ञानमप्रमाऽथवाऽप्रमाणशब्देन व्यवह्रयते। यदा यथार्थ-ज्ञानं प्रमापदेनाभिधीयते तदा तस्य असाधारणं धर्म प्रमात्वमिति, तथाहि यदा इदमेव प्रमाणशब्देनाभिधीयते तदा तस्याऽसाधारणधर्मः प्रामाण्यमिति कथ्यते। प्रामाण्यमप्रामाण्यमित्युभेऽपि व्यवसायपदेन कथ्येते आश्रयमूलधर्मस्य।

---

१. *न्यायवृत्तिः - १-१-१,* २. *दुःखजन्यप्रवृत्तिदोषमिथ्याज्ञानमित्यादि,*

प्रत्येकं व्यवसायः प्रतिकूलत्वादनुव्यवसायात्मकमानस-प्रत्यक्ष-मित्युच्यते। परन्तु तस्य प्रामाण्याऽप्रामाण्ये अनुव्यसायपदेन न गृह्येते अपितु अनुमानपदेन तयोर्ग्रहणं भवति। यथा सरोवरे जलं विलोक्य पिपासुः कश्चन जनस्तत्र गच्छति, जलपानेन स्वपिपासानिवृतिञ्च करोति तदा जलपाने कृतप्रयासस्य साफल्यं विलोक्य सः अनुमिनोति यज्जलविषयमिदं मे ज्ञानं प्रमाणं, सफलप्रवृत्तिजनकत्वात्। परन्तु यदि कश्चन जनः मरुस्थले भास्वत्सैकतकैतवादिदञ्जलमिति मुग्धस्सन् निजपीपासां प्रशमयितुं तत्र प्रयतते, अप्राप्ते चाऽत्र जलेऽसौ अनुमिनोति यदिदम्मे जलविषयकं ज्ञानमप्रमाणम-सफलप्रवृत्तिजनकत्वात्तदा तस्य तज्ज्ञानमप्रमा तथा तदसाधारणधर्मः अप्रमाण्यमिति दिक्।

इत्थं निश्चितं यत् यथार्थवादिता ग्रन्थस्यास्य चतुर्थं वैशिष्ट्यम्।

वैज्ञानिकता—

तर्कभाषाया इदं पञ्चमं वैशिष्ट्यम्। वाह्यजगतो निरूपणं केशवमिश्रेण द्रव्यगुणकर्मादिसप्तपदार्थरूपेण कृतम्। यदि सूक्ष्मतया विलोक्यतेऽयं प्रसङ्गस्तदा इत्थमनुभूयते यत् प्रसङ्गस्यास्य कश्चन्नंशो दार्शनिकः कश्चन च भौतिकविज्ञानसम्बद्धो वर्तते। द्रव्यगुणादिपदार्थानां विभाजनमेका दार्शनिकी प्रक्रिया। पृथ्वीजलादिचतुर्णां प्रकाराणां परमाणूनां निरूपणं, तेभ्यश्च स्थूलपदार्थोत्पत्तिर्भौतिकविज्ञानविषयः आधुनिकविज्ञानदृष्ट्या सर्वथाऽनुपादेयस्सन् ऐतिहासिकतां भजते। यदा घटपटादीन् पश्यामः तत्र रूपस्पर्शादीन् आन्दोलनक्रियाऽऽदीन्विलोकयामस्तदा मनसि प्रश्नोऽयमुदेति यत्किमेतेषु दृश्यमानधर्मस्तद्धर्माद्भिन्नः, घटापटादिरूपे तयोः पृथकताऽथवा एकत्वम्। व्यक्तेः सामान्यबुद्धिरपि इदमनुमिनोति यत्पटत्वं नाम वस्तुत्वं यत्र रूपस्पर्शादयो गुणाः वर्तन्ते। परन्तु दृश्यमानरूपस्पर्शादिगुणेभ्यो भिन्ना वस्तुनः का सत्ता? प्रसङ्गेऽस्मिन् केशवमिश्रेणेत्थं न्यगादि यत् तत्परिस्थितौ अस्माकं बुद्धिर्वैज्ञानिकी सती पटरूपं पटत्वञ्च सहैव स्वीकरोति, यद्यपि तत्त्वत उभेऽपि भिन्ने। उदाहरणार्थं दूरदर्शनमेव पश्यन्तु—

यत्र विभिन्नानि यन्त्राणि भवन्ति, सर्वेषां सत्ता पृथक् पृथक् भवति तथापि समेषां समवेतरूपं नाम दूरदर्शनम्।

केशवमिश्रप्रणीतेयं गौतमीयतर्कभाषा न्यायवैशेषिकयोस्समिलित-प्रकरणग्रन्थत्वात् उभयोर्धर्मधर्मिणोस्सम्बन्धिनम्महत्त्वपूर्णं सिद्धान्तं प्रति-पादयति, यथा-पटपटरूपयोः समवाय सम्बन्धः तथैवान्यत्रापि। इत्थं वैज्ञानिकतापि अस्याः पञ्चमी विशेषता।

सुव्यवस्थावादिता: —

अथेदं विचार्यते यदा गौतमकणादाभ्यां प्रागेव न्यायवैशेषिकमाध्यमेन पदार्थविवेचनं सुष्ठु विवेचितमस्ति तदा पुनरपि तर्कभाषायाः काऽऽवश्यकताऽऽपतिताऽथवा पिष्टपेषणमेव। ननु "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति सिद्धान्तानुसारं मूर्खोऽपि विनाप्रयोजनं क्वचिन्नैव यतते, पुनः केशवमिश्रसदृशस्तार्किकः विनाप्रयोजनं कमपि ग्रन्थं कथं सम्पादयेत्। पुनश्च कस्मिंश्चित् कर्मणि कश्चन जनस्तदैव प्रयतते यदा तस्मिन् कृतिसाध्यता बलवती निष्ठाऽनुबन्धिता भवति। एते त्रयोऽपि गुणाः केशवमिश्रे आसन्नतस्तर्कभाषारचनाम्प्रति तस्य प्रवृत्तिरजायत। प्रयोजनस्य तात्पर्यमस्ति प्रयुक्ते प्रयोजयति वा प्राधान्येनाऽथवा प्रवर्त्यते प्रयुज्यते येन तत्प्रयोजनम् इति व्युत्पत्त्यनुसारं प्रयोजनशब्दस्यार्थः प्रधानप्रयोजक इति, कश्चिज्जनः यदुद्देश्यमधिकृत्य प्रयतते तत्प्रयोजनं प्रधानं प्रवर्तकं वेति। मनुष्यस्य समस्तप्रवृत्तौ मूलकारणं प्रयोजनम् अस्ति सुखप्राप्तिर्दुःखनिवृत्तिश्च। अतस्तस्य मूलभूतं प्रयोजनं यैस्साधनैः सम्पद्यते तत्प्रयोजनमित्युच्यते, परन्त्वेतत् न मूलभूतं प्रयोजनं प्रत्युत उपायात्मकप्रयोजनतां व्रजति। इत्थं तर्कभाषाकारः केशवमिश्रः न्यायदर्शनस्य षोडशपदार्थानाम्महत्तां प्रतिपाद्यैतन्निरूपयामास यत् यावत्तत्वज्ञानं न सम्पद्यते तावन्मोक्षप्राप्तिरसम्भवा एव। अतस्तर्कभाषाऽऽधारे न्यायशास्त्रप्रतिपाद्यपदार्थानां संक्षिप्तपरिचयेन सह मोक्षप्राप्तौ साधनीभूतं तत्त्वज्ञानञ्जायतेऽस्माकम्। तर्कभाषानुसारं प्रत्येकं ज्ञानस्य द्विविधं प्रयोजनं प्रथममनुकूलज्ञातार्थं प्रति ज्ञातुः प्रवृत्तिरथवा प्रतिकूलज्ञातार्थं प्रति ज्ञातुर्निवृत्तिः। किन्तु ज्ञानेनैतस्य प्रयोजनद्वयस्यापि निष्पादनं तदैव यदा तत्राऽप्रामाण्यं ज्ञानं न भवेत्, परन्तु यदा ज्ञानस्य अप्रामाण्यं निश्चयामस्तदा तस्मात् प्रवृत्तिनिवृत्तयोर्निश्चयो नैव जायते।

विरोधिज्ञानस्य प्रतिबन्धितापि ज्ञानस्य तृतीयं प्रयोजनं यथा भूतले घटज्ञानं भूतले घटाऽभावज्ञानस्य प्रतिबन्धकत्वं भवति। केशवमिश्रेण तर्कभाषायाञ्चत्वारि प्रमाणानि स्वीकृतानि तानि च- प्रत्यक्षानुमानोपमानशब्दाः। इमानि चत्वार्यपि अत्यन्तं सुव्यवस्थितानि, अतस्तर्कभाषायाः महत्वं सुव्यवस्थावादिताऽपि।

पुनश्च तर्कभाषामाध्यमेन अत्यन्तं सारल्येन प्रत्यक्षादीनां ज्ञानञ्ज्ञायते, तत्र सक्षात्कारिप्रमाकरणं प्रत्यक्षम्।[1] अर्थात् प्रत्यक्षं तावत्साक्षात्कारि-प्रमाम्प्रति करणत्वमस्ति। महर्षिणा गौतमेन प्रत्यक्षमित्थं निरूपितम्- **''इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षम्''**।[2] उदाहरणार्थमुभयोः प्रत्यक्षपरिभाषां विचार्य तर्कभाषायाः सुस्पष्टतां सरलताञ्च विलोकयामः- अत्र साक्षात्कारिपदेन अनुमानोपमानशब्दप्रमाणादिषु अतिव्याप्तिर्न भवति, यतोह्यनुमानादिप्रमाणैस्समुत्पन्ना प्रमा न तु इन्द्रियजन्या प्रत्युत सा प्रत्यक्ष एव। अथ साक्षात्कारिप्रमा अपि निर्विकल्पकसविकल्पकभेदाद्द्विविधा। तत्र निर्विकल्पकस्य अतएव प्राधान्यं यतोहि इयमेव समेषां व्यवहाराणां निमित्तं। सविकल्पकमपि अनुनिर्विकल्पकत्वान्महत्त्वपूर्णं ज्ञानम् इति-सिद्धमेव सविकल्पकस्य प्राधान्यम्। केशवमिश्रेण निर्विकल्पकस-विकल्पकमुभयमपि ज्ञानं प्रत्यक्षप्रमायाः अन्तर्गतमिति स्वीकृतम्।

एवमेव तर्कभाषाकारेण अनुमानमपि व्याख्यातम्। इह अनुमानं बोधयतां तेनाऽवादि—**''येन हि अनुमीयते तदनुमानम्''** अनूपसर्गपूर्वकं माधातुयोगे करणार्थकल्युट्प्रत्यये सति अनुमानशब्दसिद्धिः। अत्र अनोरर्थः पश्चात् मानार्थश्च ज्ञानमथवा प्रमा। अनुमानप्रमाणं प्रत्यक्षाऽगमाभ्यां पश्चात्प्रवर्त्तते यथोक्तम्—''प्रत्यक्षगमाश्रितमनुमानम्।''[3] अथानुमीयते इति पदस्यार्थो वर्तते अनुमितिरिति क्रियते, अतोऽनुमानप्रमाणस्य फलमनुमितिः, अनुमितिश्च प्रमा, तत्फलं यस्मादधिगम्यते तदनुमानम्। तर्कभाषाकारेण अनुमानस्यैकाऽन्यापि परिभाषा प्रदत्ता सा च—

---

१. न्यायसूत्रम् १.१.४.,

२. केशवमिश्रकृततर्कभाषा-पृ. - ५१

३. न्यायभाष्यम् - १-१-१,

"लिंगपरामर्शोऽनुमानम्" इति। "व्याप्तिबलादर्थज्ञापकं लिङ्गमित्युच्यते तथाहि लिंगस्य तृतीयं ज्ञानं परामर्श इति। यतोह्यनुमान-प्रक्रियायां लिंगज्ञानं त्रिबारं क्रियते। लिंगशब्दस्य व्युत्पत्तिर्यथा-"लीनमर्थं गमयतीति लिंगम्" अर्थात् यल्लीनम् अप्रत्यक्षमर्थं बोधयति तदेव लिङ्गमिति। अनुमानप्रक्रियायां त्रिवारं लिंगज्ञानं कथमिति चेत् महानसे धूमाग्निसाहचर्यं विलोक्य व्याप्तिनिश्चयः प्रथमलिंगज्ञानमथवा लिंगनिश्चयः, पर्वतादौ धूमावलोकनमेव द्वितीयं लिंगज्ञानम्, तदनु अग्निधूमयोर्व्याप्तिं संस्मृत्य पक्षे साध्यानुमितौ तृतीयं लिंगपरामर्शः यश्चानुमानमिति स्वीकृतम्। इत्थमेवोपमानशब्देति प्रमाणयोरपि वर्णनं तथैव विशदं कृतमस्ति।

यद्यपि नैयायिकाश्चत्वारि प्रमाणानि मन्यन्ते वैशेषिकास्तु द्व एव। तथापि चतुर्ण्णां मध्ये द्वयोरेवान्तर्भावः क्रियते न्यायप्रधानप्रकरण-ग्रन्थत्वात्। केशवमिश्रेण तर्कभाषायां सूत्रभाष्येऽनुसृते स्तः। न्याय-वैशेषिकं ज्ञानकर्मसमुच्चयौ मुक्तिसाधनत्वेनाङ्गीकृतौ। तदनु तर्कभाषायां श्रीमिश्रः चत्वारि प्रमाणानि, चतुर्ण्णामपि लक्षणानि, प्रमाणलक्षणं, करणलक्षणम्, कारणप्रकारं, निरूप्य अन्यान्नपि अवान्तरविषयान् निरूपयामास। ग्रन्थस्यास्य आदौ एव न्याये प्रवृत्तिनिवृत्त्यादिकं विचारितं, बहुषु स्थलेषु बौद्धादीनामपि समुल्लेखः कृतः। अनुमानसन्दर्भे व्याप्ति-स्वरूपम् स्वार्थपरार्थानुमानम्, अन्वयव्यतिरेकव्याप्तिं, द्विविधहेतून्, पञ्चविधत्त्वाभासान् सुष्ठु निरूपयामास। एवमेव शब्दप्रमाणसन्दर्भे आकांक्षा-योग्यता-सन्निधिं, पदस्वरूपञ्च निरूपयामास।

इत्थमस्माभिर्विलोक्यते यत् केशवमिश्रेण निष्पक्षरूपेण तर्कभाषा रचिता, तत्र न केवलं वैदिकगौतमीयन्यायस्य प्राधान्यमपितु बौद्ध-वैशेषिकसांख्यादीनामपि निष्पक्षतया खण्डनमण्डनं विहितमस्ति। वैशेषिकेण समन्वितरूपात् समानतन्त्रत्वाच्च प्रमाणनिरूपणानन्तरं प्रमेयान्यपि निरूपितानि, तानि च-आत्मा-शरीर-इन्द्रिय-अर्थ-बुद्धि-मन-प्रवृत्ति-दोष-प्रत्यभावफल-सुख-दुःख अपवर्गेति आख्यातानिं। प्रमायाः विषया एव प्रमेय-पदेन निगद्यन्ते। तथाहि प्रमायाः विषयाः असंख्यकाः। यतोहि वैशेषिकदर्शने द्रव्य गुण-कर्म-सामान्य-विशेष-

समवाय-अभावा इति सप्तपदार्थाः स्वीकृताः। अतः केशवमिश्रेण सप्तसु षड्पदार्थाः अर्थनामके प्रमेये व्यवस्थापिताः। तेषु पदार्थेषु यत्समवायिकारणं वर्तते तदेव द्रव्यं, यथा द्रव्यस्य लक्षणं कृतम्- **समवायिकारणं द्रव्यम्**। यद्यपि द्रव्यस्यैकमपरमपि लक्षणं गौतमेन स्वीकृतं-"गुणाश्रयो द्रव्यम्" इति। परन्तु एतस्मिन् विषये तर्कभाषाकर्तुः मते यदि "गुणाश्रयो द्रव्यम्" इति स्वीक्रियेत तर्हि प्रथमलक्षणे घटादयो (द्रव्यं) गुणस्याश्रयाः न भविष्यन्ति। अतःगुणस्याश्रयो द्रव्यमिति कथयितुं न शक्यते। अतो यत्समवायिकारणं तदेव द्रव्यमिति सिद्धम्। अथ यदि "कारणं द्रव्यम्" इति लक्षणं क्रियेत तर्ह्यतिव्याप्तिः प्रसज्जेत, यतोहि तदा इदं लक्षणं गुणकर्मणोरप्यन्तः संघटेत्। **"अलक्ष्ये लक्षणसत्त्वमतिव्याप्ति"** तन्निवारणाय लक्षणे समवायिपदप्रयोगः आवश्यकः।

अत्यन्तं सूक्ष्मपरिशीलनत्वादपि तर्कभाषायाः महत्ता सुविदिता एव। अस्याः रचनायां केशवमिश्रेण नीरक्षीरविवेकस्य प्रयोगः कृतः। इयं हि तर्कभाषा निजयथार्थ-वादिता-समन्वयवादिता-निष्पक्षताऽऽदिगुणैरपि निजां ख्यातिं द्विगुणयति। अस्याः विषये केशवमिश्रेण स्वयं घोषणा कृता वर्तते—

बालोऽपि यो न्यायनये प्रवेशम्
अल्पेन वाञ्छत्यलसः श्रुतेन।
संक्षिप्तयुक्त्यान्विततर्कभाषा
प्रकाश्यते तस्य कृते मयैषा॥

अनया उक्त्या सिद्ध्यति यत् न्यायशास्त्रे तस्य सिद्धान्तेषु च सौकर्येण सरलतया च प्रवेश एव ग्रन्थस्यास्य मुख्यं प्रयोजनमस्ति इति दिक्।

☆

चतुर्थोऽध्यायः

जैनतर्कभाषाकृद्यशोविजयस्य जीवन परिचयः-

जैनतर्कभाषाकृद्यशोविजयविषयेऽनेकाः कथाः किंवदन्तयः प्रचलितास्सन्ति परन्तु "सुजशबेलिमास"-नामाख्यग्रन्थस्योपबब्धत्वाद् बह्वीनां समाधानञ्ज्ञायते। ग्रन्थोऽयं प्राचीनगुजरातीभाषायां पद्यात्मको वर्तते। प्रणेता चास्य यशोविजयसमकालिकः "कन्तिविजयगणी" कश्चन श्रुतः। यशोविजयः "कलोले निकटस्थे" "कनोडू" नामके ग्रामे जनिं लेभे। पिता चास्य "नारायणः" तथाहि माता च "सौभागदेवी" आसीत्। अस्य विदुषः आरम्भिकाभिधानं "यशवन्त" इत्याऽसीत्। अस्यैकोऽनुजोऽपि "पद्मनामसिंह" इति श्रूयते। व्यवसायवृत्तिरस्य पितुरासीत्। कदाचि "न्नयविजय" नामाख्यः पण्डितः "पाटण" समीपस्थात् "कुणगेर" ग्रामात् कनोडुं प्राप्तवान्, सः अकवरप्रतिरोधन-जैनाचार्यहरिविजयसूरिणः शिष्यपरम्परया सम्बद्ध आसीत्। तदा खेलन्तावेतौ कुमारौ तमुपजग्मतुः, तस्योपदेशं निशम्य तमनुश्रितौ। पुनः १६८८ विक्रमे पाटणं प्राप्य हरिविजयसूरिणा दीक्षितावेतौ। तदानीं यशोविजयः दशवर्षीय आसीत्। यशोविजये बहुविधां प्रतिभां विलोक्य विजयदेवसूरिरस्मै महता परिश्रमेण विद्यां दीक्षाञ्चाऽदात्। असावपि दत्तचित्तयोग्यच्छात्रत्वेनाऽमूलचूलस्वरूपेण विद्यां दीक्षाञ्चाऽग्रहीत्। दीक्षायाः अनन्तरं यशवन्तः यशोविजयनाम्ना पद्मसिंहश्च पद्मनाभ (पद्मविजय) इति नाम्ना विख्यातिं गतः। १६९९ विक्रमे यशोविजयः अष्टौ अवधानानि विहितवान्, अस्य तथाविधप्रतिभाप्रभावितः कश्चन घनसूरिनामाख्यो व्यवसायी अध्ययनाय वाराणसीं प्रेषयितुं नयविजयं प्रार्थितवान् तथाह्यस्याध्ययने भविष्यद्व्ययस्य भारमपि स्वीकृतवान् तदा गुरुः एनमादाय वाराणसीं प्रस्थितः, काश्याञ्च कस्माच्चिदाचार्यान्न्याय-शास्त्रमधीतमनेन शास्त्रार्थो विहितः, विजये न्याय-विशारद इत्युपाधिना

विभूषितोऽसौ। साधारणतया इदं प्रचलति यन्न्यायाचार्यस्य उपाधिरपि गृहीतोऽनेन किन्तु सुजाशबेलिद्वारा कश्चिदप्यस्योल्लेखः न विहितः। काश्यामधीत्य चत्वारि वर्षाणि यावत् "आगरा" नगरे अध्ययनञ्चकार, पुनः अहमदावादं प्राप्य औरंगजेबसचिवसविधे अष्टादशावधानानि पूरितवान्। १७१८ विक्रमे विजयदेवसूरिशिष्येण विजयप्रभसूरिणाऽस्मै "वाचकोपाधिः" प्रदत्तः।

यशोविजयः विलक्षणबुद्धियुतस्तार्किको बभूव। ब्राह्मणतर्कान्ना-लोचयताऽनेन तत्र बह्वी त्रुटिः प्रदर्शिता अस्य कथनमासीत् यत् तर्कसागरोऽयनन्तो गभीरो दुष्पारश्च। तत्तर्कसागरस्य जलमपि अत्यन्तं क्षारमपेयञ्च। अस्य विदुषः व्यक्तित्त्वस्य महत् वैशिष्ट्यमिदमस्ति यत्पूर्व-पक्षोपस्थापने नैवासौ क्वचिदपि व्युत्क्रमते। अनेनेदं ज्ञायते यदस्याऽध्ययनं व्यापकं गभीरञ्चाऽऽसीत्। यतः कुतश्चिदनेन किमपि श्रुत्वा तस्य खण्डनं पर्यालोचनं वा न कृतम्। तस्य दृष्टिः सर्वान् प्रति समन्वयात्मिकाऽऽसीत्, फलतः दृष्टिरियमनेकान्तवादस्य मूलतां व्रजति। अस्य सम्पर्कः बहुभिः जैनेतरैः विद्वद्भिस्सह आसीत् तथाह्यनेन तत्तद्बहुविधानां दार्शनिकसमस्यानां समाधानमपि कृतमासीत्।

इत्थं यशोविजयस्य वैदूष्य-प्रतिभातार्किकबुद्धि-न्यायशास्त्र-ज्ञानापरशास्त्रज्ञानानां समीक्षा सूक्ष्मेक्षिकया विधीयेत चेत् तस्य प्रकाण्ड-वेदुष्यं पाण्डित्यं प्रतिभा च विस्मापयत्येव न्यायकान्तारमत्तद्विपान्निव विदुषः नृसिंहगर्जनोपमाभिर्गर्जनाभिः।

विलक्षणस्यास्य विदुषोऽन्तिमाः क्षणाः १७४३ ईसवीये वर्षे बड़ौदासमीपे उमाईग्रामे व्यतीताः, यत्राऽद्यावधि एतेषाञ्चरणपादुका स्थापिता वर्तते।

यशोविजयस्य कृतयः—

दार्शनिकत्वेनाथवा तार्किकत्वेन यदा यशोविजयस्य प्रादुर्भावऽभूत्तस्मिन् काले राजस्थान-गुजरात-पश्चिमोत्तरप्रदेशेषु यवनानां साम्राज्यमातंकश्चाऽऽसीत्। तस्मिन् काले तर्कः दार्शनिकप्रस्थानं दर्शनं वा केषाञ्चिद्विदुषां नैजा सम्पत्तिरासीत् या हि बंगाल-मिथिला-काशीः

यावत्सीमिता चाऽसीत्। यदि एकत्र साधारणजनता भक्तिरसे आकण्ठं निमग्ना सती मूर्तिपूजाऽऽडम्बरवादञ्च वर्द्धयन्ती दरीदृश्यते। तथाह्यन्यत्र जैनाः निवृत्तित्यागयोर्महत्त्वं वर्द्धयन्तः आसन्। समयेऽस्मिन् राजकुलेषु शृंगाररसस्य प्रधानता तुमुलायते स्म। एतादृग्विषमस्थितौ मरुस्थले सर इव यशोविजयः प्रादुर्बभूव। अथ तेन समेषामपि जनानां ध्यानं सम्प्रदाय-वादादपसार्य जनसामान्यं प्रति नियोजितम्। तत्त्वजिज्ञासुरिव सूक्ष्मनिष्पक्ष-दृष्ट्या अनेकान्तवादस्य प्रातिनिध्यमावहता तेनेदं ज्ञापितं यत् आवरणाऽऽवृत्तः प्रकाशः अन्धकारत्वं गच्छति एवमेव सत्यं सीमाबद्धं सदसत्यञ्जायते। ईदृशी स्थितिस्तदाऽऽयाति यदा वयं विरोधदृष्टिं न स्थापयामस्तदा असत्यमपि सत्यञ्जायते। यशोविजयस्य व्यक्तित्वं प्रखर पाण्डित्येन परिलिप्तं भावुकहृदयाऽऽबद्धञ्चाऽसीद्यतोहि सः तार्किकस्सन् कविः सहृदयोऽपि आसीत्। तस्य कृतयः संस्कृत-प्राकृत-गुजराती-हिन्दी इति चतसृषु भाषासु प्राप्यन्ते। गद्यपद्ययोरुभयोरपि अस्य समाना गतिः। विषयदृष्ट्या अस्य रचनाः नितान्तं व्यापकाः सूक्ष्माध्ययनप्रदर्शिकाः विलोक्यन्ते। आगमतर्कादतिरिक्ता अन्यविषयाऽश्रिता अपि रचनाः सन्त्यस्य, तासु कर्म-जीव-तत्त्व-आचारादिविषयकाः ग्रन्थाः आगमिक-साहित्ये परिगण्यन्ते। एवमेव प्रमाण-प्रमेयनयादि-आश्रिताः ग्रन्था-स्तर्कान्तर्गताः, मङ्गल-भुक्ति-आत्मा-योगादिविषयकाः ग्रन्थाः साधना-साहित्ये परिगृह्यन्ते। कृतयश्चास्य निम्नाः—

१. अध्यात्मपरीक्षा सोपज्ञटीका
२. अध्यात्मसारः
३. अध्यात्मोपनिषद्
४. अनेकान्तव्यवस्था
५. अध्यात्मिकमतदलनं सोपज्ञटीका
६. आराधक-विराधकचतुर्भङ्गी ,,
७. अष्टसाहस्रीविवरणम्
८. उपदेशरहस्यम् ,,
९. ऐन्द्रस्तुतिश्चतुर्विंशतिका सोपज्ञटीका

१०. कर्मप्रवृत्तिका
११. गुरुतत्त्वविनिश्चयः
१२. ज्ञानबिन्दुः
१३. ज्ञानसारः
१४. देवधर्मपरीक्षा
१५. द्वात्रिंशद्द्वात्रिंशिका सोपज्ञटीका
१६. धर्मपरीक्षा
१७. धर्मसंग्रहटीप्पणम्
१८. नयप्रदीपः सोपज्ञटीका
१९. नयोपदेशः सोपज्ञनयामृत–तरंगिणी
२०. यतिरहस्यम्
२१. निशामक्तप्रकरणम्
२२. न्यायखण्डखाद्यं वरीस्तवः
२३. न्यायाऽलोकः
२४. परमात्मपञ्चविंशतिका
२५. परमज्योतिपञ्चविंशतिका
२६. पातञ्जलयोगदर्शनविवरणम्
२७. प्रतिमाशतकम्
२८. भाषारहस्यम्
२९. मार्गपरिशुद्धिः
३०. यतिलक्षणसमुच्चयः
३१. योगविंशतिकाटीका
३२. वैराग्यकल्पलता
३३. योगदीपिका षोडशकवृत्तिः
३४. समाचारिप्रकरणं सोपज्ञटीका
३५. स्याद्वादकल्पलता शास्त्रावातसमुच्चयटीका
३६. स्तोत्राऽवलिः
३७. संख्येश्वरपार्श्वनाथस्तोत्रम्

३८. समीकापार्श्वनाथस्तोत्रम्

३९. आदिजिनस्तवनम्

४०. गौडीपार्श्वनाथस्तोत्रादि

४१. द्रव्यपर्याययुक्तिः

एतदतिरिक्ता अन्येऽपि अलभ्याः सभ्याश्च ग्रन्थाः प्रणीता अनेन। एतेषामवलोकनेनेदं ज्ञायते यत्तर्कक्षेत्रे सर्वाधिक कार्यं विहितमनेन। न्यायप्रदीप-तर्कभाषा-न्यायरहस्य-न्यायामृततरंगिणी - प्रभृतीनां ग्रन्था-नामवलोकनेन तस्य विलक्षणतार्किकबुद्धेः परिज्ञानञ्जायते। तर्कभाषा या लिता जिनसम्माने[1] रचिता, तस्याः प्रमाण-नय-निक्षेप इति त्रयोऽध्यायाः। यत्र क्वचिदनेन व्याप्तिविषयोऽपि विचरितः यत् संसारे जायमानस्य साधनस्य हेतुसमन्वयविषयं प्रत्यक्षं गमयति।

महावीरसम्माने प्रणीतो ग्रन्थः न्यायाऽलोकः, यत्र महावीर ईश्वरत्वेन वर्णितः। यत्र गत्वा सर्वेऽपि मुक्ताः सञ्जायन्ते।

न्यायखण्डनखाद्यं महावीरस्तवनाम्ना अपि उच्यते, अत्र महावीरस्य स्तुतिरपि विहिता, संख्या चात्र १०८ इति वर्तते। कालेऽस्मिन्नेव तर्कस्य गभीरसमस्यानां समाधानमपि कृतम्।[2] यशोविजयस्याऽधुनिकतर्कसिद्धान्त इत एवारभ्यते। अत्र तावदित्त्थं विचार्यते यत् सत्यां वैद्किकतर्कभाषायां बौद्धतर्कभाषायाञ्च काऽऽवश्यकताऽऽपतिता यया जैनतर्कभाषा पुनरपि नूतना काचिन्निर्मिता, अथवा किं तद्वैशिष्ट्यमस्याः यदियं ताभ्यां-विशिष्टा इति। अत्रोच्यते यत्तर्कोपयोगः स्वसिद्धान्तस्थापनाय परसिद्धान्तखण्डनाय च क्रियते सिद्धान्तभेदेन तर्कभेदोऽपि भवेत्। समेऽपि तर्का असहयोगि-सहयोगिरूपेण परस्परं वर्तन्ते। तुलनात्मकदृष्ट्या यदि विलोक्यन्ते एते तदा इत्त्थं प्रतीयते यदेतेषु ज्ञानप्रमाणस्वरूपयोः मतभेदो वर्तते। यतोहि न्यायवैशेषिके ज्ञानं गुणत्वेन स्वीकुरुतः, कोऽपि सम्बन्धत्वेन स्वीकरोति।

---

१. *ऐन्द्रदृष्टतमं नत्वा जिनं तत्त्वार्थदेशिनम्।*
प्रमाणनयनिक्षेपस्तर्कभाषा प्रकाश्यते॥

२. *ऐंकारचापरमाप्यकवित्वं वा उक्कासुरप्रभूयमङ्गभंगरङ्म्।*
सूक्तैर्विकासिकुसुमैस्तव वीर शम्भो रम्भो जयोस्मणयोर्वित॥

इत्थं ज्ञानस्य विविधाः परिभाषाः निरूपिताः, एवमेव प्रमाणस्वरूपेऽपि मतभेदः प्राप्यत एव। नैयायिकाः प्रत्यक्षानुमानोपमानशब्दान् प्रमाणत्वेन मन्यन्ते। बौद्धाः वैशेषिकाश्च प्रत्यक्षानुमाने, जैनाश्च प्रत्यक्षानुमानशब्दान् प्रमाणत्वेन स्वीकुर्वन्ति। इत्थमिदं पश्यामो यत् यावन्तो दार्शनिक-सम्प्रदायाः तावन्त एव तर्कप्रकाराः तथापि प्रामुख्येन तर्कशास्त्रं वर्गत्रये विभाजयामः वैदिकबौद्धजैनभेदात्। तत्र तावत् बौद्धसम्प्रदायान्वितं तर्कं बौद्धतर्कं, वेदानुकूलं वैदिकतर्कं, जैनसम्बन्धिनं तर्कं जैनतर्कमिति सम्बोधयामः।

विनयपिटकस्य चतुर्विधाधिकरणेषु विलोक्यते बौद्धतर्कस्य सूत्रपातः। तेषां विभागोऽयं विवादाधिकरणम्, अनुवादमधिकरणम्, आपत्ताधिकरणम्, किञ्चाधिकरणञ्चेति। एषां क्रमिकविकासोऽपि बौद्धदर्शनस्य चतुर्षु सम्प्रदायेषु विभक्तो वर्तते फलतः सौत्रान्तिक-वैभाषिक-माध्यमिक-योगाचार इति चत्वारः सम्प्रदाया अजायन्त। बौद्धन्यायस्य संस्थापकत्वेन दिङ्नागः स्वीक्रियता अनेन 'प्रमाण-समुच्चय' नामाख्यं ग्रन्थं विरच्य तत्र समस्ताक्षेपाणां समाधानं विहितमस्ति, सहैव वैदिकन्यायसिद्धान्ता अप्यालोचिताः दृश्यन्ते। अनेनैव कारणेन भारद्वाज-उद्योतकरेण वास्यायनमतरक्षायै न्यायवार्तिकमिति व्यरचि। उद्योतकरस्य मंतखण्डनाय स्वपक्षोपस्थापनाय च धर्मकीर्तिनां प्रमाणवार्तिकं रचितम्। धर्मकीर्तिप्रहारपीडितामुद्योतकरवाणीमुद्धारयितुं वाचस्पतिमिश्रेण न्यायवार्तिकतात्पर्यटीका[१] आलेखि। पुनः बौद्धनैयायिकैः 'न्यायवातिर्कतात्पर्यपरिशुद्धि' नामाख्यः ग्रन्थः प्रणीतः। इत्थं गौतमीय-न्यायवादिनो बौद्धन्यायवादिनश्च वादि-प्रतिदिरूपेण चिरकालं यावद-तिष्ठन्। तर्कभाषानाम्ना त्रयो ग्रन्थाः प्राप्यन्ते, तेषु प्रथमा मोक्षाकरगुप्तरचिता तर्कभाषा यस्याः कालः १११० ई. वर्षमिति स्वीक्रियते। तदनु बौद्ध-सिद्धान्तखण्डनाय गौतमीयन्यायप्रतिपादनाय च १२७५ ईसवीये वर्षे

१. *इच्छामि किमपि पुण्यं दुस्तरकुनिबन्धपंकमग्नानाम्।*
उद्योतकरगवीनामतिजरतीनां समुद्धरणात्॥
संसारजलधिसेतौ वृषकेतौ सकलदुःखसमहेतौ।

वैदिकतर्कभाषा केशवमिश्रेण लिखिता तथाहि जैनदृष्ट्या न्यायविवेचनार्थं यशोविजयेन १६०८-१६८८ ईसवीये वर्षे जैनतर्कभाषाऽलेखि। इत्त्थं पश्चाद्वर्तिनी रचना।

जैनचिन्तनेऽपि प्रमाणानां परम्पराबद्धं विवेचनमस्ति यतोहि 'उमास्वातिः' स्वीयतत्त्वार्थसूत्रमाध्यमेन सम्यग् व्यवस्थापयामास जैनदर्शनम्। तत्र निबद्धे श्लोकवार्तिके स्वार्थविषयनिश्चयज्ञानं प्रमाणम् इति निगदितम्-'**तत् स्वार्थव्यवसायात्मकं ज्ञानं मानमितीयता**'।[१] इदमेव तथ्यं शब्दान्तरेण सिद्धसेन इत्त्थमवादीत्-**स्वपरयोराभासकं बाधरहितं ज्ञानं प्रमाणमिति**।[२] वासुदेवयशोविजय-सूरिणोः प्रमालक्षणं तत्त्वार्थ-श्लोकसदृशमस्ति।[३] 'परीक्षामुखे' माणिक्यनन्दिना **अपूर्वोनार्थविशेषणं ज्ञानं प्रमाणमिति स्वीकृतमर्थात्**[४] स्वस्य अपूर्वार्थस्य अज्ञातविषयस्य निश्चयात्मकं ज्ञानं प्रमाणमिति। ऐतिहासिकदृष्ट्याऽवलोकनेन तथ्यमिदं समक्षमायाति यत् जैनतर्के प्रामाण्यवादिविषयको विचारः, आचार्य-शान्तरक्षितकमल-शीलयोर्मन्तव्यदिशा प्रवर्तितः। तत्त्वार्थसूत्रे प्रथम-वार्तिकलेखनत्वादाचार्यविद्यानन्दिः प्रथमजैनविचारकःस्वीकृतः। अनेन न्यायमतेऽनवस्थादोषं प्रदर्श्य ईदृक् पक्षोपस्थापनं कृतं यत्र समस्तदोषाणां परिहारः स्यात्। स्वमतं स्थापयता तेनेत्थं निगदितं यत् अभ्यासे प्रामाण्यं स्वतः, अनाभ्यासे च परतः इति।

यद्यपि जैनन्यायस्य विकासः चतुर्षु कालेष्वभूत् परन्त्वस्य मुख्यश्रेयोभागी मध्यकालीनोऽकलङ्कदेव एव। समन्तभद्रकाल इव अकलङ्कदेवकालेऽपि दार्शनिकानां निजनिजदर्शनप्रतिभायुद्धं प्रचल-दासीत्। एकतः कुमारिल-उद्योतकर-प्रभृतयो विद्वांसः स्वपक्षाऽरूढा आसन् अपरतः धर्मकीर्तिधर्मोत्तरप्रभृतयो बौद्धतार्किकाः। शास्त्रार्थस्य शास्त्रनिर्माणस्य च पराकाष्ठाऽऽसीत्। प्रत्येकं दार्शनिकः स्वपक्षाऽरूढस्सन्

---

१. तत्त्वार्थश्लोक-१.१०.७७,

२. न्यायवा.सू.-१.१,

३. प्र.न.व.-१.२, जैनतर्कभाषा-पृ.१

४. परी.-१.२,

विजयश्रियं कामयते स्म। तत्त्वसंरक्षणाय छल-जाति-निग्रहस्थानानां स्फुटप्रयोगः क्रियते स्म, तथाहि स च शास्त्रार्थस्याङ्गत्वेनाङ्गीक्रियते स्म। कालेऽस्मिन्नेव अकलङ्कदेवो महता प्रयासेन आरोपितस्याद्वादन्यायं परिष्कृतवान्,[१] अनेकांश्च नूतनान् ग्रन्थान् लिखितवान्। तेन लिखितेषु महत्त्वपूर्णग्रन्थेषु चत्वारो न्यायशास्त्रमनुसरन्ति ते च न्यायविनिश्चयसिद्ध-विनिश्चय-प्रमाणसंग्रह-लघीयस्त्रय इति। एते चत्वारोऽपि कारिकात्मकाः क्लिष्टाश्च वर्तन्ते। जैनतर्कस्य यत्स्वरूपमकलङ्कदेवेन विनिश्चितं तदेवानुश्रितवन्तः उत्तरवर्तिनः समेऽपि जैनतार्किकाः। इत्थं पश्यामो यत् जैनन्यायविकासः प्रभाचन्द्रकाले अथवा उत्तरकालेऽन्तिमामवस्थां प्राप्तवान्। कालेऽस्मिन् ग्रन्थानां स्वरूपं मौलिकं सत् व्याख्यात्मकञ्जातम्। अस्मिन्नेव च काले जैनतार्किको यशोविजयः प्रादुर्भूतः, येन अष्टसहस्त्र-विवरण-ज्ञानबिन्दु-जैनतर्कभाषादयो ग्रन्था लिखिताः।

यद्यपि जैनन्यायमधिकृत्य अनेके ग्रन्थाः लिखिताः किन्तु यशोविजयस्य तर्कभाषा कैश्चिदनुदितगुणैर्विशिष्टं स्थानं स्थापयति। अस्मादेव सत्योस्तर्कभाषयोः रचिताऽनेन तर्कभाषा।

अस्याः तर्कभाषायाः काश्चन विशिष्टाः विशेषताः निम्नाङ्कितास्सन्ति-

आदर्शवादिता—

यद्यपि यशोविजयेन तर्कशास्त्रमधिकृत्य अनेके ग्रन्थाः लिखिताः परन्तु तर्कभाषायाः रचनाऽनेन जिनसम्माने कृता। महावीरमीश्वरत्त्वेन स्वीकुर्वन्नसौ तथाप्युक्तवान् च-"**ईश्वरे सर्वं विलीयते, दुःखसुःखादीनां निष्पत्तिरपि तस्मादेव जायते** इतिं। न्यायखण्डखाद्ये महावीरस्य १०८ स्तुतयस्सन्ति। याः तर्कस्य गम्भीरसमस्यानां समाधानार्थमनेन कृताः तर्कभाषाया अवलोकनेन तस्याः वैशिष्ट्यं स्फुटरूपेण दृष्टिगोचरतां गच्छति।

---

१. *न्यायविनिश्चयकारिका-2,*

तार्किकदृष्टिप्रधानता—

जैनन्याये महावीरेण मीमांसायां ज्ञेयतत्त्वस्य चारितत्र्यस्य च समानमहत्त्वं ख्यापितं यतोहि प्राथमिकावस्थायां महावीरेण जैनन्यायस्य नवतत्त्वानि व्यवस्थाप्य तानि प्रति अचलश्रद्धायाः वर्णनं कृतमस्ति। अस्मादेव उमास्वातिद्वारा प्रस्तुते स्वशास्त्रे विषयरूपेण इमानि नवतत्त्वानि आधारीकृतानि, तेषां "तत्त्वार्थाधिगम" इति संज्ञा प्रदत्ता। नवत्तत्त्वानां मीमांसायां ज्ञेयप्रधानत्वं चारित्र्यञ्च समानत्वेन वर्णितम्। पुनश्च तदानीं विशेषचर्चां प्राप्तस्य प्रमाणमीमांसानिरूपणस्योपयोगिताऽनुभूता। अतः नवतत्त्वातिरिक्तज्ञानमीमांसायाः जैनन्यायस्य च रचना कृता। तत्र प्रथमेऽध्याये ज्ञानस्य, द्वितीये चतुर्थे पञ्चमे च ज्ञेयस्य। षड्भ्यो दशमं यावच्चरित्रस्य च निरूपणं कृतम्। तस्य ज्ञानमीमांसा इत्थं निरूपिता—

१. नयप्रमाणरूपाभ्यां ज्ञानविभाजनम्।

२. मह्यादि आगमप्रसिद्धपञ्चज्ञानस्य तथाहि तस्य प्रत्यक्षपरोक्षेति प्रमाणद्वयविभाजनम्।

३. मतिज्ञानस्योत्पत्तिसाधनस्य तयोः भेद-प्रभेदानां, तेषामुत्पत्तेः क्रमसूचक-प्रकारस्य विभाजनम्।

४. जैनपरम्परायां प्रमाणत्वेन स्वीकृतस्यागमशास्त्रस्य श्रुतज्ञानरूपे वर्णनम्।

५. अवधिप्रभृतीनां दिव्यप्रत्यक्षभेदप्रभेदानां पारस्परिकान्तरवर्णनम्।

६. ज्ञानस्य यथार्थताऽयथार्थकारणत्ववर्णनम्।

७. नयादिवर्णनञ्च।

महावीरन्याये तार्किकदृष्टिर्नैवावलोक्यतेऽपितु तत्र आगमिकदृष्ट्याः प्राधान्याम्। यशोविजयेन जैनन्यायस्य विकासःतार्किकदृष्ट्या विहितः। यतोहि स स्वयमपि विलक्षणबुद्धिसम्पन्नस्तार्किक आसीत्। तर्कभाषायां तेन स्वीकृतं यत्प्रमाणैः ज्ञातपदार्थस्तर्केण परिपोष्यंते, यत् प्रमाणं पदार्थान्नवगच्छति तर्कद्वारा तेषां स्थिरीकरणे महत्साहाय्यं प्राप्यते, अतएव स तर्कप्रामाणिकतां स्वीकृत्य तं सकलदेशीयमविनाभावरूपं व्याप्ति-ग्राहकममन्यत। व्याप्तिग्रहणञ्च प्रत्यक्षानुमानाभ्यां नैव भवितुं शक्नोति।

प्रत्यक्षद्वारा अतएव न यत् प्रत्यक्षं तावत् सम्बद्धं वर्तमानार्थं च गृह्णाति, अनुमानद्वारा अग्रहणे कारणं यत् यतोहि प्रकृत्यनुमानेन व्याप्तिग्रहणे अन्योन्याश्रयः, अन्यग्रहणे च अनवस्थादोषो जायेत। अतएव सः व्याप्त्यर्थं तर्कप्रमाणरूपेण न स्वीकृतवान्। अतएव जैन-तर्कभाषायाः तर्कभाषायाः द्वितीयं वैशिष्ट्यं तस्याः तार्किकदृष्टिरपि अस्ति।

यथार्थवादिता—

यथार्थवादिता नामास्यास्तृतीयं वैशिष्ट्म्। महावीर-अकलंक-विद्यानन्दसमन्तभद्रप्रभृतयो दार्शनिकाः यथार्थस्य यत्स्वरूपं निर्धारित-वन्तस्तन्माध्यमेनैव तर्कभाषायाः वैशिष्ट्यं ज्ञातुं शक्नुमः। जैनन्यायस्य पारम्परिकदृष्ट्या षट्खण्डागमे अष्टविधज्ञानस्य प्रतिपादनमस्ति[१]—

१. यत्र त्रिविधं ज्ञानं मिथ्यात्वेन, पञ्चविधज्ञानञ्च यथार्थत्वेन निरूपितम्।

२. कुन्दकुन्देन द्विविधं ज्ञानमुक्तं-स्वभाव-विभावज्ञानभेदात्, तत्राद्यं ज्ञानं केवलम्। द्वितीयस्य सम्यङिमथ्याभेदात् पुनरपि द्वैविध्यम्। कुन्दकुन्दाचार्येण निरूपणमेतदागमपरम्परामनुसृत्यैव कृतम्। तत्र समन्तभद्रेण स्वपरावभासकत्वं प्रमाणत्वमिति प्रमाणलक्षणं निरूपितम्, अर्थात् यत्स्वपरयोरवभासकं तत्प्रमाणम्। प्रमाणलक्षणमिदं सर्वथा मौलिकं नवीनं चास्ति। स्वरूपस्य स्वतो गतिः,[२] स्वरूपाधिगमते परम्'' अकलकेन क्रमशः स्वस्थाने आत्म परपदस्थाने च अर्थपदस्य समावेशः कृतः, अवभासपदस्थाने च ग्राहक इति पदं स्थापितं, परन्त्वर्थभेदेन समन्तभद्राकलङ्कयोर्मतभेदो नास्ति। केवलं शब्दानां व्यतिक्रमो वर्तते। अभिनवधर्मभूषणेन तत्त्वार्थसूत्रकारविद्यानन्द इव सम्यग्ज्ञानमेव प्रथमतः प्रमाणलक्षणं यथार्थज्ञानं वा स्वीकृतम्, परन्तु यशोविजयेन स्वतर्कभाषायां यथार्थस्य यत्स्वरूपं निर्धारितं तदित्त्थं प्रतिपाद्यते स्वपर-व्यसायिज्ञानं प्रमाणम्''. अर्थात् स्वपरयोर्निश्चयात्मकरूपेण ज्ञातज्ञानं प्रमाणमिति

---

१. धर्मकीर्तिप्रमाणवार्तिकम् २-४,

२. ,, २-५,

कथ्यते। स्वयमात्मा ज्ञानस्य एवं स्वरूपमित्यर्थः, किन्तु तस्मादन्योऽर्थः इति यावत् तौ व्यवस्यतः, यथास्थितित्वेन निश्चिनोतीत्येवं स्वपरव्यवसायि।

अत्र स्वपदस्य आत्मा अर्थात् ज्ञानस्यैव स्वरूपस्य अपरार्थो भवति ज्ञानादिभिन्नः पदार्थः। तात्पर्यमिदमस्ति यत् येन ज्ञानेन स्वस्वरूपस्य घटपटादीनां पदार्थानां निश्चितो बोधो जायते तज्ज्ञानं प्रमाणमिति कथ्यते। प्रमाणलक्षणे ज्ञानपदं दर्शनेऽतिव्याप्तिवारणाय प्रयुक्तं, व्यवसायिपदञ्च संशयविपर्यया-नध्यवसायेष्वतिव्याप्तिवारणाय। विदुषाऽमुना स्वशब्दं प्रयुज्य इदं ज्ञापितं यज्ज्ञानमज्ञातं न तिष्ठति न वा तद्बोधने ज्ञानान्तरस्याऽवश्यकतैव भवति। ज्ञानं स्वयं ज्ञातव्यमेव जानीते, परशब्देन इदं ज्ञायते यज्जगति केवलं ब्रह्मशब्दस्य ज्ञानमेव न पर्याप्तं प्रत्युत तद्भिन्नाः घटपटादयोऽपि ज्ञातव्यपदार्थास्सन्ति। वस्तुतः प्रमाणभूतं ज्ञानन्तदेव यत्परपदार्थमपि पदार्थत्वेन स्वीकुरुते। इत्थञ्जैनतर्कभाषायां यथार्थवादिता यथा यशोविजयसूरिणा निरूपिता न तथाऽन्यत्र क्वचित्। यतोह्यनेन यथार्थतायाः स्वरूपं केवलमलौकिकवस्तुष्वेव नान्विष्टं प्रत्युत घटपटादिषु लौकिकपदार्थेष्वपि प्रामाणिकप्रक्रिया निर्दिष्टा। पुनरनेन प्रत्यक्षपरोक्षभेदात् प्रमाणस्य द्वैविध्यं स्वीकृतम्। अक्षशब्दः इन्द्रियात्मनोर्वाचकः अतएव यज्ज्ञानमिन्द्रियात्मनोर्जायते तत् प्रत्यक्षमित्युच्यते, अभिप्रायोऽयं यत् स्पष्टं ज्ञानमेव प्रत्यक्षं ज्ञानम्। यज्ज्ञानञ्चास्पष्टं भवति तत्परोक्षमिति कथ्यते। प्रत्यक्षं द्विविधं सांव्यवहारिक-पारमार्थिकभेदात्। सांव्यवहारिकमिन्द्रयेण मनसा च व्यवहितात्मव्यापारसाहाय्येनोत्पद्यते अतएव इदमपि प्रत्यक्षमेव। तत्र सांव्यवहारिकमपि इन्द्रियजानीन्द्रियजभेदात् द्विविधम्। चक्ष्वादी-इन्द्रियेभ्यः समुत्पन्नं प्रत्यक्षम् इन्द्रियजम् इति कथ्यते। मनोजनितं प्रत्यक्षञ्च अतीन्द्रियजमिति।

इत्थमिन्द्रियजमनइन्द्रियञ्च मतिज्ञानश्रुतज्ञानभेदेन द्विप्रकारकं भवति। यज्ज्ञानमिन्द्रियमनोभ्यां समुत्पन्नं सत् अश्रुत्यनुसारि स्यात्तन्मतिज्ञानमिति कथ्यते। यच्च ज्ञानमिन्द्रियमनोभ्यां समुत्पन्नं सत् श्रुत्यनुसारि भवति। तत् श्रुतज्ञानमिति कथ्यते। मतिज्ञानमपि चतुर्विधम्-अवग्रह-ईहा-अपाय-धारणाभेदात्। पुनः अवग्रहस्यापि द्वौ भेदौ व्यञ्जनावग्रहः अर्थावग्रहश्च, येन

अर्थः अभिव्यज्यते अभिव्यञ्जनम्। व्यञ्जनस्यापि त्रिविधता यथा कदम्बपुष्प-गोलकादि आभ्यान्तरं निर्वृत्तिरूपेन्द्रियद्वारा शब्दादिविषयाणां ग्रहणे कारणीभूता शक्तिरूपकरणेन्द्रियमुच्यते व्यञ्जनञ्च। शब्दादिरूपे परिणतपुद्गलद्रव्याणां समूहोऽपि व्यञ्जनमिति कथ्यते। उपकरणेन्द्रिय-विषयोसम्बन्धोऽपि व्यञ्जनावग्रह इति कथ्यते, अत्र मध्यमपदलोपी-समासः। व्यञ्जनावग्रहस्यान्ते अर्थाऽवग्रहरूपा ज्ञानोत्पतिर्दृश्यते। इदं ज्ञानं तादृशं भवति यथा स्वप्नावस्थायां नानाविधचेष्टानामवलोकनेन ज्ञानानुमानं सञ्जायते। अतिसूक्ष्मत्वात् व्यञ्जनावग्रहकालीनं ज्ञानं न दृश्यते। स्वरूप-नाम-जाति-गुण-द्रव्यकल्पनारहितसामान्योपलब्धिरर्थाऽवग्रहः। अर्थात् यत्र केवलं सामान्यं प्रतीयेत विशेषो न तत्र अर्थावग्रहो भवति। अवग्रहद्वारा गृहीतानां सामान्यविषयाणां विशेषरूपेण निश्चयाय या विचारणा सा ईहेति। यथायं रज्जुस्पर्शः सर्पस्पर्शो वेति संशये सतीयं विचारणोत्पद्यते यदयं रज्जुस्पर्श एव, यतोहि यदि सर्पस्पर्शो भवेत्तदा कठोराघाते भूते सर्पद्वारा फूत्कारोऽपि भवेत्, इयमेव विचारणा सम्भावना वा 'ईहा' इति निगद्यते। ईहाद्वारा गृहीतस्य विशेषस्य किञ्चिदधिकमवधानम् एकाग्रतापूर्वक-निश्चयः 'अवाय' इति स्मृतः। कस्यापि वस्तुनः एकाग्रतापूर्वकनिश्चये जाते निश्चयस्य किञ्चित्कालं यावत् विद्यमानता पुनः विषयान्तरे गमनत्वात् लुप्तता कमपि संस्कारं त्यजति, पुनः तथायोग्यं निमित्तमवाप्य विषयस्मरणं जायते। पुनर्निश्चयद्वारा संस्कारजन्यस्मरणं धारणापदेन व्यपदिश्यते। इत्थं प्रत्येकं ज्ञानं वस्तुप्रकाशनेन सहात्मानमपि प्रकाशयति तत्प्रकाशनार्थञ्च ज्ञानान्तरं नापेक्षते। यथार्थज्ञानं प्रदीप इव भवति, अस्मादेवकारणात् प्रमाणस्य यथार्थतायै यशोविजयेन स्वशब्दप्रयोगो विहितः। अद्वैतवेदान्तस्य बौद्धानाञ्च योगाचारपरम्पराः बाह्यं जगन्मिथ्यात्त्वेन स्वीकुर्वन्ति, तेषां दृष्टौ प्रतीतिरियमसत्या परन्तु जैनतार्किकैः बाह्यजगतः स्वीकारे परशब्दः सन्निविष्टः। यद्यपि अन्यजैनतार्किकैः प्रमाणफलं स्वत्वेन परत्वेन च स्वीकृतं परन्तु यशोविजयेन यथार्थतासिद्धये केवलं स्वशब्दस्योल्लेखः कृतः। प्रतीयते यत्तन्मते ज्ञानस्य अर्थप्रतिभासनमादाय प्रकाशनमेव फलम्। तत्रार्थज्ञानयोः प्रतिभासनं भिन्नं भिन्नं न अपितु ज्ञानमेव

साकाररूदशायां प्रतिभासते। यथा वयं दर्पणे प्रतिबिम्बं पश्यामः, दर्पणे प्रतिबिम्बच्छाया कारणम्, प्रतिबिम्बयुक्तदर्पणस्य प्रतिभासनं फलं, प्रतिभासनेऽस्मिन् प्रतिबिम्बस्य स्वातन्त्रयं नैव तिष्ठति। जैनदर्शनं बाह्यं जगत् मिथ्या न मन्यते तथापि तत्र इन्द्रियमनोभ्यां सञ्जातं ज्ञानं सांव्यवहारिक-प्रत्यक्षं तथाहि आत्मना समुत्पन्नं ज्ञानं पारमार्थिक-प्रत्यक्षमिति कथ्यते। यशोविजयेन अस्य स्वरूपमित्त्थं प्रदर्शितं समीचीनव्यवहारकारणत्वादिदं सांव्यवहारिकप्रत्यक्षम्।

वस्तुनः साक्षात्प्रतीतिमतिरिच्य यतः परोक्षप्रतीतिर्जायतेऽतएव अनुमानस्य परोक्षत्वम् उदाहरणं यथा-वयं धूमं दृष्ट्वा अग्निमनुमिनुमः। इत्त्थं सांव्यवहारिकप्रत्यक्षे आत्मा-मन-इन्द्रियाभ्यां वस्तु जानाति साक्षान्न। अतो वस्तुतस्तु तत्परोक्षमेव किन्तु व्यवहारे तत् प्रत्यक्षमिति कथ्यते। प्रत्यक्षात्मना साक्षादुद्भूतत्वात् तज्जातं ज्ञानं मिथ्या नैव भवति परन्तु अनुमानद्वारा यज्ज्ञानं जायते तद्दोषपूर्णहेतुत्वात् तस्मादुत्पन्नं ज्ञानम-यथार्थमपि भवितुं शक्नोति, यथा पाण्डुरोगरोगी श्वेतमपि वस्तु पीतमेव पश्यति, इत्त्थं प्रत्यक्षपरोक्षयोः भेदान् विज्ञाप्य तद्भेदो द्विविधो मतोंऽस्ति। तत्र प्रथमाऽधारः ज्ञप्तिसम्बद्धः अर्थात् प्रत्यक्षं केवलमात्मनोत्पद्यते परोक्षञ्च मन-इन्द्रिययोः साहाय्येन। आत्मनः समुत्पन्नं ज्ञानं स्वतः प्रमाणं भवति एतद्विपरीतं मन-इन्द्रियाभ्यां समुत्पन्नं ज्ञानं तथ्याश्रितं सत् परतः प्रामाण्यं व्रजति। इत्त्थमेव प्रत्येकं ज्ञानं शब्दसम्पर्कात् श्रुतज्ञानमन्तःस्थलस्थितत्वात् मतिज्ञानञ्च कथ्यते। विषयेऽस्मिन् यशोविजयस्याभिप्रायो यदुत्तरावस्थायां शब्दसम्मिश्रणत्वादपि तज्ज्ञानं शब्दान्न प्रारभ्यते अतस्तस्य मतिज्ञानमेव संज्ञा। यस्य ज्ञानस्य प्रारम्भ एव शास्त्रात् अन्यकथनाच्च जायेत तस्य श्रुतज्ञानमिति संज्ञा। अत्र यथार्थवादिता इत्त्थमपि लक्ष्यते यत् अत्र आत्मव्यापाररूपोपयोगेन्द्रिय एव प्रमाणम्। आत्मा यावदुपयोगादि-व्यापारेण न सम्बद्धयते तावत्स्पर्शादि-विषयाणां प्रकाशको न भवति। उपयोगव्यापारं विना ज्ञप्तिनैव सम्भवति। यदि उपयोगव्यापारं विनापि तत्सम्भवेत्तदा सुषुप्तोऽपि पुरुषः तुर्यादिसन्निकर्षमात्रेण तस्य स्निग्धत्वमुष्णत्वञ्चानुभूयेत।

संक्षिप्तता—

संक्षिप्तता नाम चतुर्थं वैशिष्ट्यं तर्कभाषायाः। इदमस्मादपि प्रासङ्गिकं यतो वस्तुतः स्वयमपि तर्कभाषा संक्षिप्तो ग्रन्थः, यद्यपि जैनन्यायस्यारम्भिको ग्रन्थः 'तत्त्वार्थाधिगम' सूत्रमस्ति परन्तु सः अत्यन्तं विशालः, किन्तु तर्कभाषायां केवलं प्रमाण-नय-निक्षेपभेदात् त्रय एव अध्यायाः। एतान्नेवाधारीकृत्य यशोविजयेन प्रणीतोऽयं ग्रन्थः। तर्कभाषायाः प्रमाणस्वरूपं यथास्वपरव्यवसायिज्ञानं प्रमाणम्। तच्च द्विविधं प्रत्यक्षपरोक्षभेदात्। अक्षम् इन्द्रियं प्रति गतं कार्यत्वेनाश्रितमिति प्रत्यक्षम्। अथवा अश्नुते ज्ञानात्मना सर्वान्नर्थान् व्याप्नोतीत्युणादिनिपातनात् अक्षो जीवः तं प्रति कृतं प्रत्यक्षम्। किन्त्वित्त्थं प्रत्यक्षलक्षणे कृतेऽवधिज्ञानं प्रत्यक्षत्वेन मन्येत तदा मतिज्ञानं प्रत्यक्षं न भवेत् यतोहि तत् आत्माश्रितं नापितु इन्द्रियाश्रितं वर्तते। इत्त्थम्. अक्षाश्रितं ज्ञानं प्रत्यक्षमिति व्युत्पत्तिनिमित्तकं, परन्तु प्रत्यक्षस्य स्पष्टता प्रवृत्ति-निमित्तकत्वाद् भवत्यर्थात् यज्ज्ञानं स्पष्टं भवेतदेव प्रत्यक्षमिति कथयिष्यते।

अक्षेभ्यो अक्षाद्वा परतो वर्तत इति परोक्षम्, अस्पष्टज्ञानमित्यर्थः, अर्थात् अक्षपरं यज्ज्ञानं तत्परोक्षमिति। अत्रावधेयं यत्पुनः प्रत्यक्षं द्विविधं सांव्यावहारिकं पारमार्थिकञ्चेति। समीचीनो बाधारहितव्यापारः प्रवृत्ति-निवृत्तिलोकाभिलाषलक्षणः संव्यवहारः, तत् प्रयोजनकं सांव्यवहारिकम-पारमार्थिकमित्यर्थः यथा अस्मदादिप्रत्यक्षम्। अथ-"सोत्पतावात्म-व्यापारमात्रापेक्षं पारमार्थिकम्", तत् त्रिविधम् अवधिमनः पर्याय-केवलभेदात्। इत्त्थं परोक्षप्रमाणमपि स्मरण-प्रत्यभिज्ञान-तर्क-अनुमान-आगमप्रकारेण पञ्चप्रकारकम्। "अनुभवजन्यं ज्ञानं स्मरणं यथा तत् तीर्थङ्करबिम्बम्"। लौकिकज्ञानक्षेत्रे प्रत्यभिज्ञानमुपमानपदेन व्यवदिश्यते-ऽर्थात्तुलनाद्वारा समुत्पन्नं ज्ञानम्। न्यायसाङ्ख्यदर्शनयोः परिभाषा चास्य इत्त्थमेव विहिता, परन्तु तर्कभाषायां प्रत्यभिज्ञानं प्रत्यक्ष-स्मृतिभ्यां समुत्पन्नं समस्ताऽनुभवमात्रम्। एकत्व-सादृश्य-सादृश्यादिसमस्त-तुलनात्मकं ज्ञानं प्रत्यभिज्ञानमित्यभिधीयते। यशोविजयेन स्मरणतर्कावपि प्रमाणत्वेनाङ्गीकृतौ। तदनुसारं वस्तु ज्ञातं स्यादज्ञातं वा यदि

तत्प्रतीतिस्सयात् तदा तत्प्रामाण्यं स्वीकार्यम्। यद्यपि सर्वे दार्शनिकास्तर्कं मिथ्याज्ञानं परोक्षज्ञानं वा मन्यन्ते, परन्तु यशोविजयेन स्मृतितर्कौ मिथ्याऽप्रमाणिकौ नाऽमन्येताम्, अपितु तयोः प्रामाणिकता एव स्वीकृता। तदर्थं तेन तर्कद्वयं स्थापितम्, तत्राऽद्यः "स देवदत्तः" अत्र "देवदत्तः" विशेष्यं "सः" च विशेषणं वर्तते। तत् देवदत्तस्य परोक्षतायाः अतीतस्य च सूचकमस्ति, अतः परोक्षताविषये न कश्चन विवादः, परन्त्वत्र ध्यातव्यं यद्विशेषणं सर्वत्र विशेष्यस्यातीतबोधकं न भवति। अत्र अतीततासम्बन्धः विषयेन सह नहि अपितु प्रतीत्या सह भवति। द्वितीयस्तर्कस्तु तावत्–यत् स्मृतिप्रामाण्यं प्रत्यक्षाश्रितं भवति, अतः यदि भ्रमात्मकं तदा स्मृतिरपि भ्रमात्मिका भविष्यति।

यो वस्तुस्वरूपस्य यथार्थज्ञाता वक्ता च भवेत् तादृगाप्तपुरुषस्य वचनसमुत्पन्नं ज्ञानम् आगम इति कथ्यते। इदमागमप्रमाणं विधिनिषेधाभ्यां प्रतिपाद्यविषयं प्रतिपाद्य सप्तभङ्गितां प्राप्नोति। सप्तभङ्गिरूपेण एव इदं पदार्थस्य पूर्णरूपेण निरूपणं कर्तुं तथाहि निजसत्तायाः वास्तविकतायाश्च निर्वाहं कर्तुं शक्नोति। आगमेषु क्वचित् क्वचित् एका एव भङ्गिर्दृष्टिगोचरा भवति किन्तु अन्याः षड्भङ्ग्योऽपि तस्यामेवैकस्यां स्वीकर्तव्याः।

द्वितीयपरिच्छेदे यशोविजयेन नयव्यवस्थापनं कृतमस्ति। यतोहि वस्तुनोऽनेके धर्मा भवन्ति, प्रत्येकं वस्तु अन्यवस्तुभिस्सह विभिन्नरूपेण सम्बद्ध्यते। यद्यपि केवलज्ञाने वस्तूनामनन्तधर्माणां तत्सम्बन्धानाञ्च साक्षाद् ज्ञानं भवति तथापि सामान्यमनुष्यस्य कृते असम्भवमेतत् ज्ञानम्। स तु वस्तुगतानन्तधर्मेषु कमप्यंशमेकमेव ज्ञातुं शक्नोति, यतोहि–सः अल्पज्ञो भवत्यथवा अल्पज्ञता तस्य प्रकृतिर्वर्तते। यथा अनेके अन्धाः गजं संस्पृश्य भिन्नभिन्नामवधारणामवधारयन्ति तथैव एकस्यैव वस्तुनो भिन्नभिन्नदृष्ट्या अवलोकनेन परस्परं मतभेदो जायते। इदम् आंशिकज्ञानमेव नय इति संज्ञां लभते।[१] निश्चयव्यहारभेदादयं नयो

---

१. *अनेकान्तात्मकं वस्तु गोचरः सर्वसंविदाम्।*
एकदेशविशेषोऽर्थो नयस्य विषयो मतः॥
न्यायावतारः – १२९,

द्विविधः। निश्चयनयः कस्यापि वस्तुनः शाश्वतगुणान् प्राप्नोति, व्यवहारिकनयद्वारा विषयाणां व्यवहारिक-स्वरूपोपलब्धिर्भवति। जगद्व्यहाराय अयमावश्यकः। नयस्यैकमपरमपि वर्गीकरणमस्ति, तदनुसारमपि द्रव्यपर्यायभेदात् अयं द्विविधः।

यदा कस्यापि वस्तुनः स्वरूपनिर्णयकाले तद्गुणं द्रव्याश्रितं मन्यामहे तदा दृष्टिरियं द्रव्यनय इत्युच्यते। परन्तु यदा गुणानां पार्थक्यं बलात् कुर्मः द्रव्यञ्च केवलं बौद्धिकं मन्यामहे तदानीं काचित् विशिष्टा नयोपलब्धिरुच्यते तथाहि सा च पर्यायनयेति नाम्ना व्यपदिश्यते यथा "इदं रक्तं सुगन्धितञ्च" वाक्येऽस्मिन् इदमिति पदं रक्तसुगन्धितयोर्विषयस्य पर्यायनयः। पुनः द्रव्यनयश्चतुर्धानैगम[1] संग्रह व्यवहम्......भेदात्। पर्यायनयोऽपि चतुर्विधः ऋजुसूत्र-शब्द-समभिरूढ-एवंभूतेति भेदात्। जगतीतलेऽस्मिन् प्रत्येकं पदार्थो द्विविधः सामान्यविशेषभेदात्। अत्र विशेषस्वरूपं नैगमनय इति परिचक्षते।[2] वस्तुनः विशेषगुणान्नपहाय सामान्यगुणानां वर्णनं संग्रहनय इत्युच्यते। सामान्यमुपेक्ष्य विशेषस्य महत्त्वप्रतिपादनं व्यवहारनयस्तदनुसारं सामान्यस्य विशेषातिरिक्ता न कापि सत्ता।[3]

ऋजुसूत्रनये वस्तूनां तदतीतावस्थातः केवलं गुणानां संघातमात्रं मन्यते। शब्दनये वस्तुनः पर्यायवाचकैश्शब्दैः [4]कस्याप्येकस्य ग्रहणं भवति यथा-कुम्भ-कलश-घटादयः इमे त्रयोऽपि शब्दाः एकमेवार्थं बोधयन्ति। समभिरूढनये यथा अपर्यायवाचिनश्शब्दाः स्वरूपे पार्थक्यं सम्पादयन्ति तथैव पर्यायवाचिशब्दानामर्थेष्वपि कश्चन भेदो भवत्येव,

---

१. *नैगमः संग्रहश्चैव व्यवहारऋजुसूत्रको।*
शब्दः समभिरूढैरेवंभूतौ चेति नयाः स्मृताः॥
नयकणिका, श्लोकः-२,

२. *नयकणिका श्लोकः-५,*

३. *संग्रहो......पुष्पवत्॥ (न्या.क.श्लोकः-७)*

४. *न्यायकणिका श्लोकः ८.१०*

यद्यपि पर्यायवाचिनश्शब्दाः एकार्थद्योतकास्तथापि शब्दव्युतपत्त्याऽधारे तेषां भेदो जायत एव। एवम्भूतनयः समभिरूढनयस्य अस्पष्टभावानां प्रकटीकरणमात्रम्। नयवादविवेचनाऽधारे यशोविजयस्य कथनमस्ति यत् सर्वेऽपि सिद्धान्ताः स्व-स्वपरिस्थित्यनुसारं सत्याः। अस्मादेव कस्याप्याचार्यस्य मतप्रतिपादने "स्यादिति" क्रियायाः प्रयोगः क्रियेत येन सापेक्षता स्थिरा तिष्ठेत्। नयवादः स्याद्वादस्य प्रथमं सोपानम्।

तृतीयः परिच्छेदो निक्षेपाख्यः निक्षेपशब्दः क्षिप्धातोर्निष्पन्नः यस्यार्थः क्षेपणमिति। निक्षेपेऽर्थावगमो नैव निष्ठति, नये च न्यूनाधिकमात्रायामर्थापेक्षा तिष्ठत्येव परन्तु सन्त्येवंविधाः अर्था यत्र व्यवहारेण सह अर्थस्य किमपि तात्पर्यं नास्ति यथा नितान्तं मूर्खोऽपि वाचस्पतिनाम्ना व्यवह्रियते। इत्त्थं वयं पश्यामो यत् शब्दार्थयोरीदृशी विशिष्टा रचना निक्षेप इति कथ्यते येन प्रकरणादिद्वारा अर्थापत्त्यादीनां निवारणं यथास्थानं विनियोगश्च भवति। "लघीयस्त्रये निक्षेपसार्थकता इत्त्थं निरूपिता यत्तेन निक्षेपेण अप्रस्तुतार्थस्य निवारणं तथाहि प्रस्तुतार्थस्य निरूपणञ्च जायते। साधारणतया निक्षेपाश्चतुर्विधाः भवन्ति नाम-स्थापना-द्रव्य-भावभेदात्।

स्याद्वादः—

स्याद्वादो नाम पञ्चमं वैशिष्ट्यं तर्कभाषायाः, तत्त्वे तावत् सप्तकोटौ पूर्णतामेति।[१] यतोहि तस्य स्वरूपम् अनेकान्तत्वं व्रजति[२] नत्वेकान्तत्वम्। अनेकान्तः द्वयोर्विरोधिधर्मयोर्यथा सत्-असत्, शाश्वत्-अशाश्वत्, एक-अनेकयुगलयोराश्रयत्वेन वस्तुगतसद्धर्माणां समुच्चयो वर्तते। स्याद्वादसिद्धान्त इदं प्रतिपादयति यदस्माकं ज्ञानं पूर्णसत्यमिति वक्तुं न शक्यते अतोऽस्माकं ज्ञानमापेक्षिकं सत्यम्। प्रत्येकं पदार्थः अनन्तधर्मयुतः, एभ्योऽनन्तधर्मेभ्यः केषाञ्चिदेव धर्माणां ज्ञानमेवास्माभिः प्राप्तुं शक्यते, एकस्मिन् काले। यतोहि स्याद्वादः स्वयमपि अन्तिमं सत्यं

---

१. *स्याद्वादः सर्वथैकान्तत्यागात्......विशेषकः।*

२. *तत्तत्वं त्वनेकान्तमशेषरूपमे कान्तदृष्टिप्रतिषेधितत्त्वप्रमाणं सिद्धम्, तत् स्वभावम् आप्तमी-श्लोक ४१,*

नास्ति प्रत्युत अयं अस्मान्नन्तिमसत्यं यावद् प्रापयितुं प्रयतते, वादेऽस्मिन् सम्पूर्णपदार्थानां क्रमिकं ज्ञानञ्जायते। स्यात् शब्दः पारिभाषिकशब्दो वर्तते तथाहि स्यात् नयः प्रभावनयो वर्तते। स्यात् शब्दस्य अर्थः कथञ्चित् इति भवति तथाहि स्याद्शब्दयुक्त सप्तप्रकारात्मकं वचनं तस्य प्रयोगो वा सप्तभङ्गीति निगद्यते। स वचनप्रयोग इत्त्थं क्रियते येन परस्परं विरोधो न स्यात्, तत्र कस्मिंश्चित् विधेः कल्पना भवति कस्मिंश्चित् निषेधस्य कस्मिंश्च च विधिनिषेधयोरुभयोयोरपि कल्पनं भवति। एकस्य वस्तुन एकस्मिन् प्रकारे सप्तप्रकारकाः धर्माः सम्भवन्ति अतएव सप्तप्रकारकाः संशयाः उत्पद्यन्ते। अस्मादेव कारणात् सप्तप्रकारक-संशयेभ्यः सप्तविधा जिज्ञासोत्पद्यते, सप्तप्रकारकप्रश्नत्वात् सप्तप्रकारात्मकान्युत्तराण्यपि भवन्ति। स्यात् अस्तीत्यत्र प्रधानरूपेण विधेः विवक्षातः प्रथमो भङ्गो भवति, अत्र स्यात् इत्यस्यार्थः कथञ्चिदिति, तात्पर्यमिदं यत्प्रत्येकं वस्तुनि स्वद्रव्यक्षेत्रस्य भावेन अस्तित्त्वं भवत्येव कथञ्चित् सर्वे पदार्थाः न। इत्त्थं प्रधानकल्पनारूपेण द्वितीयो भङ्गो भवति अर्थात् परद्रव्यादिद्वारा सर्वं वस्तु असदेव। कथञ्चित्सर्वे पदार्थाः सन्ति। अत्र विधिनिषेधकल्पनया चतुर्थः भङ्गो भवति। कथञ्चित् सर्वे पदार्थाः सन्ति, कथञ्चिच्च अवक्तव्यमस्ति, इत्त्थं विधिविवक्षया सहैव विधिनिषेध-विवक्षया च पञ्चमः भङ्गो भवति। कथञ्चित्पदार्थाः सर्वे न सन्ति, कथञ्चिच्च अवक्तव्यमस्ति, इत्त्थं निषेधस्य सहैव विधिनिषेध-विवक्षया षष्ठः भङ्गो भवति। कथञ्चित् सर्वे पदार्थाः सन्ति, कथञ्चित् न सन्ति, कथञ्चिच्च अवक्तव्यास्सन्ति इति क्रमेण एकस्मिन् काले विधिनिषेधयोः कल्पनया सप्तमः भङ्गो भवति।

इत्त्थं जैनतर्कभाषायाः सर्वातिशायि वैशिष्ट्यं स्याद्वादोऽथवाऽनेकान्तवादो वर्तते। तदनुसारमेक एव जनः कस्यापि पिता, भ्राता, पुत्रः, कस्यापि पतिश्च भवति। एषु विरोधस्तदैव भवति यदा एता अपेक्षास्त्यज्यन्ते। इयमेव प्रतिपादनशैली स्याद्वाद इति। आगमसाहित्ये चतस्त्रः अपेक्षाः प्राप्यन्ते द्रव्य-क्षेत्र-काल-पर्यायभेदात्, परन्तु यशोविजयेनास्याः संङ्ख्याः अष्टौ प्रतिपादिताः, यासु आत्मरूप-देशकालक्रमेण द्रव्यक्षेत्रकालसमान इव। भावाञ्च पञ्चधा विभक्ताः अर्थ-

सम्बन्ध-उपकार-संसर्ग-शब्दभेदात्। शब्दः समस्तवस्तूनां प्रतिपादनं नैव कर्तुं शक्नोति यतोहि प्रत्येकं वस्तु अनन्तधर्मावच्छिन्नम् जनश्च कमप्येकं धर्ममाश्रित्य आत्मनो व्यक्तित्वं सम्पादयति। द्रव्यगुणौ उभावपि सत्यौ, सामान्यविशेषश्च वास्तविकौ, घटः घटोऽपि वक्तुं शक्यते, एका सत्तापि। एतद्वक्तुः स्वीया दृष्टिः यया स सामान्यप्रतिपादनं कुर्यात् विशेषं वा। इत्थं वयं पश्यामः संक्षिप्तता नाम तर्कभाषायाः वैशिष्ट्यम्।

अधुनेदं विचारयामो यत् यशोविजयेन स्वतर्कभाषायां का महत्ता स्थापिता यया वैदिकबौद्धतर्कभाषयोः सत्योरपि अनेन स्वग्रन्थनाम तर्कभाषेति कृतम्। पुनश्च वैदिकबौद्धतर्कभाषयोः नव्यन्यायशैली नावलोक्यते, किन्तु जैनतर्कभाषायां नव्यन्यायशैली प्रयुक्ता, अतः कस्मात्प्रेरितस्सन् अनेन शैलीयमाधारीकृता? अत्रेत्थमुच्यते यत् यशोविजयकृततर्कभाषा तर्कशास्त्रस्यैको महत्त्वपूर्णः ग्रन्थः। यतोह्यस्याः रचना उपाध्याययशोविजयेन जैनानां जैनेतराणां दर्शनानां विधिपूर्वकमध्ययनं विधाय कृता तेन जैनदर्शनस्य बह्वीनां समस्यानां समाधानमपि कृतं, यथा-ज्ञानविधायाः या व्याख्याऽनेन कृता सा मूलविधायातूलविधायाश्च सिद्धान्तैस्सम्बद्धा। यदा तर्कभाषा रचिता तदा जैनसमाजे द्वे धारे आस्ताम्। प्रथमायां मूर्तिपूजकः समाजः मन्दिरनिर्माणं तदाऽडम्बरे संलग्नमासीत्, अपरतः स्थानकवासी समाजः निवृत्तित्यागयोः संलग्नः आसीत्। ज्ञानसाधनापक्षतः उभावप्युदासीनावस्ताम्। अन्य-सम्प्रदायवादिदार्शनिका अपि गृहे एव दार्शनिकचर्चां कुर्वन्ति स्म। युगेऽस्मिन् तत्त्वज्ञानस्य सूक्ष्मां दृष्टिं निष्पक्षभावनाञ्चाऽधारीकृत्य यशोविजयेन रचितेयं तर्कभाषा। ग्रन्थेऽस्मिन् खण्डन-मण्डनसमन्वयाः प्रायशः विलोक्यन्त एव, अत्रत्यं खण्डनमपि अत्यन्तं सूक्ष्मं वस्तुलक्ष्यञ्चास्ति। लेखकेनात्र पूर्ववर्तिनिदर्शनानि तथैवोपस्थापितानि, सर्वाणि प्रति तस्य दृष्टिः समन्वयात्मिका। अत्र मुख्यं कारणमासीत् काश्यामध्ययनं जैनेतरविद्वद्भिस्सह सम्पर्कश्च। तर्कभाषायामस्यां ता अपि समस्याः समाधीताः यासां स्पर्शोऽपि न कृतः आसीत् पूर्ववर्ति-

भिर्विद्वद्भिः। ग्रन्थस्यास्याभिप्रायं ज्ञातुम् अन्यग्रन्थानां ज्ञानं नितान्तमावश्यकं प्रतिभाति।

भारतीयतर्कशास्त्रस्य द्वौ ग्रन्थौ युगप्रवर्तकौ मन्येते, तत्राऽद्यः हर्षस्य खण्डनखण्डखाद्यं यः शाङ्करवेदान्तेन सम्बद्धः। सूत्रपातश्चास्य बौद्धाऽचार्यो नागार्जुनो यः शून्यवादस्य प्रवर्तको मन्यते। विश्वस्य बाह्याभ्यन्तरजडचेतननित्यसत्यासत्यसमस्तमपि कल्पनामात्रम्, इदमेव तथ्यं तेन शून्यवादत्वेन उक्तम्। खण्डनखण्डखाद्येऽपि एता युक्तय आधारत्वेन स्वीकृताः, प्रभावश्चास्य सर्वेषु दर्शनेषु अपतत् येन यथार्थवादिपरम्पराः विलीनतां गताः। यशोविजयेन जैनदृष्ट्या खण्डनखण्डखाद्यमालोचितमपि। चतुर्दशशताब्ध्यां गङ्गेशोपाध्याय-नामाख्यो मैथिलविद्वान् तत्त्वचिन्तामणिनामकं ग्रन्थं रचयामास, ततः प्रभृति नव्यन्यायः दार्शनिके जगति प्रविष्टः। उत्तरवर्तिसमस्तसाहित्येऽपि अस्य प्रभाव आपतितः, इत एव यशोविजयेन नव्यन्यायशैली गृहीता। इत्थं दार्शनिके जगति द्वे नवीने धारे प्रचलिते ये जैनसाहित्यस्य अनुपमे अवदाने स्तः।

यद्यपि जैनतर्कभाषाया महत्त्वं सर्वविदितं परन्तु काञ्चन बिन्दून्नधिकृत्यात्र किञ्चिद्विचारयामः—

आत्मविवेचनम्—

प्रथमेयं महत्ता जैनतर्कभाषाया यदनुसारं आत्मा चेतनो नित्यश्च, अत्रात्मनः स्वतन्त्रसत्ता स्वीकृता। प्रमाणविवेचनकाले प्रत्यक्ष-परोक्षेति द्वे रूपे निर्धारिते। तत्र प्रत्यक्षमात्मानुभूतिरेव, अस्मादुत्पन्नं ज्ञानं स्वतः प्रमाणं न तत्र कश्चिद्भ्रमावकाशः। अयमात्मा चेतनः अपौद्गलिकश्च। आत्माजन्यज्ञाने संशयसम्भावनाऽपि न भवति। यज्ज्ञानम् आत्मना उत्पद्यते तदेव प्रत्यक्षमित्यनेन स्वीकृतम्, यच्चान्यसाधनैरुत्पद्यते तत्परोक्षं, यतोहि अस्याः प्रमाण्यमन्यतथ्याश्रितं भवति। यज्ज्ञानञ्चोत्पत्तौ आत्मव्यापारमेव अपेक्षते तत्पारमार्थिकं प्रत्यक्षमिति। इदं त्रिविधम् अवधिज्ञान-मनः

पर्यायकेवलज्ञानभेदात्। केवलमात्मनः उत्पन्नं सकलद्रव्यज्ञातृज्ञानम् अवधिज्ञानमिति कथ्यते। इदमवधिज्ञानं षड्विधम्, अनुगामि-अननुगामि-बर्द्धमान-हीयमान-प्रतिपाति-अप्रतिपाति चेति। केवलं मनः साक्षात्कारिज्ञानं मनःपर्यायमिति कथ्यते। इदञ्च द्विविधम्-ऋजुमति-विपुलमति भेदात्। समस्तद्रव्याणां समस्तपर्याणाञ्च प्रत्यक्षकर्तृज्ञानं केवलज्ञानमिति। अत्र कारणं केवलमावरणक्षयः, अतएवास्य न कश्चन भेदः। इत्त्थं तर्कभाषाया महत्तास्यात्मविवेचनेन वर्तते।

नयवादिता—

नयवादिता नाम द्वितीयं वैशिष्ट्यं तर्कभाषायाः। वस्तूनि अनन्तधर्मावच्छिनानि भवन्ति, तेषु केनापि दृष्टिकोणेन कस्याप्येकस्यांशस्यैव ज्ञानं भवितुमर्हति। इदमांशिकज्ञानमपि दृष्टिकोणमात्रम् इदमेव च नयेति सञ्ज्ञां प्राप्नोति। इदमेव स्वरूपञ्चान्यैरपि जैनदार्शनिकैः स्वीकृतमस्ति। नयवादसिद्धांतानुसारम् इदमेव ज्ञापितं यत् किमपि ज्ञानं वस्तुनः पूर्णद्योतकं न भवति। वस्तुसम्बन्धि प्रत्येकं विचारः स्वंदृष्टिकोणेन सत्य एव। तत्र कस्याप्येकस्य ज्ञानस्य स्वीकृतिर-ज्ञानद्योतिका। अतएव एकस्यैव वस्तुनो विभिन्नदृष्टिकोण्येन ग्रहणं तर्कभाषायाः महदवदानम्। निश्चयनयव्यावहारिकनयत्वेन नयस्यापि भेदद्वयं, निश्चितनयेन कस्यापि वस्तुनः स्वाभाविकशाश्वतगुणानाञ्च ज्ञानं प्राप्यते एवमेव व्यावहारिक-स्वरूपोपलब्धिर्जायतेऽयं नयः सांसारिक-व्यवहारोपयोगी नयो वर्तते। अपरवर्गीकरणानुसारमपि ज्ञायते यत् यदा वयं कस्यापि वस्तुनः स्वरूपनिर्णयसमये तद्गुणान् द्रव्याश्रितान् मन्यामहे तदाऽयमेव दृष्टिकोणः द्रव्यनयसञ्ज्ञां विभर्ति। एतद्विपरीतं यदा गुणपार्थक्यमाधारीकृत्य द्रव्यस्य केवलं बौद्धिककल्पनामात्रत्वं स्वीकुर्मस्तदा तस्मिन् समये एकस्य विशेषनयस्योपलब्धिजायते यो हि पर्यायनयेति सञ्ज्ञां विभर्ति। इयमेव महत्ता तर्कभाषायाः विशिष्टमवदानम्, यतोहि यशोविजयेन नयवाद-सिद्धान्त-प्रतिपादनद्वारा इदमबोध्यत यत् कश्चनापि सिद्धान्तः पूर्णरूपेण मिथ्या नैव भवति, प्रत्युत तस्य

सत्यतांशिकरूपेण भवत्येव। अतो न यावद्वयम् अमुं महत्त्वं ज्ञास्यामस्तावदन्यसिद्धान्तान् असत्यान् नैजान् च सत्यान्निति मंस्यामहे। अनेन प्रकारेण नयशास्त्रसम्बन्धिनीयं विचार-धाराऽस्मत्सु समस्तसिद्धान्तान्-प्रतिसमादरभावनां जागरयति।

तर्कभाषाया उपयोगिता, तस्याः स्याद्वादसिद्धान्तेनापि वर्तते। अत्र "स्यात्" शब्दः पारिभाषिकः तथाहि स्याद्वादव्यवहारश्च सत्यः। तर्कभाषायामिदमपि स्वीकृतं यत् व्यवहारसत्यादपि एकं सत्यमस्ति यच्च ज्ञाननाम्ना ज्ञायते। स्याद्वादे सम्पूर्णसिद्धान्तानां ज्ञानं क्रमेण भवति अनेन इदमपि ज्ञायते यत् कश्चनापि सिद्धान्तः पूर्णरूपेण सत्यो न भवति। मनुष्यशक्तेः सीमितत्वात् तत्केवलमापेक्षिकं सत्यमेव मन्तुं शक्यते। तत्र अस्तित्व-नास्तित्व विषये विरोधो नास्ति, यदा पदार्थानामस्तित्वधर्मं स्वीकुर्मस्तदाऽस्तित्वधर्म एव प्रधानो भवति अन्यधर्माः गौणाः भवन्ति। अतएव अनयोस्सिद्धान्तयोर्नास्ति कश्चन विरोधः। सिद्धान्तेनानेन इदमपि स्पष्टं भवति यत् समस्तधर्माणां समन्वयः स्याद्वादसिद्धान्ते सप्तभङ्गि-नयमाध्यमेन तर्कभाषायां कृतोऽस्ति।

निक्षेपावस्था—

अवस्थेयं व्यवहाराय अत्यन्तमुपयोगिनी यतोहि क्षिपेत्यस्यार्थः क्षेपणं भवति। अत्यन्तं मूर्खस्यपि वाचस्पतिरिति संज्ञा निक्षेपोऽर्थात् शब्दार्थयोस्तादृशी विशिष्टा रचना निक्षेप इति कथ्यते यथा अप्रतिपत्त्यादीनां प्रकरणाद्यनुसारं निवारणं विधाय यथास्थानं विनियोगो जायते। यथा मङ्गलादिपदार्थानां निक्षेपेण अभिधानभूतानां मङ्गलादीनां यथावत् विनियोगो जायते। निक्षेपद्वारा अप्रस्तुतार्थस्य निषेधः, प्रस्तुतार्थस्य च निरूपणञ्ज्ञायते। नाम-स्थापना-द्रव्य-भावभेदेनायं निक्षेपश्चतुर्विधः। यः शब्दः अन्यार्थे नियतस्सन् अन्यार्थमभिधत्ते तन्नामसंज्ञया व्यवह्रियते, यद्यपि इन्द्रशब्दः सुरपतिशक्रवाचकस्तथापि नामकरणकालेऽर्थमन्वीक्ष्य केवलं नामकरणकरणत्वात्।

नयेषु निक्षेपयोजना—

जैनतर्कभाषाकृद्यशोविजयेन यथा निक्षेपाणां नयेषु योजना कृता तत्कृत्वास्य ग्रन्थस्य महत्ताऽपरामपि महत्त्वपूर्णं पदवीं भेजे। तत्कृत्वास्मिन् चत्वारो निक्षेपाः द्रव्यार्थिकनयत्वेन भावनिक्षेपः पर्यायार्थिक-नयत्वेन स्वीकृतो वर्तते। सङ्ग्रहव्यवहारनयौ द्रव्यार्थिकनयस्य भेदौ तथाहि ऋजुसूत्रादिशेषनयाः पर्यायर्थिकस्य भेदास्सन्ति। अत्रैवाचार्यसिद्ध-सेनदिवाकरेण नामादित्रयो निक्षेपाः द्रव्यार्थिकनयत्वेन तथाहि भावनिक्षेपः पर्यायार्थिकनयत्वेन स्वीकृतो वर्तते। परन्तु जिनभद्रगणिक्षमाश्रवणमतौ शब्दनयोऽर्थात् शब्दसमभिरूढ एवंभूतनयौ भावनिक्षेपमेव स्वीकुर्वन्ति, तथाहि शेषनयाः सर्वान्निक्षेपान् स्वीकुर्वन्ति। त्रयोऽपि शुद्धनयाः भावमेव स्वीकुर्वन्ति किन्तु ऋजुसूत्रादिचतुर्विधान् निक्षेपान् स्वीकुर्वन्ति।

अनेकान्तं नाम जैनदर्शनस्य सर्वस्वं वर्तते यद्धि अपेक्षा-वादेत्यभिधानेनापि व्यह्नियते। आगमसाहित्येऽस्य कृते चतस्रोऽपेक्षाः स्वीकृता, द्रव्यं व्यक्तिः क्षेत्रं, कालः, भावोऽर्थादवस्थाऽथवापर्यायः। यशोविजयेनेतस्य संख्या अष्टौ स्वीकृता वर्तते येषु आत्मरूप-गुणदेशकालाः क्रमशः द्रव्य-क्षेत्र-काल इव वर्तन्ते। भावः पञ्चधा विभक्तः, अर्थ-सम्बन्ध-उपकार-संसर्ग-शब्दभेदात्। बौद्धदर्शनानुसारं केवलं गुणाः एव सत्यं तथा वेदान्तदर्शनन्तु द्रव्यमेव सत्यतया स्वीकरोति तथाहि अपेक्षाः गुणांश्च मिथ्यात्वेन स्वीकरोति किन्तु यशोविजयमतौ तदुभयमपि सत्यम्। सामान्यविशेषावुभावपि वास्तविकौ। घटः घटत्वेनापि ज्ञातुं शक्यः सत्तात्वेनापि किन्त्वत्र वक्तुवैशिष्ट्यात् क्वचित्सामान्यस्य तथा क्वचिच्च विशेषस्य प्रयोगमसौ कुरुते।

आत्मभावस्वीकरणे आत्मदृष्टेर्नाशेऽपि स्वस्य भावाकाङ्क्षा अधिवसत्येव, तस्मात् नदीनां सागरे लये समुपजातेऽपि सागरतां प्राप्य स्वास्तित्वबोधे अवशिष्ट इवाभाति तस्मादुच्यते—

सत्यपि भेदापगमे नाथ तवाहं
न मामकीनस्त्वम्।
सामुद्रो हि तरङ्गः क्वचन
समुद्रो न तारङ्गः॥

अतएवात्मभावस्य सर्वथा विलोपाभावजनितेच्छापि जनान् लोकाकाङ्क्षातो न वारयति। तस्मात् अस्याः आशंक्तेः नाशाय आत्मनाशः अनात्मवादो वा प्रासव्यः, यतो हि अनेन आत्मना वर्णजाति-आश्रमादिव्यवस्थानां सहजानुरागेण बौद्धिकव्यापकतायां सत्यामपि वास्तित्वनाशाय नैव प्रयत्यते। तस्मादेव बौद्धैः इमंमात्वादं सत्कार्यदृष्टिं विभाव्य कथितम्।

सत्कार्यदृष्टि - प्रभवानशेषान्।
क्लेशांश्च दोषांश्च धिया विवश्यन्
आत्मानमस्या विषयं च ज्ञात्वा।
योगी करोत्यात्मनिषेधमेव॥

एतया सत्कार्यदृष्ट्या जडीभूतो लोको यज्ञादिमुखेन सदैव स्वर्गं कामयते। तस्मादेव सुसस्वात्मस्थित्या अहङ्कारत्यागाय अयं नूतनो हि पन्था आविष्कृतो बुद्धेन। फलतः वैराग्यमूलकश्रमणधाराया वैशिष्ट्यं प्रतीष्ठितमभूत्, तच्च परं पारं गतम्। तेषु तेषु देशेषु गत्वा च स्वास्तित्वं तस्याहन्त्वं च प्रक्षीणतामानीय तत्तद्देशेषु सामञ्जस्यमवाप। भारतीयां संस्कृतिश्च प्रससार। इत्थं तिब्बते बोनधर्मे, चीने ताओकनफ्यूससयोः, जापाने सिन्तो धर्मे सद्भावं कृत्वा लोकान् तारयितुं प्रयतितवानयं बौद्धधर्मः। अनात्मत्ववादाबिर्भावेन एव भारते श्रमणब्राह्मणोः विरोधः ईश्वरानीश्वरयोः विरोधश्चापि समागतः। न केवलमेतदेव प्रत्युत वस्त्वस्तित्वमूलकः विरोधश्चापि उत्थितः। अतः अनात्मवादः प्रभावशालितया स्वपक्षं संस्थाप्य स्वविपक्षान् च समीक्ष्य श्रामण्यस्य महत्त्वं प्रस्थापयामास। श्रमणेष्वपि केचन अनात्मवादानित्यत्ववादयोः अतार्किकत्वमुद्भाव्य बौद्धवैदिकयोरस्तित्वं दृष्ट्युद्भावकत्वेन खण्डयामासुः। तस्मादेव ते

ऐकान्तिकदृष्टिं प्रबाध्य अनेकान्तदृष्टिं विस्तारयितुं. प्रयतितवन्तः कथितवन्तश्च यथा—

"तस्मादित्थं वक्तव्यं सदसदनिवर्चनीयवादभेदेन प्रविवादिनश्चतुर्विधाः। पुनरप्यनिर्वचनीयमतेनामिश्रितानि सदसदादिमतानि विविधानि। तानि प्रति किं वस्त्वस्तीत्वादिपर्य्यनुयोगेन कथञ्चिदस्तीत्यादि-प्रतिवचनसम्भवेन ते वादिनः सर्वे निर्व्विण्णाः सन्तः तूष्णीमासत इति सम्पूणार्थविनिश्चायिनः स्याद्वादमङ्गीकुर्वतस्तत्र तत्र विजय इति।"

अत्र विजयकाङ्क्षाबलात् कदाचिदहन्वावबोधकप्रत्ययः न समुदियादिति सप्तभङ्गमुखेन ते यथा परवादिषु आग्रहभावं विखण्ड्य तंत्राग्रहस्य एवान्तभूर्तसत्यस्य अस्तित्वं निराकुर्वन्ति तच्चैव तेषां दर्शनस्य हार्दमिति वक्तुं शक्यते। तच्च कथमायातीति संक्षेपतः प्रतिपाद्यते यथा- स्याद्वादस्य सप्तभङ्ग्यो भवन्ति यथा (१) स्यादस्ति-अनेन भङ्गेन नित्यसद्भाववादिनामाग्रहस्य विखण्डनं प्रदर्श्य तत्र एतया दृष्ट्यास्तत्वं स्वीकुर्वन्तो अन्यया अनस्तित्वं वाञ्छन्तः तस्या यथार्थत्वं वाञ्छन्ति एतेन नित्यसद्भाववस्तुवादिनः साङ्ख्याः निरस्ताः।

(२) स्यान्नास्तीतयनेन सर्वथानास्तीत्यस्य माध्यमिकमतस्य खण्डनं विधाय स्यान्नास्तीति मतमुपन्यस्यते। (३) स्यादस्ति नास्ति इति चेदनेन न्यायवैशेषिकयोर्नित्यसद्भावानित्यसद्भावैकान्तवादस्य मतं निरस्यते। (४) एवमेव स्यादवक्तव्यमित्यनेन सौत्रान्तिकाः बौद्धाः अनुमेयैकान्तवादिनो निरस्ताः (५) स्यादस्ति अवक्तव्यश्चेति भङ्गेन अनिर्वचनीयत्ववादो निरस्यते (शङ्करस्य) (६) स्यान्नास्ति चावक्तव्यश्चेति वचनेन बौद्धानामन्यापोहत्वम् अतदव्यक्तत्वं च निरस्यते। (७) स्यादस्ति नास्ति चावक्तव्यश्चेत्यनेन योगाचाराणां सदसद्व्यक्तवादो निरस्यते। तस्मादेवैते सर्वविग्रहवादनिरसनाय वदंन्ति यथा—

अन्योन्यपक्षप्रतिपक्षभावाद्
यथा परं मत्सरिणः प्रवादाः।

नयानशेषानविशेषमिच्छन्न -
पक्षपाती समयस्तथार्हतः ॥

इति कृत्वा समेषां भारतीयतत्त्वानामेकत्र स्याद्वादे समन्वयमानेतुं यतते। एतस्य ज्ञानस्य जीवने प्रभावात् जैनाः सहिष्णवः सामञ्जस्यवादिनश्च विलोक्यन्ते। तथाप्येतेन अस्तित्वसमन्वयेन लोकशक्तिर्न निरस्ता तस्मादेव सर्वां दृष्टिं नाशयितुं माध्यमिकाः प्रवर्तमानाः तद्दृष्टिं विनाशयितुमपि परामृशन्ति यथा—शून्यता सर्वदृष्टीनां प्रोक्ता निःशरण जिनैः येषां च शून्यता दृष्टिस्तानसाध्यान् बभाषिरे॥ तस्मादेव तत्त्वातत्त्वपूज्यत्वभावस्यैकान्तिकी दृष्टिः सर्वथा त्याज्या। तत्तु महाभारते उक्तं यथा।

त्यज धर्मधर्मञ्च उभे सत्यानृते त्यज।
उभे सत्यानृते त्यक्तवा येन त्यजसि तत्त्यज॥

इत्थं सत्याधिगते सति यथा संसारभावः त्यज्यते तथैव आत्माग्रहभावोऽपि परित्यज्यते। ततः कुत्रापि अहन्त्वाभावात् लोके सर्वत्र सर्वेषु स्वात्मदृष्टिं प्रस्थापयितुं शक्यते तस्मादेव केनचिदुक्तम्।

त्यक्तव्यो ममकारः त्यक्तुं यदि शक्यते नासौ।
कर्तव्यो ममकारः किन्तु स सर्वत्र कर्तव्यः॥

इत्थमात्मानात्मभावयोरपगमः यथा कार्यते, क्रियते च तथैव तत्त्वे मूर्तत्वामूर्तत्वभावयोरपगमः कर्तव्यः। एतेन भिन्नभिन्नसम्प्रदाये वर्तमानानां पारस्परिको विग्रहो शान्तिमभ्युपैति। इयञ्चैकीभावस्य दृष्टिः प्रवृतिर्वा यथा भारते दृश्यते तथा नान्यत्रेति। तस्मादेतयोः आत्मानात्मदृष्टयोः एकीभावेन सह सगुणत्वनिर्गुणत्वयोरप्येकतैव इत्यपि प्रतिपादयिष्यते। येन भारते साम्प्रदायिकवैमनस्यमस्तमियादिति।

महांमहोपाध्यायाः गोपीनाथकविराजा उक्तवन्तो ह्यासन् आत्मनात्मवादयोः रहस्यं ये न विदन्ति तेभ्यः द्वयोर्मध्ये विरोध आपद्यते, ये तु जानन्ति तत्र विरोधो न भवति। कथमेतयोर्द्धयोरपि एकत्वमिति विवेचने ते उक्तवन्तः, आत्मा खलु स्वस्वरूपमुपागत्य ब्रह्मरूपत्वं लभते, तस्मात् सर्वं

ब्रह्मणो भवति स्वस्य अस्तित्वं पुत्रे, परिवारे, ग्रामे, जनपदे, प्रान्ते, अध्यारोपादिति तस्मादुच्यते—त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्। ग्राम; जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्॥

इतिवत् स्वात्मभावातिक्रमणेऽसमर्थाः आत्मभावं त्यजन्ति। इत्थम् आत्मस्वरूपाकलनेन सर्वस्मिन्नात्मभावापन्नता यथायाति तथैव आत्मस्वरूपव्यवकलनेन अनस्तित्वाधारितसकलजीवोद्वार-दृष्टिरायाति, तस्मादेव उभयोरपि लोकरहितसम्पादनपरत्वे अविरोध इति तस्मादेतयोरेकभावापन्नता अभिन्नता चेति भावः।

यथा प्रतिपादितं तर्कभाषायां नयस्वरूपम्। एतदनुसारं नयस्य व्युत्पत्तिर्वर्तते 'नीयतेऽनेनेति नयः' अर्थात् सा प्रतीतिर्यया कश्चन कस्यामप्येकस्यां दिशि प्रचलेत्, किन्तु प्रमाणं नाम भवति सर्वग्राहि यस्योद्देश्यं भवति पूर्णरूपेण वस्तुज्ञानम्। नयस्योद्देश्यं वस्तुन एकांशाऽवलम्बनमेव स्वीकृतम्, तथापि नासौ अन्यांशान्नपलपति किन्तु तात्कालिकस्वार्थकारणेन कस्याप्येकस्यांशस्य चयनं कुरुते। उदाहरणतया कश्चन जनो जात्यां ब्राह्मणः, व्यवसायेनाध्यापकः, प्राणिषु मनुष्यो भवति किन्तु ब्राह्मणाध्यापकमनुष्येष्वेकस्याप्यपलापो नैव कर्तुं शक्यते।

इत्थं वयमवलोकयामो यत् प्रमाणैर्मुख्यलक्ष्यवस्तूनां ज्ञानं भवति। तथाहि नयैर्मुख्यव्यवहाराणाम्। तथैव तर्कभाषायां निक्षेपवादोऽप्यवलोकितः येन भिन्नभिन्नार्थ-प्रतीतिरथवाऽर्थविज्ञानं सम्यग्ज्ञायतेऽत्रावधेयं यत् निक्षेपेष्वर्थाः नैव ध्यायन्ते। तृतीयो द्रव्यनिक्षेपः भूतभविष्यदवस्थाः गृहीत्वा प्रयुज्यते, तथाहि चतुर्थो भावनिक्षेपः वास्तविकतां गृहीत्वा कार्यं कुरुते। अयं निक्षेपसिद्धान्तोऽपि तर्कक्षेत्रे यशोविजयस्य महदवदानम्। आगमसाहित्ये व्यव्यारविधास्यैवाथवा एतेषामेव निक्षेपाणामाश्रयो गृहीतः। उदाहरणतया-

ज्ञानप्रतिपादनसमये प्रथमं नाम-स्थापना-द्रव्यरूपेण चैतेषां प्रयोगो विधास्यतेऽथवा एते विवेचयिष्यन्ते तथाहि पश्चात् भावज्ञानरूपेण

वस्तूनां विवेचनं विधास्यते। संक्षेपेण कथयितुं शक्यते यत् आगमिकतार्किकपरम्पराणां सुन्दरः समन्वयः यथा यशोविजयेन कृतः न तथान्येन केनापि जैनतार्किकेण। यशोविजयपश्चाद्वर्तिभिराचार्यैः ज्ञानं प्रमाणानि च विवेचितानि। यद्यपि कैश्चिदाचार्यैर्नयोऽपि विवेचितः किन्तु तर्कशास्त्रे नयनिक्षेपयोस्तथाविधस्थापना आचार्ययशोविजयस्यैव श्रमादिति दिक्।

पञ्चमोऽध्यायः

तिसृणां तर्कभाषाणां तर्कशास्त्रदृष्ट्या समीक्षणम्

तर्कशास्त्रं न्यायशास्त्रं प्रमाणशास्त्रमिति शास्त्राणां त्रिधात्वमपि एकस्मिन्नेव अर्थे (समानार्थे) प्रयुक्तं प्रचलितञ्च। इदानीमेको विचारणीयः प्रश्नस्समुदेति-यत् भारतीयदार्शनिकचिन्तने प्रमाणस्य किं वा प्रमाणानामारम्भः कदाऽभूत्। यद्यपि निश्चितरूपेण किमपि कथयितुमशक्यं तथापि इदं सुनिश्चितं यत् विना प्रमाणं प्रमेयाणां ज्ञानमसम्भवं तन्मीमांसा वा कठिनैव। प्रमेयज्ञानोद्यमः मानवानामनादिस्वभावः। वी.के. मतिलालमतौ-न्याय-शास्त्रस्याथवा प्रमाणशास्त्रस्य विमर्शनेनैव प्रमेयमीमांसायां तत्त्वमीमांसायां वा प्रवेशः कर्तुं शक्यते।[1] अतः निर्विवादरूपेण प्रमाणानि प्रमेयज्ञानस्यावश्यकतत्त्वानि भारतीयप्राक्तनमानसिकचिन्तनविषयत्वं भजन्ति। अपि च प्रमाणानि पृथक् शास्त्रत्वेन भारतीयनैयायिकाचार्य-अक्षपादगौतम-न्यायसूत्रे (150 ई.) सर्वप्रथमं परिलक्ष्यन्ते। यद्यपि गौतमन्यायसूत्रतः प्राक्-कणादवैशेषिकसूत्रस्य, कपिलसाङ्ख्यसूत्रस्य. बादरायणब्रह्मसूत्रस्य तथाहि जैमिनिन्यायसूत्रस्य रचना जाताऽऽसीत्तथापि प्रमाणचर्चायाः कारणेन अन्यदार्शनिकग्रन्थापेक्षयाऽर्वाचीनमपि न्यायसूत्रं प्रथमस्थाने प्रयुक्तं कीर्तितञ्च, प्रमाणप्रतिपाद्यत्वात्। उपनिषत्सु, कौटिलीयेऽर्थशास्त्रे, चरकसंहितायां प्रमाणशास्त्रीयमुद्धरणम् उद्धरणानि वा प्राप्यन्त एव।

छान्दोग्योपनिषदि महर्षिणा नारदेन सनत्कुमाराय विद्यानामेकाऽति-दीर्घा सूचिः प्रदत्ता वर्तते, तस्यां हि (वाकोवाक्यविद्यायाः उल्लेखोऽपि[2] प्राप्यतेऽसौ वाक्यविद्या न्यायविद्यायाः द्योतिका एव।

---

1. *Perception. 1*
2. *छान्दोग्योयनिषद् C.1-2, समरी,*

पारिभाषिकशब्दावलोदृष्ट्या चरकसंहिता न्यायसूत्रस्य सामीप्यं भजते. यथा प्रत्यक्ष अनुमान उपमान ऐतिह्यरूपेण चरकसंहिता प्रमाण चतुष्टयं ब्रूते प्रमाणचतुष्टयगणनां वा करोतिं। तत्रापि न्यायसूत्र इव प्रतिज्ञा हेतु उदाहरण उपनयनिगमनानि अनुमानाऽवयवतया निरूपितानि।[1] अनेनैव प्रकारेण जल्प वितण्डा संशय-हेत्वाभास-प्रयोजन-अर्थापत्ति-च्छल-निग्रहस्थानादीनामप्युल्लेखोऽस्यां प्राप्यत एव।

बौद्धग्रन्थ-'उपायहृदये' तथाहि जैनागम-अनुयोगद्वारसूत्रेऽपि प्रमाणशास्त्रीयं विवेचनमुपलभ्यते। अनयोराद्यस्य रचयिता नागार्जुनः स्वीक्रियते। यस्मिन् 'वाद' धर्माणां निरूपणमभूत् सहैव च प्रत्यक्ष-अनुमान-उपमान-शब्देति चतुर्विधप्रमाणानां. अनेकविधनिग्रहस्थानानां. जातेश्च निरूपणमपि कृतम्। उपलब्धन्यायग्रन्थेषु 'उपाय-हृदयः' प्राचीनतम इति स्वीक्रियते। अत्रैव जी. टुची विदुषोऽनुसारं गौतमन्याय-सूत्रस्य व्यवस्थितस्वरूपम् .उपायहृदयचरकसंहितयोः रचनाऽनन्तरमेव प्रतिष्ठितम्।[2]

जैनागमानुयोगद्वारसूत्रेऽपि गौतमीयन्यायदर्शनस्य प्रत्यक्षादिचतुर्ण्णां प्रमाणानां वर्णनं प्राप्यते। इत्थमेव पूर्ववत्-शेषवत् दृष्टिसाधर्म्यवत्-रूपत्रयाणामनुमानप्रमाणानां विस्तृतं वर्णनमप्यवलोकनीयमेव।

आचार्यगौतमेन स्वीयषोडशपदार्थेषु प्रमाणं प्राथम्येन वर्णितमस्ति यतोह्यनेन विना प्रमेयसिद्धिरसम्भवा। इत्थं भिन्नभिन्नमान्यतानुसारं प्रत्येकं भारतीयदर्शनस्य पृथक्-पृथक् प्रमाणशास्त्रं प्रचलितमभूत्। पाश्चात्यदर्शने अस्याः शताब्द्याः पूर्वार्द्धं यावत् इयं मान्यताऽतिष्ठद् यत् तर्कशास्त्रमेकं विज्ञानं यत्र समभेदस्य न कश्चन अवकाशः परन्तु समकालीनपाश्चात्यदर्शने दृष्टिनिक्षेपेणेदं परिज्ञायते यत्तर्कशास्त्रामपि भिन्नं भिन्नं भवितुं शक्नोति। प्राचीनभारतीयदर्शने आन्वीक्षिकीशब्दस्य प्रयोगः तर्कशास्त्रस्या प्रमाण-शास्त्रस्य च उभयोरपि कृतः। न्यायविद्या हेतुविद्या अध्यात्मविद्येति आन्वीक्षिकी त्रिभिरभिधानैरभिधीयते परिचीयते। वात्स्यायनः आन्वीक्षिकीं

1. *Pre Dignaga Texts Entroduction, P.P. 17 and 29*
2. *प्रमाणमीमांसाया बौद्ध-जैन-परम्परा,*

न्यायविद्या इति पदेन सम्बोद्ध्य पृथक् पृथक् कृतवानस्ति।[1] हेतोः प्राबल्यादान्वीक्षिकीविद्या हेतुविद्या हेतुशास्त्रेति पदाभ्यां व्यपदिश्यते। बौद्धपालिसाहित्ये उदानदीर्घनिकायस्य ब्रह्मजालसूत्रे विमांसतक्कशब्दयोः प्राप्यते, कालश्चास्य ई. पू. 500 इति परिषदि सदसतोर्निर्णयेऽस्य प्रयोगेण इयं विद्या तर्कविद्या वादविद्या नाम्ना वा व्यपदिष्टा।[2] वाद-विद्यातर्कविद्याभ्यां वा प्रमेयसिद्धित्वात् प्रमाणशास्त्रमप्यास्याभिधानम्। भारतीय-दर्शने न्याय-शब्दप्रयोगो दृश्यते यश्च तर्कशास्त्रस्यैव स्वरूपम्। इत्थमवलोकित-मस्माभिर्यत् तर्कशब्दप्रयोगः बहुकालादायाति। कठोपनिषदि उक्तं यत्-

'नैषा तर्केण मतिरापनीया'।[3] एवमेव-'यस्तर्केणानुसन्धत्ते स धर्मो वेदः नेतरः।'[4]

महर्षिणा गौतमेनापि न्यायसूत्रे तर्कः पृथक् पदार्थत्वेनाङ्गीकृतस्तस्य लक्षणञ्च 'अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः'[5] कृतम्। एवमेव 'तर्काऽप्रतिष्ठाना' दित्यादीन्यपि सूत्राणि वर्तन्ते। कालान्तरे न्यायभाष्ये तर्कं व्याख्याय तं प्रमाणानुग्राहकमित्यमन्यत। यद्यपि भगवता बुद्धेनापि शुष्कस्तर्कः उपेक्षितः किन्तु तेनेदमपि स्वीकृतं यद्दुःखनिवृत्तेः मूलकारणानि अनिवष्य अन्धविश्वासं परित्यज्य युक्तेराश्रयो ग्राह्यः मानवेन। इत्थं वयं पश्यामो यत् दार्शनिकानुचिन्तनाद्विरतः सन्नपि बुद्धस्तर्कशास्त्रमपि समर्थयामास तच्च आदेशत्वेन स्वीकृत्य तदनुयायिनः युक्तयाधारे विश्वसत्तां विवेचयन्तो दुःखस्य मूलकारणं ज्ञातुं प्रयासं चक्रुः। अत्र प्रश्नस्समुदेति यत् यदा तर्कन्यायशास्त्रयोरुभयोरपि एकत्वमेव तथापि तयोः पृथक् निर्देशः कुतः। इदमित्थं समाधीयते यत् नैतयोरेकत्वं प्रत्युत भिन्नत्वमेव, यदीत्थमभविष्यत्तदा महर्षिगौतमः प्रमेयप्रधानयुगसमर्थकः, अक्षपादश्च

1. *वात्स्यायनभाष्यम्,*
2. *बौद्धतर्कभाषा,*
3. *मनुस्मृतिः*
4. *वात्स्यायनभाष्यम्, पृ. 16, श्लोकसंख्या-1।*
5. *भारतीयदर्शनस्य सर्वेक्षणम् 1-1-40,*

प्रमाणप्रधानयुगसर्थकः, इति कथममन्येताम्, यतोहि महर्षिगौतमः आत्मान्वीक्षणं प्राधान्येन प्रतिपादयन् न्यायसूत्राणि रचयामास। अतएवेदमित्थं मन्तुं शक्यते यदतिप्राचीनकाले महर्षिणा अमुना आत्मविद्यायाः आचार्यत्वेन न्यायशास्त्रं प्रवर्तितम्। कालान्तरे आवश्यकताऽनुरूपं तदात्मप्रधानं न्यायशास्त्रमपि प्रमाणशास्त्रत्वेन परिणतमभूत्। इदं शास्त्रञ्च प्रवर्तिते स्वरूपेऽपि स्वमुख्यं ध्येयमात्मस्वरूपं नैव तत्त्याज्यं परन्तु मुख्यध्येये प्रमेये सत्यपि प्रमाणविवेचने प्रयुक्तमभूत्। तस्य परिणामोऽयं यत् न्यायविद्या आत्मविद्यायाः पोषिका सा प्रमाणविद्याथवा तर्कविद्येति नाम्ना प्रसिद्धिं गता। अत्र यत्स्वीकृतं तदिदं यत्-प्रमेयप्रधानयुगस्य प्रवर्तको महर्षिगौतमः तथा प्रमाणप्रधानयुग-प्रवर्तकोऽक्षपाद इति। अस्य प्रामाणिकतासन्दर्भे इदं कथितं यदुभयोरपि प्रवर्तकौ द्वावभूताम्, जन्मस्थान-भिन्नत्वात्परन्तु नायं निश्चितो निष्कर्षः यतोहि पद्मस्कन्धपुराणयोः[1-2] गान्धर्वतन्त्रे[3] नैषधचरिते[4] विश्वनाथवृत्तौ च शास्त्रास्यास्य रचयिता गौतम एव इति स्वीकृतः। एतद्विपरीतं न्यायभाष्ये[5]

---

१. *कणादेन तु सम्प्रोक्तं शास्त्रं वैशेषिकं महत्।*
गौतमे तथा न्यायं साङ्ख्यं तु कपिलेन वै॥

पद्मपुराणे, उत्तरखण्डे, अ. २६३

२. *गौतमः स्वेन तर्केण खण्डयन् तत्र तत्र हि।*

स्कन्दपु. कालिकाखण्डे, अ. १७

३. *गौतमप्रोक्तशास्त्रार्थनिरताः सर्व एव हि।*
शार्गालीं योनिमापन्नाः संदिग्धाः सर्वकर्मसु॥

गान्धर्वतन्त्र-प्राणतोषिणी-तंत्रम्,

४. *एषा मुनिप्रवरगोतमसूत्रवृत्तिः श्रीविश्वनाथकृतिना सुगमाल्यवर्णा।*
श्रीकृष्णचन्द्रचरणाम्बुजचञ्चरीक श्रीमच्छिरोमणिवचः प्रचयैरकीर॥

विश्वनाथवृत्तिः।

५. *योऽक्षपादमृषिः न्यायः प्रत्यवाद् वदतां परम्।*
तस्य वात्स्यायन इदं भाष्यदातमवर्तयत्॥

न्यायभाष्य, विजयनगल सं. सीरिज,

न्यायवार्तिके[1] तात्पर्यटीकायां न्यायमञ्जर्याञ्च प्रवर्तकत्वेन अक्षपाद एव स्वीकृतः।

पुराणादिसंस्कृतसाहित्यस्यैतिहासिकविवरणानां विवेचनया उभयोरपि भेदपक्ष एव दृढीयान् प्रतिभाति, अत्रेदं कारणं यन्महर्षिगौतमस्य जन्मस्थानं काठियावाडसमीपं प्रभासपत्तनमिति निश्चीयते। ब्रह्मपुराणानुसारमक्षपादः भगवतः शङ्करस्यांशभूतस्य सोमशर्मणः ब्राह्मणस्य पुत्र आसीत्।[2] प्रभासपत्तनवास्तव्यो जातुकर्णी व्यासस्य समकालीन इति। न्यायशास्त्रस्याऽध्यात्मप्रधानयुगस्य प्रवर्तको महर्षिगौतमो वर्तते, विषयेऽस्मिन् महाभारते कठोपनिषदि च कश्चन सन्दर्भः प्राप्यते। महाभारतस्य शान्तिपर्वणि—

चतुर्थश्चौपनिषदो धर्मः साधारणः स्मृतः।
वानप्रस्थाः गृहस्थाश्च ततोऽन्यः संप्रवर्तते॥[3]

इति श्लोकः प्राप्यते। अनेनेदं निश्चीयते यत् महर्षिणा गौतमेन अध्यात्मप्रधानानि न्यासूत्राणि रचितानि, तत उपनिषद्विद्यायाः न्यायविद्यां पृथक्कर्तुमक्षपादेन प्रमेयप्रधानस्वरूपस्थाने प्रमाणप्रधानस्वरूपं विधाय तद्वर्णनमकारि।[4] न्यायशास्त्रस्य ये द्वे रूपे प्राप्येते ते तथैव प्रमेये यथा चरकसंहितायां संस्कारपद्धतेः प्रयोगः यतोहि मूलग्रन्थप्रणेता महर्षिरग्निदेवः तत्संस्कर्ता चरक इति। तथैव अत्रापि मूलग्रन्थप्रणेता महर्षिगौतमः तत्संस्कर्ता अक्षपाद इति। अतः प्रतिसंस्कर्ता पद्धत्या एव इमां समस्यां सामाधातुं शक्नुमः।

---

१. यदक्षपादः प्रवरो मुनीनां शमाय शास्त्रं जगतो जगाद।
कुतार्किकाऽज्ञाननिवृत्तिहेतोः करिष्यते तस्य मया निबन्धः॥

न्यायवार्तिके,

२. सप्तविंशतितमे प्राप्ते परिवर्ते क्रमागते। जातुकर्णी यदा व्यासो भविष्यति तपोधनः।
तदाहं सम्भविष्यामि सोमशर्मा द्विजोत्तमः। प्रभासतीर्थमासाद्य योगात्मा लोकविश्रुतः॥
तत्रापि मम ते पुत्राः भविष्यन्ति तपोधनाः। अक्षपादकाणादश्च उलूकी वत्स एव च।

ब्र. पु. अ. २३

३. महाभारतं-अ०-२४३, श्लोक-१४,

४. अग्निवेशकृते तन्त्रे चरकेण प्रतिसंस्कृते'...

इत्थमिदं सिध्यति यत् प्रमेयप्रधानन्यायनिर्माता महर्षिगौतमस्तथाहि प्रमाणप्रधानन्यायनिर्माता अक्षपाद एव। इदमेवकारणं यन्मध्यकाले हेतुविद्यायाः अथवा तर्कविद्यायाः प्रयोगः न्यायविद्यायाः कृते विहितः। वक्तव्यमिदं सर्वथा सिद्धं यतोहि केशवमिश्रप्रणीततर्कभाषायाः पूर्वत एव तर्कशब्दविशिष्टग्रन्थाः लिखिताः यथा बौद्धाचार्य मोक्षाकरगुप्तप्रणीता एकादशशताब्द्यां बौद्धतर्कभाषा। द्वादशशताब्द्यां वरदराजेन तार्किक रक्षा' दि ग्रन्थाः लिखिताः। केशवमिश्रस्य तर्कभाषान्तरमेता दृग्ग्रन्थानामेका दीर्घा सूचिरुपलभ्यते। यथा वा 17 शताब्द्यां जगदीश तर्कालङ्कारप्रणीतं तर्कामृतम् अथ च अस्यामेव शताब्द्यां जैनाचार्य यशोविजयप्रणीता जैनतर्कभाषा।

मोक्षाकरगुप्तप्रणीतायां बौद्धतर्कभाषायां ज्ञानमीमांसात्मक तर्कशास्त्रीया पद्धतिर्वर्तते। इयं हि बाह्यसंसारस्यास्तित्वं सर्वथा अस्वीकरोतीति प्रमाणयन्ती प्रत्यक्षस्य सिद्धान्तेन सह प्रारभ्यते। सारूप्य सिद्धान्तानन्तरम् अध्यवसायनिश्चयस्वार्थानुमान परार्थानुमान सिद्धान्ताः आयान्ति। इतोऽनन्तरमत्रैव ज्ञानस्य समस्तान्यपि क्षेत्राणि समायान्ति यद्धि प्रत्यक्षसदृशसाधारणविषयादारभ्य सार्वजनिक वादविवादस्य जटिलायां प्रक्रियायां निवृत्तिमेति। यद्यपि गुप्तमोक्षाकरेण बौद्धतर्कभाषा बहुपश्चादेव रचिता यतोहि इतः पूर्वं दिङ्नागाचार्येण 'प्रमाणसमुच्चय' इति ग्रन्थः लिखित आसीत् किन्तु बौद्धन्यायस्य प्रतिष्ठा मोक्षाकरकृतावेव पारं गता। प्रमाणसमुच्चयस्य संस्कृतसंस्करणमद्यावधि नैवोपलभ्यते तत्स्थाने तिब्बतीभाषायाः संस्करणमद्यापि प्राप्यम्। इत्थं दिङ्नागादारभ्य मोक्षाकरगुप्तं यावद् बौद्धन्याय साहित्यरचना तत्संवर्द्धनञ्चाऽभूत्। अनयोर्मध्यवर्तिभिरा-चार्यैरेकत्रिंशतसंख्यायामस्य साहित्यस्य सम्वर्द्धनमकारि। एतेष्वपि दिङ् नाग (४५० ५२०) धर्मकीर्ति (६५०) शान्तरक्षितादयः (७४९) परां प्रसिद्धिं ययुः।

अनेनैव प्रकारेण सिद्धसेनादिवाकरेण ४८० ५५० शताब्द्यां जैनन्यायस्य बीजस्थापना कृता, जैनन्यायपरम्परायामपि सिद्धसेन दिवाकरादारभ्य जैनतर्कभाषाकृन्यशोविजयं यावत् जैनन्यायस्य उत्कृष्टतम

ग्रन्थाः रचिताः न्यायाचार्यैर्जैनैः सप्तशतसंख्यानां जैन साहित्यस्य सम्वर्द्धनञ्चक्रिरे।

बौद्धतर्कशास्त्रस्यानुशीलनेनेदं स्पष्टीभवति यत् बौद्धतर्कशास्त्रं तत्तद्विचारान् प्रत्येव निष्ठां बिभर्ति येषु बौद्धमतारम्भो दृश्यते। सहैव सर्वैरपि बौद्धतर्काचार्यैरिदममानि यत्बौद्धतर्कशास्त्रं सत्यमिथ्ययोर्विमर्शाणां प्रतिबिम्बमथवा सिद्धान्तमात्रम्। नन्वत्र अस्माभिरिदं विचारयिष्यते यत् कथं तिसृणामपि तर्कभाषाणां समीक्षा कर्तव्येति--

तत्र तावदवधेयं यदैतिहासिकदृष्ट्या बौद्धतर्कभाषा अत्यन्तं प्राचीना. तस्मादियमेव प्रथमतया समीक्ष्या—

प्रायश्शस्सर्वैरपि बौद्धतर्कशास्त्रिभिरेकमतेनेदं स्वीकृतं यत् तर्कशास्त्रं नाम सत्यतर्कसत्यतर्कात्पृथक्कुरुते।

समीक्षा—

बौद्धतर्कभाषायामाचार्यमोक्षाकरगुप्तेनेदममानि यत् सत्यं तर्क एव यथार्थसत्यम् इति तथाहि यथार्थताप्राप्तिः प्रमाणाऽवलम्बिता। अथ प्रमाणं लक्षयतानेनाऽवादि यत् यत्राविसंवादिता प्रतिष्ठतेऽर्थात् यत्र विषयसंगतिस्स्तिष्ठिति तदेव प्रमाणम्। एतेषां प्रमाणानां घटादिगोचरविषया अज्ञातस्तिष्ठन्ति भवन्ति च एते संदेहविपर्यासदोषरहिताः। इत्थं मोक्षाकरगुप्तेन अज्ञातपदार्थविषयभूतसम्यग्ज्ञानं प्रमाणत्वेन स्वीकृतम्। सम्यग् इति पदेन संशयविपर्ययज्ञानयोः गोचरपदेन गृहीतग्राहि ज्ञानयोर्निराकरणज्ञायते। मोक्षाकरगुप्तस्य कथनमेतत् यत् अविसंवादिता विषयसंगतज्ञानस्य विषयक्रिययोर्यत्र स्थितिर्भवेत् तत् प्रमाणमिति। प्रामाणिक इत्यस्यार्थः विषयस्वरूप-ज्ञानम्। अविसंवादिता नाम अर्थक्रियायाः स्थितिर्मात्रम् इयं संगतिशब्दश्रवणेन चरितार्थमेति यथा सूर्यचन्द्रमेघचित्रादीनां दर्शनमात्रमेव अर्थक्रियास्थितिस्सगतिर्वा। अस्यायमाशयःयद्विज्ञानं पूर्वत एव विषये प्रवृत्तं स्यात् तत् प्रमाणमिति, इत्थं व्यवहारद्वारा शब्दार्थक्रियां समवाप्य पूर्णप्रत्यक्षद्वारा कमप्यर्थं प्रति प्रवृत्तो भवति बुद्धिमान्। मन्दबुद्धिजनश्च तथैवानुमानेन अर्थक्रियां प्रति प्रवृत्तो भवति। यद्यपि बौद्धप्रमाणमीमांसासन्दर्भे बौद्धदर्शनेन चत्वारि सोपानान्यत्र

स्वीकृतानि येषां कमप्यंशमुपस्थापयितुमवसरं मन्ये यतः बौद्धतर्कभाषा एषामेव प्रतिफलितरूपम्।

वैभाषिकाः—

वैभाषिकानामनुसारं कस्याप्यर्थस्य प्राप्तये तस्य सम्यग्ज्ञानमावश्यकं यतः सम्यग्ज्ञानं विना अर्थोपलब्धिरसम्भवा, विना च केनचिदर्थेन न किमपि महत्त्वं ज्ञानस्य। ज्ञानेन सहार्थसारूप्यमेव प्रमाणमिति कथ्यते।[1] अतो वैभाषिकसम्प्रदाये विषयसत्ता ज्ञानादधिका स्वतन्त्रेत्यमन्यत, इत्थं वैभाषिकाः वस्तुवादिन इति मन्तुं शक्यन्ते।

सौत्रान्तिकाः—

एतेषां कथनमस्ति यत् यदि बाह्यवस्तूनि प्रामाणिकानि मंस्यन्ते तदा क्षणभङ्गवादस्य निरासो भविष्यति अत एते स्वसंवेदनमथवा ज्ञानं वा प्रमाणं मन्यन्ते। एतेषां कथनमेतत् यत् बाह्यवस्तुज्ञानं साक्षात् नापितु परम्परया भवति यतः बाह्यसत्तायां विनष्टायां सत्यां चित्ते तदाकारोत्पत्तिस्सञ्जायते तदेव च हेतुतया स्वीकृत्य बाह्यवस्तुनोऽनुमानं कुर्मः।

योगाचारः—

एभिरिदं स्वीकृतं यत् मनुष्यस्य कोटिशः विज्ञानहेतुप्रत्ययाः अनादिकालात् प्रवहन्ति। विज्ञानस्य क्षणिकत्वात् भ्रमोऽयं समुत्पद्यते यत् ते प्रत्ययाः कस्याश्चिन्नित्यसत्तायाः विभिन्नरूपाणि सन्ति अर्थादेभिर्विज्ञान-वादोऽङ्गीकृतः।

माध्यमिकाः—

एतेषामनुसारं वस्तुनि सम्बन्धिनि उत्पत्तौ निरोधे दोष एव यतोहि न तत्तेषां वास्तविकं स्वरूपमपितु अविद्याजनितमस्ति। एतेषां मते वस्तुनः पारमार्थिकस्वरूपं पूर्णतया बुद्धेः परमस्ति। इत्थञ्चतुर्षु मतेषु प्रमाणस्वरूपं प्रदर्शयता मोक्षाकारगुप्तेन ये द्वे प्रमाणे स्वीकृते तत्राद्यस्य (प्रत्यक्षस्य) लक्षणं यथा–"प्रतिगतमक्षं प्रत्यक्षम्। अक्षमिन्द्रियञ्चक्षुः श्रोत्र–घ्राणजिह्वेत्याख्यं तस्मादुत्पन्नं ज्ञानं प्रत्यक्षमित्यभिधीयते। ननु यदि अक्षाश्रितं ज्ञानं प्रत्यक्षं तदा

---

१. अर्थसारूप्यं प्रमाणम्

न्यायबिन्दुः–पृष्ठम् ५।

मानसादिवक्ष्यमाणं ज्ञानत्रयादिन्द्रियादनुत्पत्तेः प्रत्यक्षं न स्यात्। अत्रोच्यते यत् प्रतिगतमक्षं यदुक्तं तत्प्रत्यक्षशब्दस्य व्युत्पत्तिमात्रनिमित्तं प्रतिपादितं, प्रवृतिनिमित्तन्तु प्रत्यक्षशब्दस्यार्थकारित्वमेव रूढिवशादवगन्तव्यं पङ्कजवत्। ततः स्वसंवेदनादिकमपि ज्ञानं स्वसंवेदनरूपमर्थं साक्षात्करोतीति प्रत्यक्ष-शब्दवाच्यं सिध्यति। अस्यायमाशयो यदक्षसम्बन्धिज्ञानं प्रत्यक्षमित्युच्यते। अक्ष इत्यस्य तात्पर्यमिन्द्रियमिति परन्तु यदि वयम् इन्द्रियाश्रितं ज्ञानं प्रत्यक्षं स्वीकुर्मस्तदा त्रिप्रकारकं मानसिकं ज्ञानमिन्द्रिया-दनुत्पन्नत्वात् प्रत्यक्षं नैव कथयिष्यते। अस्य उत्तरमिदं यत् प्रत्यक्षशब्दस्य व्युत्पत्तिमाधारीकृतं केवलमिदमेव स्वीकार्यं यत् इन्द्रियसम्बद्धं ज्ञानमेव प्रत्यक्षं परन्तु प्रत्यक्षशब्दप्रयोगाय प्रवृत्तिनिमित्तं साक्षात्कार्यमेव यस्मिन्नर्थे स रूढितां गतः, यथा-पङ्कजशब्दस्य रूढिलभ्योऽर्थः "पङ्काज्जात इति परन्तु स्थल-कमलायापि शब्दोऽयं प्रयुज्यते यतोहि पङ्कजंशब्दः स्थलकमलाय रूढिं गतः। इत्थं स्वसंवेदनरूपार्थस्यापि निश्चयो भवति अर्थात् संवेदनरूपार्थं ज्ञानं स्वसंवेदनरूपार्थं साक्षात्कुरुते अतएवायं प्रत्यक्षशब्दस्य वाच्यं भवतीति।

अनुमानशब्दनिर्वचनम् :-

मीयते अर्थः अनेन इति मानं, अनु पश्चादर्थे पश्चान्मानमनुमानम्। लिङ्गग्रहणं लिंगलिंगिसम्बन्धस्मरणयोः पश्चात् यद्विज्ञानं पर्वतादौ धर्मिणि परोक्षवस्त्वावलम्बकं तदेवानुमानशब्देन अभिधीयते। एतच्च रूढिवशादव-गन्तव्यम्। येनार्थः प्राप्यते तदुमानमिति, इत्थं पश्चाद्भावि प्रमाणमनुमान-मिति। हेतुसाध्ययोस्स्मरणानन्तरं पर्वतादौ पक्षे यत्परोक्षवस्तुनः (अग्नेः) सम्बन्धाज्जातं तज्ज्ञानमुनमानमिति, अत्र रूढिकारणताऽव-गन्तव्या।

प्रत्यक्षस्यैकमपरं लक्षणं मोक्षाकरगुप्तेन कृतं यस्यायं भावो यत् अर्थस्वरूपस्य साक्षात्कारिज्ञानं प्रत्यक्षमिति। इदञ्च प्रत्यक्षम् इन्द्रिय-मानस-स्वसंवेदन-योगिभेदाच्चतुर्विधम्। इन्द्रियस्य असाधारणकारणत्वात् समस्तमपि ज्ञानमिन्द्रियप्रत्यक्षमिति कथ्यते। इदं प्रत्यक्षं यत्र स्वानुरूपं विकल्पं प्रतिपादयति तदेव प्रमाणं भवति यतोहि प्रमाणस्य अयमधिकारः सम्यग्व्यवहारं यावत् वर्तते। मनोजन्यज्ञानं मानसप्रत्यक्षमिति। ज्ञानसन्ताने इन्द्रियज्ञानान्तरं मनोविज्ञानस्य एव स्थितिः। वस्तुतो मानसप्रत्यक्षं न तावत्

किमपि पृथग्ज्ञानमपितु इन्द्रियप्रत्यक्षस्यैव द्वितीयं रूपं वर्तते। स्व संवेदने चैतसिकधर्माणां साक्षात् संवेदनोत्पद्यते अतएवेदं स्वसंविदितं ज्ञानं भवति यतोहि चैतसिकसंवेदना स्वयं प्राप्ता भवति न तु परम्परया जगतस्सत्ता विषयिणी साक्षादनुभूतिः योगिप्रत्यक्षमिति। साक्षात्कारित्वात् स्पष्टत्वाच्च योगिभिरिदं ज्ञानं प्रत्यक्षमिति मन्यते।

तर्कभाषायामनुमानस्य विशिष्टं महत्त्वं प्रतिपादितमतः बौद्धतर्क भाषायामनुमानस्य किं स्वरूपमित्यनुशीलयामः। सम्यग्ज्ञानोत्पादयितृ द्वितीयं प्रमाणमनुमानमिति यस्य व्यवहारिकी उपयोगिता सर्वेषु बौद्धनिकायेषु स्वीकृता। अनुमानोपलब्धिर्व्याप्त्याऽश्रिता भवति। बौद्धतर्के व्याप्तिरियं द्विविधा (1) कार्यकारणरूपा (2) तादात्म्यरूपा च। बौद्धतर्क भाषायां व्याप्तिरियमविनाभावनाम्ना प्रतिबन्धकनाम्ना स्वीकृता वर्तते। तद्भेदौ च तादात्म्य तदुत्पत्तिनाम्नाऽपि संबोध्येते। कार्यकारणरूपा तदुत्पत्तिः, स्वभावरूपा तादात्म्यञ्च अतोऽविनाभावो नाम तादात्म्य तदुत्पत्तिश्च, अयमेवानुमानप्रतिबन्धकः। आचार्यधर्मकीर्त्तेः कथनमेतत्

कार्यकारणभावाद्वा स्वभावाद्वा नियामकात्।
अविनाभावनियमोऽदर्शनान्न च दर्शनात्॥[1]

साध्यसाधनयोस्सहनियामकः कार्यकारणभावस्तद्रूपतानियामकात् अविनाभावनियमस्स्वभावप्रतिबन्धको भवति। विपक्षे हेतोरदर्शनमात्रेण अविनाभावनिश्चयो न भवति न च सपक्षे। अत इदं स्पष्टं भवति यदविनाभावनियम एवानुमानस्य अङ्गम्। इदञ्च द्विधा ज्ञायते। तादात्म्यतदुत्पत्तिभ्याम्। अयमविनाभावनियमो बौद्धतर्कभाषाकारेण स्वीकृतस्तथाह्यमेव नियमः न्यायवैशेषिकयोर्व्याप्तिबलेन भाट्टमीमांसानु सारञ्च नियमपदेन कथ्यते। बौद्धतर्कशास्त्रिण इमं नियमं स्वभावप्रतिबन्धनामानं मन्यन्ते। अस्मिन् स्वभावप्रतिबन्धे एकं वस्तु अन्यवस्तुनः गमकतया बोधकं भवति—"स्वभावप्रतिबन्धे हि सत्यर्थोमतः[2] कस्यचिद्वस्तुद्वयस्य अविनाभावनिश्चयः पञ्च करणसिद्धान्त

१. न्यायवार्तिक तात्पर्यटीका पृ० १५८
२. न्यायबिन्दुः (धर्मकीर्तिः) पृ० २९

द्वारा भवति, अनेन सिद्धान्तेन इदं ज्ञायते यत् कारणं विना न कार्योत्पत्तिरर्थादविनाभावः। पञ्चकरणस्य पञ्चकारणानि—

१. कार्यं कारणात् प्राङ्न दृश्यते, अनेनेदं निश्चितं यत् कार्यं कारणस्य पश्चाद्वर्ति पूर्वं विना पश्चात् सत्ता न।

२. कारणसत्तापूर्वं दृश्यतेऽर्थात् कस्यापि वस्तुनः स्वरूपे परिवर्तनम्।

३. द्वितीयक्षणेऽर्थात् कारणपश्चात् कार्यसत्तायाः अवलोकनम्।

४. कारणसत्तासमाप्तिकरणम्।

५. तदनु कार्यसत्ताया अपि समापनम्।

लिङ्गं साधनमपि कथ्यते यतोह्यनेन साध्यस्य सिद्धिरपि भवति, लिङ्गसाध्ये व्याप्यव्यापके इत्युच्येते। व्याप्यं विना व्यापकसत्ता न, यथाऽग्निं विना धूमः। लिंगं त्रिलक्षणं, यत्साध्यहेतौ स्वसत्तया उपस्थीयते तत्स्वभावहेतुः यथा वाऽयं वृक्षः, यतोह्यत्र शिंशपाः, अत्र वृक्षसाध्यस्य ज्ञानाय शिंशपाः हेतुः, उभयोस्तादात्म्यं समानस्वभावत्वात् परन्तु विकल्पदृष्ट्या अनयोर्भेदो दृश्यत एव। यत्र कार्यत्वं तत्र कारणत्वमिति लोकप्रसिद्धं, यथाऽत्र अग्निः धूमत्त्वात्। ज्ञानं दर्शनं वोपलब्धिरिति कथ्यते। अभावश्चैतस्यानुपलब्धिरिति। यथा भूतले घटो नास्ति, अस्यायमाशयो यद् भूतले घट आसीत् अधुना घटो नास्ति। इयमनुपलब्धिरेव हेतुरिति। इत्थं स्वभावकार्यानुपलब्धिहेतुभिस्सहाविनाभावस्य नियमो भवति। इदमेव साध्यसाधनम्, अविनाभाव एवानुमितेर्जनकः। अविनाभावस्यायमाशयो यत् एकं विना एकस्य सिद्धिर्न, अयं व्यभिचारनियम एव अविनाभाव इति निगद्यते। अतः स्वभावप्रतिबन्धे सत्यपि अन्यवस्तुनः ज्ञानञ्ज्ञायते।[1] तात्पर्यमिदं यद्वस्तुद्वयेऽविनाभावनियम एव साध्यसाधन इति पदेन व्यवह्रियते, यच्च प्रतिबन्धरूपेण निश्चीयते तत्साधनमिति। इत्थं नियतविषय एव साध्यसाधनभावो भवति नान्यत्र।

आचार्यधर्मकीर्तेः कथनमिदं यत् त्रिरूपलिंगस्य कथनमात्रं परार्थानुमानमिति। धर्मकीर्तेरनुसारं त्रिरूपलिंगस्योपस्थापकं वाक्यमेव परार्थानुमानम्।[2]

---

१. तत्प्रतिबन्धस्य तद्व्यभिचारनियमादभावात न्या. वि. २.२०

२. त्रिरूपलिंगाख्यानं परार्थानुमानम्, न्या. वि. ३।१

अनेनेदं स्पष्टं भवति यत्कार्यकारणयोस्सम्बन्धो वर्तते, कारणं विना कार्यसत्ता नैव तिष्ठति, अयमेव सम्बन्धोऽविनाभावः व्याप्तिर्वा कथ्यते।[1] पञ्चकारणसिद्धान्तमेव अन्वयव्यतिरेकित्वेन जानीमः, अन्वयलक्षणं यथा— "तत्सत्त्वे तत्सत्ता" व्यतिरेकस्य च "तदभावे तदभाव" इति। इत्थं यथाऽन्वयव्यतिरेकः कारणतानियामको वर्तते तथैव पञ्चकरणसिद्धान्तोऽपि। मोक्षाकरगुप्तेन द्विविधमनुमानं स्वीकृतं स्वार्थ-परार्थभेदात्। त्रिरूपलिङ्गात् अनुमेयविषयकं यज्ज्ञानमुत्पद्यते तत्स्वार्थानुमानमिति।[2] परोक्षविषयो येनानुमीयते तल्लिङ्गम् यथाह—"लीनमर्थं गमयतीति लिङ्गम्"। बौद्धतर्कभाषानुसारं त्रिरूपयुतो हेतुरेव सद्धेतुर्लिङ्गो वेति निगद्यते। लिंगन्तावत्त्रिविधम्। पक्षे लिंगमवश्यं तिष्ठति, केवलं सपक्षेऽपि, विपक्षे लिङ्गाभावः।[3] लिंगस्य त्रयो व्यापाराः स्वीकृताः यान् विना परोक्षार्थो न ज्ञायते। यथा वा पक्षः—पर्वतेऽग्निः। सपक्षः धूमत्वात्पाकशाला इव। विपक्षः—सरोवरे धूमाभावः। एषु कस्याप्येकस्याभावादपि हेत्वाभासो जायते। लिंगं हेतुः करणं वेति निगद्यते। कारणमपि द्विविधं कारकज्ञापकभेदात्। कारकमपि उत्पादकं कथितं यतोहि अस्मादुत्पद्यते यथा बीजात् अङ्कुरोत्पत्तिः, अतः बीजमङ्कुरस्योत्पादकं कारणमिति। ज्ञापकं कारणं बोधयति यथा-दीपोऽन्धकाराऽवृतं घटं ज्ञापयति, नैनं विना घटज्ञानम्।

परार्थानुमानं द्विविधं साधर्म्यवैधर्म्यभेदात्। साधनवाक्यस्य साधर्म्यवत् कथनं साधर्म्यवत् प्रयोगः, वैधर्म्यवत् कथनञ्च वैधर्म्यवत् प्रयोगः। तत्र त्रयाणामपि लिंगानां साधर्म्यवत् वैधर्म्यवच्च प्रयोगो भवति। तत्र स्वभावहेतोः साधर्म्यवत् प्रयोगो यथा घटः-यतः यत् सत् भवति तत्सर्वमनित्यं भवति। शब्दः सद्भवति। स्वभावहेतोर्वैधर्म्यवत् प्रयोगः यथा यदनित्यं न तत् सत् न, शब्दः सत् अस्ति, अयं विशेषणविहीनशुद्ध-

---

१. *कार्योत्पत्तेः प्राक् अनुपलम्भः, सर्वदर्शनसंग्रहः-२।*

२. *तत्र स्वार्थं त्रिरुपाऽलिंगाद् यदनुमेये ज्ञानम् अनुमानम्, न्यायबिन्दुः-२।३*

३. *त्रैरुप्यं पुनर्लिङ्गस्यानुमेयं सत्त्वं सपक्ष एव सत्त्वम्,*

असद्यक्षश्चासत्त्वम्, -न्यायबिन्दुः २।५

स्वभावहेतुकप्रयोगः। कार्यहेतोः साधर्म्यवत् प्रयोगो यथा-यत्र धूमस्तत्र वह्निर्यथा महानसम्। इयं कार्यकारणभावसिद्धा व्याप्तिः, शुद्धव्याप्ति-स्वरूपमिदम्। वैधर्म्यज्ञानहेतुप्रयोगो यथा-यत् विद्यमानं वस्तु उपलब्धेर्योग्यं तदवश्यमुपलभ्यते, यथा-नीलादिक्षणः। वैधर्म्यप्रयोगे साध्याभावं व्याप्यं साधनाभावञ्च व्यापकं मन्यते। साधर्म्यानुमाने घटाभावः साध्य-मतोऽभावात्मकशशविषाणसाधर्म्यमिति कथ्यते। द्वितीयो दृष्टान्तः स्वलक्षणमस्ति। तत् सदस्ति, घटाभावविपरीतं धर्मयुतं वर्तते, इदं वैधर्म्यम्। स्वभावहेतोः वैधर्म्यप्रयोगो यथा यन्नानित्यं तत्सदपि न, तथैव च यन्नानित्यं तदुत्पत्तिमदपि न परं शब्दः सत्। कार्यहेतोः वैधर्म्यवत्प्रयोगो यथा-स्थितेनऽग्नौ धूमाभावः, परमत्र धूमः। इत्थं पश्यामो यत् बौद्धतर्कभाषायां सर्वे हेतवोऽन्वयव्यतिरेकिणो।

अनुमानावयवाः—

बौद्धन्याये यद्यपि वसुबन्ध्वादिभिराचार्यैस्त्रयमेवावयवाः स्वीकृताः परं मोक्षाकरगुप्तेन तर्कभाषायामंनुमानावयवत्वेन व्याप्तिपक्षधर्मतेति स्वीकृते। अत्रावधेयं यत् व्याप्तावेव हेतूदाहरणयोरन्तर्भावः, पक्षधर्मतायां निगमनस्य प्रतिज्ञा पक्षस्य कथनं प्रसिद्धम्।

इत्थं नानाविधविवेचनेनेदं सिद्धयति यद्बौद्धतर्कभाषा तार्किकदृष्ट्या अत्यन्तं सारगर्भितग्रन्थो वर्तते। तात्पर्यदीपिकायामसौ ग्रन्थः बौद्धतर्कस्य दशसु महत्त्वपूर्णग्रन्थेषु एकतमः श्रेष्ठः धर्मकीर्तिपरम्परानिर्वाहकश्चास्ति।

वैदिकतर्कभाषायास्तर्कशास्त्रदृष्ट्या समीक्षा—

ऐतिहासिकदृष्ट्या मोक्षाकरगुप्तस्य (११००) ई. बौद्धतर्क-भाषाऽनन्तरमेव केशवमिश्रेण १२७५ ई. तमे वर्षे वैदिकतर्कभाषा लिलिखे। अस्यां हि तर्कभाषायां ब्राह्मणन्यायसिद्धान्तानां विशदं तथापि संक्षिप्तं वर्णनमुपलभ्यते। तथाहि वैशेषिकदर्शनस्य सिद्धान्तानां संक्षिप्ततया विवेचनमपि प्राप्यते। "तर्क्यन्ते प्रतिपाद्यन्ते इति तर्काः प्रमाणादयः षोडशपदार्थाः त" इति केशवमिश्रस्य तर्कलक्षणमत्रैव—"अविज्ञात-तत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानमूहस्तर्कः" इति न्यायसूत्रकर्तुः तर्क-लक्षणम्। एतदनुसारम् आत्मादिविशेषविवादग्रस्तविषयाणां तत्त्वनिर्णयाय

न्यायदर्शने कारणैर्युक्तिभिश्च विशेषोहापोहस्थितिः प्राप्यते, इयं स्थितिरेव च तस्य प्रधानविषय आसीदस्ति च। अतएव न्यायदर्शनमेव तर्क इति प्रसिद्धम्। अस्मिन्नेव प्रसङ्गे अनुमानस्य तत्प्रयोज्यहेतूनां तथाहि अशुद्धरूपहेत्वभासादीनां विवेचना कृता वर्तते। एवमेव तत्त्वनिर्णयोपयुक्त-तत्त्वानां विवेचनानन्तरं जल्पवितण्डादीनामपि विशदं वर्णनं कृतमस्ति।

वैदिकतर्कभाषायां प्रमाया अर्थात् यथार्थज्ञानस्य साधनमेव प्रमाणमिति स्वीकृतमस्ति। "प्रमायाः करणं प्रमाण" मर्थात् प्रमायाः करणमेव साधनमेव प्रमाणमिति। प्रमा नाम यथार्थानुभवः। इत्थं स्पष्टं प्रतीयते यत्प्रमालक्षणांशे यथार्थानुभवेति द्वयोः पदयोः समावेशः कृतो वर्तते। यदीत्थं पदयोः प्रयोगो न क्रियेत चेत् "यथार्थानुभवः प्रमा" स्थाने "अनुभवः प्रमा" कथनेन संशय-विपर्यय-तर्केष्वर्थादयथार्थानुभवेऽपि लक्षणस्य अतिव्याप्तिः, एतेऽपि प्रमात्वेन ज्ञास्यन्ते। अलक्ष्य-वृत्तित्त्वमतिव्याप्तिः। इति तल्लक्षणं यथा शृंगत्वं गोर्लक्षणम् इति अस्य लक्षणस्य महिषादिपशुषु अतिव्याप्तिः। ननु संशय-विपर्यय-तर्कादीनां लक्षणं किमिति चेत्—

कस्यचिदपि पदार्थस्य यथावत् यथास्वरूपेण ग्रहणमेव यथार्थानुभवोऽर्थात् वस्तुनः यथार्थप्रतीतिर्यथार्थानुभवः। एतद्विपरीत-मयथार्थानुभवः। अयथार्थानुभव एव अप्रमा।

विपर्ययः—

"विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठितम्" इति विपर्ययलक्षणं योगदर्शने यथा सूक्तौ रजतज्ञानम्। नैयायिकैरेतस्यैवातद्रूपस्यार्थस्य बोधाय "तदभाववति तत्प्रकारकं ज्ञानं प्रमा" इति निगदितम्। यदनुसारं तदभावयत् अर्थात् सूक्तौ रजतज्ञाननिवृत्तिवत् ज्ञानमेव प्रमा।

संशयतर्कयोः अप्रमात्वम्—

संशये पदार्थानां निश्चयात्मकं ज्ञानं न जायते। अनिश्चयात्मकत्वेनेदमपि अयथार्थमेव। तथैव तर्कोऽपि, यतोहि अनेनापि न किमपि निश्चयात्मकं ज्ञानमुत तर्कोऽपि अनिष्टप्रसङ्गत्वादयथार्थज्ञानमेव। "अविज्ञाततत्त्वेऽर्थे कारणोपपतिस्तत्त्वज्ञानार्थमूहस्तर्क". इति तल्लक्षणम्।

यद्यप्युभयविधमपि ज्ञानम् अनवधारणात्मकं परन्तु अनुमानप्रवर्तकत्वात् संशयं परम्भरया उपयोगि, तथाहि तर्कः तत्त्वज्ञाने साक्षादुपयोगि वर्तते।

अत्रावधेयं यत् यथार्थोऽनुभव एव प्रमा इति निगद्यते। अनुभवो नाम स्मृतिव्यतिरिक्तं ज्ञानम्। स्मृतिस्तावत् ज्ञातविषयकं ज्ञानम्। पूर्वं कस्यचिद् ज्ञातवस्तुनः स्मरणादुत्पन्नं ज्ञानमेव स्मृतिः यथा वा पूर्वं यदा कदापि वा वयं किमपि वस्तु जानीमस्तदा तद्विषयकस्संस्कारोऽस्माकं चित्ते तिष्ठति। वस्तुज्ञानमस्थायि संस्कारशेषि च, कालान्तरे केनापि कारणेन उद्बुद्धसंस्कार एव विना बाह्येन्द्रियं ज्ञानत्वेन आपद्यते तज्ज्ञानमेव स्मृतिज्ञानम्। स्मृतेरेकमपरमपि लक्षणं यथा ''संस्कारजन्यं ज्ञानं स्मृतिः'' इति प्राप्यते। एतदनुसारं स्मृत्योत्पादकसंस्काराणामुद्बोधकाः सादृश्यादयो वर्तन्ते, यतोहि सादृश्य-अदृष्ट-चिन्ताः स्मृतेर्बीजत्वेन ज्ञाताः। इत्थं ज्ञायते एव यत्-ज्ञानं त्रिविधं येषु द्वयोरनुभवस्मृत्योर्वर्णनमस्माभिः कृतमेव। तृतीयमवशिष्यते प्रत्यभिज्ञा। ''तत्तेदन्तावगाहिनी प्रतीतिः प्रत्यभिज्ञा'' इति तल्लक्षणम्। अस्याः परिष्कृतपदावलिः यथा—''तत्तेदन्तावगाहिनी प्रतीतिः प्रत्यभिज्ञा'' इति अर्थात् तत्ता इत्यस्याशयस्तद्रूपता। इत्त्थं पूर्वदेशकालेन वर्तमानदेशकालेन च सम्बद्धा वस्तुरूपप्रतीतिः प्रत्यभिज्ञेति। यथा पूर्वमन्यत्र दृष्टा काचित् व्यक्तिः यदि अद्यावलोक्यते तदाऽयं स एव यः तत्र दृष्ट आसीदति द्वितीयं यज्ज्ञानं तत्प्रत्यभिज्ञा। यद्यत्र ज्ञातविषयकं ज्ञानं स्मृतिरिति लक्षणं कुर्मस्तदा प्रत्यभिज्ञायामपि तस्य अतिव्याप्तिः स्यात् अतएव तर्कभाषाकारेण ''ज्ञातमात्रविषयकं ज्ञानं स्मृति'' रिति लक्षणं विधाय प्रत्यभिज्ञायामतिव्याप्तिः वारिता। प्रत्यभिज्ञा च इन्द्रियार्थसन्निकर्षत्वात् समुत्पन्नं ज्ञानम्।

प्रमां व्याख्यायाधुना करणं विवेचयामः। अत्रापि पाणिनिसूत्रमेव लक्षणत्वेनाङ्गीकृतम्—''साधकतमं करणम्'' अत्र करणं लक्ष्यं साधकतममिति लक्षणम् अतिशयार्थे च तमप् प्रत्ययप्रयोगः। अतः साधकतममित्यस्यार्थः प्रकृष्टोपकरणम् इत्थं किमपि कार्यं प्रति प्रकृष्टं कारणं करणमिति कथ्यते। परन्तु परिभाषाया अस्याः अस्पष्टत्वात् द्वितीयं लक्षणं यथा—''व्यापारवदसाधारणं कारणं करणम्'' अर्थात् व्यापारान्वितम्

असाधारणं कारणं करणमिति। व्यापारलक्षणं यथा "तज्जन्यः तज्जन्यजनको व्यापारः" अर्थात् व्यापारः करणादुत्पन्नः करणादुत्पन्नस्य जनको भवति यथा—असिना काष्ठं छिनत्ति। अत्र असिः करणं, काष्ठासिनोः संयोगश्च व्यापारः। तत्र प्रकृष्टलक्षणं यथा-व्यापारात्वञ्च प्रकर्ष इति प्राचीनाः। स्वानन्तरोत्पत्तिक-सहकार्यान्तरानपेक्षत्वमिति नवीनाः। कारणं त्रिविधं समवायि-असमवायि-निमित्तभेदात्।

"यत्समवेतं कार्यमुत्पद्यते तत्समवायि कारणमर्थात्" येन कारणेन सह कार्यस्य समवायसम्बन्धो भवति तत्समवायिकारणमिति तल्लक्षणम्। उदाहरणतया तन्तवः पटस्य समवायिकारणं यतोहि समवायिकारण-भिन्नकारणैस्सह कार्यस्य समवायसम्बन्धो नैव भवति प्रत्युत तैस्सह संयोगादिसम्बन्धो भवति यथा—तुर्यादिभिस्सह पटस्य संयोगसम्बन्ध एव। अत्रावधेयं यत् द्वयोरयुतसिद्धयोः पदार्थयोः सम्बन्ध एव समवायसम्बन्धः। तद् भिन्नयोस्तु संयोग एव।

"यत्समवायिकारणप्रत्यासन्नम् अवधृतसामर्थ्यञ्च तदसमवायि कारणम्" अर्थात् यत् समवायिकारणे प्रत्यासन्नं भवेत् तथाहि यस्मिन् कारणलक्षणं घटति तदसमवायिकारणम्। यथा—तन्तुसंयोगः पटस्य असमवायिकारणम्।

निमित्तम्—"समवायिकारणं नाप्यसमवायिकारणं परं कारणं तन्निमित्तमिति" अर्थात् यन्नपि समवायिकारणं नाप्यसवायिकारणमथ कारणं तन्निमित्तकारणमिति तल्लक्षणम्।

प्रत्यक्षप्रमाणम्—यथोक्तं प्रमाणलक्षणं—"प्रमाकरणम्प्रमाण-मिति" तत्र करणानां स्वरूपं प्रदर्श्याधुना प्रमाणस्वरूपं प्रतिपाद्यते, तत्राऽदौ "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इति न्यायदर्शने प्रमाणा-नाञ्चातुर्विध्यं स्वीकृतम्। तत्राद्यस्य प्रत्यक्षस्य लक्षणं यथा—"साक्षात्कारि-प्रमाकरणं प्रमाणम्" अर्थात् प्रत्यक्षप्रमाणं तत् येन साक्षात्कारिप्रमोत्पद्यते तथाहि प्रमा सा या इन्द्रियजा। साक्षात्कारिप्रत्यक्षप्रमाऽपि द्विविधा निर्विकल्पक-सविकल्पकभेदात्।

निर्विकल्पकप्रत्यक्षप्रमा—

"वस्तुमात्रावगाहिज्ञानं निर्विकल्पकम्" अथवा "नामजात्यादि-योजनारहितं ज्ञानं निर्विकल्पकम्" इति निर्विकल्पकप्रत्यक्षप्रमालक्षणम्। अस्यायमाशयो यत् निर्विकल्पक- प्रत्यक्षप्रमायां वस्तु-पदार्थ-पिण्डादीनां नामजात्यादिविरहितं वस्तुमात्रावगाहिज्ञानमुत्पद्यतेऽर्थात् विशेषणविशेष्य-रहितं ज्ञानम्। यतः प्रमायाः करणं प्रमाणं ततः निर्विकल्पकप्रत्यक्षप्रमायाः करणं निर्विकल्पकप्रत्यक्षप्रमाणमिति सिद्धम्।

सविकल्पकप्रत्यक्षप्रमाः—

"विशेषणविशेष्यावगाहिज्ञानं सविकल्पकम्" अथवा "नाम-जात्यादियोजनासहितं ज्ञानं सविकल्पक" मिति तल्लक्षणम्। अस्यायमाशयो यत् इयं प्रमा विशेषणविशेष्यसम्बन्धग्राहिणी भवति। इह नामजात्यादियोजनासहितं ज्ञानं यथा श्यामोऽयं ब्राह्मणोऽयमित्यादि ज्ञानमुत्पद्यते। सविकल्पकप्रत्यक्षप्रमायाः करणत्वात् सविकल्पकप्रत्यक्ष-प्रमाणमिति निर्विकल्पक-प्रत्यक्षप्रमायाः करणत्वात् प्रत्यक्षप्रमाणमपि द्विविधं निर्विकल्पक-सविकल्पभेदात् उभयोरुदाहरणं यथा-चक्षुरिन्द्रयघटसन्निकर्षाद् घद्घटस्य स्वरूपप्रतीतिः तन्निर्विकल्पक-प्रत्यक्षमिति। इयं प्रतीतिः "यत्किञ्चिदिदम्" प्रकारेण दर्श्यते। इत्थमेव यथोक्तं सविकल्पंकलक्षणं तदनुसारं-डित्त्थोऽयं ब्राह्मणोऽयमित्यादि विशेषणविशेष्यज्ञानयुतं ज्ञानं सविकल्पकमिति। इदञ्च निर्विकल्पक-ज्ञानान्तरमुत्पद्यते।

इत्थं सिध्यति यत् प्रत्यक्षप्रमायाः करणमेव प्रत्यक्षप्रमाणमिति निगद्यते। यद्यपि "प्रतिगतमक्षं प्रत्यक्षम्" इति व्युत्पत्या इन्द्रियम् (अक्षम्) एव प्रत्यक्षकरणत्वेन गृह्यते तथापि फलभेदात् करणमपि त्रिप्रकारकं यथा— (१) इन्द्रियम् (२) इन्द्रियार्थसन्निकर्षम्। (३) ज्ञानम्। अत्रापि इन्द्रियस्य करणत्वं तदा यदा वस्तुनः केवलं निर्विकल्पप्रत्यक्षम्। इह हि आत्मा मनसा, मनः इन्द्रियेण, इन्द्रियः अर्थेन सह सम्बध्यते तदा "यत्किञ्चिदिदम्" इत्या-कारकं ज्ञानमुत्पद्यते यद्धि निर्विकल्पकमिति निगद्यते। केनापि साधनेन

फलप्राप्तिसन्दर्भे करण-अवान्तरव्यापार-फलानि भवन्ति यानि अत्र समुपलभ्यन्ते।

इतः परमनुमानप्रमाणस्य तार्किकदृष्ट्या विवेचनं करिष्यते। अनुमानं न्यायशास्त्रस्य द्वितीयं प्रमाणं तथाहि न्यायदर्शनस्य प्रमुखो विषयः। प्रत्यक्षप्रमाणागमाश्रितञ्च भवति[1] अनुमानप्रमाणम्।

अनुमाननिरूपणम्—

इह ध्यातव्यं यदनुमानप्रमाणस्य निरूपणं द्विधा क्रियते। प्रथमं प्रमाणत्वेन द्वितीयं प्रमात्वेनार्थात् अनुमानप्रमाणादुत्पन्न-प्रमात्वेन या ह्यनुमितिरिति निगद्यते। यथा "अथ तत्पूर्वकं त्रिविधमनुमानम्"।[2] तत्र अनुमानप्रमाणस्य वाचकानुमानशब्दस्य व्युत्पत्तिरस्ति—"अनुमीयतेऽनेनेति (येनाऽनुमीयते) येन हि अनुमीयते तद् अनुमानम्। अनूपसर्गपूर्वकात् मा धातो करणार्थे ल्युट्-(अन्) प्रत्ययद्वारा अनुमान शब्दो निष्पद्यते। अनु इत्यस्य अर्थो भवति पश्चात्। मानम् इति शब्दस्य ज्ञानमथवा प्रमाणमर्थो जायते। प्रमाणमिदमाश्रितं भवति प्रत्यक्षागमयोः, अर्थात् वक्तुम् इदं शक्यते यत् प्रत्यक्षागमयोरनन्तरमिदं प्रमाणं भवति। अतएवाऽस्य अनुमानप्रमाणमिति संज्ञोपलभ्यते।" "अनुमीयते" इत्येतस्य अर्थोऽयं भवति यत् अनुमितिः क्रियते। अतोऽनुमानप्रमाणस्य फलं वर्ततेऽनुमितिः। अनुमितिः (प्रमा) अस्ति। तत् फलं यत् येन साधनत्वेन सम्पन्नतामेति "तदनुमानमित्यभिधीयते।"

"लिङ्गपरामर्श एव अनुमितिरुच्यते। व्याप्तिबलेन अर्थस्य यो बोधो भवति-तद् लिङ्गमुच्यते। यथा धूमोऽग्नेर्लिङ्गमस्ति। यत्र धूमत्वं तत्र वह्नित्वमपि दृश्यते। अयमेव साहचर्यनियमो व्याप्तिपदवाच्यो भवति। एतद्व्याप्तिनिश्चयानन्तरमेव धूमः अग्नेश्च बोधं कारयते। अतएव व्याप्ति-बलत्वावच्छिनेन धूमः अग्नेरनुमापककारणत्वात् धूमः अग्नेर्लिङ्गमस्ति।

लिङ्गशब्दस्य व्युत्पत्तिरस्ति—लीनमर्थं गमयति इति-अर्थात् यो लीनस्य (परोक्षस्य) अर्थस्य बोधं कारयति।

---

१. *वात्स्यायन-न्यायभाष्यम् १.१.१*

२. *न्यायसूत्रं न्यायभाष्यम् १.१.५*

लिङ्गस्य लक्षणमस्ति—"व्याप्तिबलेनार्थगमकं लिङ्गम्" व्याप्तिग्रहणस्य स्मरणस्य पश्चात् यस्य परोक्षार्थस्य बोधं जनयति तदेव "लिङ्गम्" अथवा हेतुरित्युच्यते। इदं परोक्षार्थस्य ज्ञापकं भवति।

व्याप्तिः—यत्र वस्तुद्वयस्य स्वाभाविकः सम्बन्धो भवति व्याप्तिरिति निगद्यते। यथा धूमस्य अग्नेश्च स्वाभाविकः सम्बन्धो दृश्यते।

न्याय-वैशेषिकमतानुसारम्—एतद्व्याप्तिनिश्चयो भूयः सहचार-दर्शनेन भवति। अर्थात् भूयो धूमाग्निसहचारदर्शनत्वात्। इदमाधारीकृत्य यदा धूमो दृश्यते तदा निश्चयो भवति यदत्र अग्निरस्ति।

अत्र शङ्क्यते यत् भूयः सहचारदर्शनमेव व्याप्तिः स्वीक्रियतां तदाऽयमपि सम्बन्धः स्वीकार्यो भविष्यति यत्-मैत्रीपुत्रस्य श्यामरङ्गत्वात्। परन्तु एतदसम्भवं मैत्रीपुत्रो न केवलः श्यामरङ्गवान् अपितु तस्य गौरवर्ण-सम्भवत्वादिति। अतोऽत्र न स्वाभाविकसम्बन्धदर्शनम्। अपितु औपाधिकः सम्बन्धोऽस्ति तन्मैत्रीपुत्रस्य श्यामवर्णकारणेन शाक इत्यादि प्रयोगो वर्तते। अतोऽयं सम्बन्धः औपाधिकः न तु स्वाभाविकसम्बन्धः।

अनेन प्रकारेण स्वाभाविकसम्बन्धः निश्चयेन जायते भूय-सहचार दर्शनत्वात्। सम्बन्धमिमं स्वाभाविकसम्बन्धं निर्मातुमिच्छा स्यात्तर्हि उपाधिविशिष्टहेतुप्रयोगः करणीयः। यथा—"अमुकः श्यामः शाकपाक-जन्यत्वे सति मैत्रीतनयत्वात्"।

अधुना प्रश्नोऽयं समुदेति यत् "उपाधिनाम किम्?—तार्किक-शब्दावल्याम्" "उपाधि"—लक्षणम् इदमस्ति—"साध्यव्यापकत्वे सति साधनाव्यापकः उपाधिः।" अर्थात् यद्धर्मः साध्यवापकीभूय साधन-व्यापको न भवति तदुपाधिपदवाच्यो मन्यते कथ्यते वा। अर्थात् यत्र वह्निसम्भवत्वं तत्र धूमस्यापि उपस्थितित्वम्, जलमिश्रितकाष्ठसम्भवे। अतोऽयमुपाधिरस्ति। बहुषु स्थलेषु वह्निसम्भवं न तु धूमसम्भवत्वमिति।

अतोऽनेन प्रकारेण आर्द्रकाष्ठस्य संयोगनामको यो धर्मोऽस्ति-असौ साध्यव्यापकः साधनव्यापकश्चोभयमेव भवति। अत उपाधिरयं वर्तते।

व्याप्तिविषये इदमुच्यते यत्-धूमस्य अग्नेश्च साहचर्यग्रहण-शीलप्रत्यक्षत्वेनैव (व्याप्ति)-निश्चयेन भाव्यम्, किन्तु तस्मिन् प्रत्यक्षे

उभयपूर्वानुसंस्कारोऽवश्यमेव सहायको भवति। (क) प्रथमन्तु येन प्रत्यक्षेण उपाधेरभावनिश्चयो भवति-तस्य प्रत्यक्षानुभवस्य संस्कारो विद्यमानो जायते।

(ख) द्वितीयं येन महानसादौ धूमस्य अग्नेश्च प्रत्यक्षीकरणं कृतमस्ति तत्संस्कारोऽपि विद्यमानो भवति।

एतदुभयसंस्कारयुक्तस्य येन धूमाग्न्योः साहचर्यग्राहकं प्रत्यक्षमस्ति। तद्द्वारैव धूमस्य अग्नेश्च स्वाभाविकसम्बन्धस्य निश्चयो भवति। अतोऽनेन प्रकारेण धूमाग्न्योरौपाधिकसम्बन्धो न अपितु स्वाभाविकसम्बन्धोऽस्ति। अयमेव स्वाभाविकसम्बन्धः साहचर्यनियमोऽथवा व्याप्तिरुच्यते।

तार्किकदृष्टिः (व्याप्त्यै) (पक्षधर्मतायै) विशेषं महत्त्वं ददाति। अधुना वैदिकतर्कभाषाद्वारा निरूपितव्याप्तिपक्षधर्मताविषये विशेषो दृष्टिपातः उपस्थाप्यते। व्याप्तिरनुमानस्य तार्किकमङ्गमस्ति एवञ्च पक्षधर्मता मनोवैज्ञानिकमङ्गं वर्तते। अतस्तार्किकदृष्टिकोणमाधारीकृत्य अर्थात् व्याप्तिमङ्गीकृत्य वैदिकतर्कभाषायाः समीक्षणं प्रस्तूयते—

महर्षिगौतमेन सर्वप्रथमम् अनुमानस्य भेदत्रयं कृतम्—१. पूर्ववत् २. शेषवत् ३. सामान्यतोदृष्टञ्च।

१. पूर्ववत् अनुमानम्—कारणत्वावच्छिन्ने यत्र कार्यत्वस्य अनुमानं क्रियते, तत्पूर्ववत् अनुमानमित्युच्यते। यथा मेघोन्नतया वृष्टिं साधयति। अर्थात् मेघोन्नतिं दृष्ट्वा वृष्टिरूपकार्यस्याऽनुमानं क्रियते।

२. शेषवदनुमानम्—यत्र कार्यत्वावच्छिन्नेन कारणत्वस्य अनुमानमुपलभ्यते। यथा-समुद्रे जलाधिक्यमालोक्य नूनमेव वृष्टिरभवदित्यनुमानम्।

३. सामान्यतोदृष्टमनुमानम्—गतिपूर्वकमन्यत्र दृष्टस्य अन्यत्र क्वचिदपि सामान्यदर्शनत्वं। यथा सूर्यचन्द्रतारकादीनाम्। सूर्यस्य अप्रत्यक्षगताऽपि गतिः सूर्यस्यास्ति—इदं सामान्यतोदृष्टेनाऽनुमानेन सिद्ध्यति। अत्र सूर्यस्य भगवतो देशान्तरप्राप्तत्वात्। अविनाशित्वात् वृद्धिरहितत्वात् द्रव्यत्वात् प्राच्यामुपलब्धत्वात् द्वारदिशः सम्मुखसम्बन्धेन

दर्शनं कुर्वाणस्य मनुष्यस्य पादयोरचलनत्वात् परावर्तनदर्शनेन दिगियं सूर्यस्येति। एतज्ज्ञानजन्यत्वेन मण्यादिवत् अनुमानमिदमस्ति।

पूर्वमेतत् वाचस्पतिमिश्रेण सांख्यतत्वकौमुद्यां वीतम् अवतञ्चानु-मानस्य भेदद्वयं स्वीकृत्य पुनरस्य त्रीणि अनुमाननि अर्थात् भेदत्रयं कृतं यत् उपर्येव प्रस्तुतमस्ति।

यदनुमानं विधिवाक्यान्याधारीकृत्य अन्वयमुखं भवति-तद् 'वीत'-पदवाच्यं मन्यते। तथा च यत् निषेध-वाक्यावलम्बनत्वेन व्यतिरेकमुखं भवति तद् 'अवीतम्' इत्युच्यते।

वीतस्य उदाहरणम्—यत्र धूमत्वमस्ति। तत्रा वह्नित्वमस्ति।

यथा महानसादिः। इदमेव वीतमनुमानं कथ्यते।

अवीतस्योदाहरणम्—यत्र न वह्नित्वम्। न तत्र धूमत्वम्।

तर्कभाषाकारेण अनुमानस्य द्वौ भेदौ स्वीकृतौ वर्तेते

1. स्वार्थानुमानम्—स्वज्ञानहेतुस्वार्थानुमानम्।

यथा महानसादौ धूमम् आलोक्य साहचर्यनियमो व्याप्तिरित्यवलम्ब्य व्याप्तिनिश्चयः क्रियते अग्नित्वसम्भवात् धूमत्वसम्भवत्वम्। पुनः पर्वतादावपि उड्डीयमानं धूमं दृष्टवा व्याप्तिमाधारीकृत्य निश्चीयते यत्तत्र अग्नित्वभावत्वं निश्चितमिति। अतोऽनेन प्रकारेण यदा मनुष्यः स्वयमेव अनुमानं करोति यदत्र धूमोऽसत्ति-तदैव 'मानम्' इत्यभिधीयते।

2. परार्थानुमानम्—तथा यत्र धूमेन स्वयमेव अग्निमनुमाय तदेव अन्यं बोधयितुं (पञ्चायववाक्यस्य) प्रयोगो यदा क्रियते-तदेव परार्थानुमानं कथ्यते। यथा (पञ्चावयवयुक्ताऽनुमानवाक्यस्य प्रयोगस्य उदाहरणं प्रस्तूयते)

1. पर्वतोऽयम् अग्निमानस्ति। (प्रतिज्ञा)

1. सांख्यकारिकायां पञ्चाम्यां सांख्यतत्वकौमुद्याम्।

2. धूमयुक्तत्वात्। (हेतुः)

3. यत् यत् धूमयुक्तं। तत्तत् वह्नियुक्तम्।

यथा महानसादिः। (उदाहरणम्)

४. अयं पर्वतोऽपि तथैव धूमवानस्ति। (उपनयः)

इदं व्याप्ति-विशिष्ट-पक्षधर्मताज्ञानम् अथवा लिङ्गपरामर्श-

रूपानुमानमपि प्रोच्यते। यतोहि एतत् पश्चात् (निगमनरूपात्मक:) (पञ्चमावयव:)अतएव वह्निमान् वर्तते। एतत्प्रकारकं ज्ञानमुत्पद्यते, यदनुमितिरूपमस्ति। इदम्प्रकारेण यत्र प्रतिज्ञादिपञ्चावयव-द्वारा प्रतिपादित—(1. पक्षसत्व, 2. सपक्षसत्व 3. विपक्षत्यावृत्तत्व, 4. अबाधित विषयत्व 5. असत्प्रतिपक्षत्व) एतदग्रे वक्षमाणै: पञ्चरूपै: युक्तेन लिङ्गेन (हेतुना) अपरोऽपि नरो वह्निं जानीते। अतएव परार्थानुमानमन्यस्मै बोधं जनयति। अर्थात् परबोधकानुमानमस्ति।

अनेन प्रकारेण अनुमानस्य भेदद्वयस्योपस्थापनान्तरं व्याप्ति-निर्धारणपश्चाच्च व्याप्तेर्भेदौ निरूप्येते—

१. अन्वयव्याप्ति: २. व्यतिरेकव्याप्तिश्च। एतद्व्याप्तिप्रकारद्वयेन (केवलान्वयी) (केवलव्यतिरेकी) (अन्वयव्यतिरेकी) त्रयो हेतवो मता: सन्ति।

१. अन्वयप्याप्ते: परिभाषा उदाहरणञ्च—यत् साध्यो व्यापकस्तथा साधनं व्याप्यं भवति, तदन्वयव्याप्तिरुच्यते।

उदाहरण्—यत्र यत्र धूमो भवति
तत्र तत्र बह्निर्भवति

२. व्यतिरेकव्याप्ते: परिभाषा उदाहरणाञ्च—यत्र हि साध्याभावो व्याप्य: साधनाभावंश्च व्यापको, तद्व्यतिरेकव्याप्तिरिति निगद्यते।

उदाहरणम्—यत् कृतकं तदनित्यम्—अत्र कृतकं हेतु: व्याप्योऽस्ति, अतएव् एतत्पूर्वप्रयोगसम्भवत्वम्) परन्तु यदा व्यतिरेक-व्याप्तिर्निमीयते तदा उभयेन सह (अभावपद:) संयुक्तो भवति। तथा च व्याप्य-व्यापकभावयो: परिवर्तनं जायते। "यत्र यत्र अनियत्वाभाव: तत्र तत्र कृतकृत्वाभाव:" इयं व्यतिरेकव्याप्तिर्भवति। तथैतस्यौदाहरणाकाशम। अतोऽनेन प्रकारेण इत्थं (कृतकत्वहेतु:) (उभयव्याप्तौ) उदाहरणत्वेन प्राप्तत्वात् "अन्वयव्यतिरेको हेतुरूच्यते"

अर्थात्—यत्र कृतकत्वं तिष्ठति। तत्र अनित्यत्वमपि भवति।

यथा घट:। परन्तु यत्र अनित्यत्वस्याभावो भवति तत्र कृतकत्वाभावोऽपि तिष्ठति। **यथा आकाशम्**

आकाशे अन्वयव्याप्तिस्तथाव्यतिरेक-व्याप्तिश्च प्राप्येते।

अत इदं वर्तते अन्वय-व्यतिरेकी हेतुरिति।

एतत्पश्चात् केवलान्वयि-केवलव्यतिरेकि अन्वयव्यतिरेकि इति त्रयम् उपस्थाय (परार्थानुमानसन्दर्भे) वक्ष्यते यत् "अनेन वाक्येन प्रतिज्ञादिमता प्रतिपादितात् पञ्चरूपोपन्नात् लिङ्गात् परोक्षाग्निः प्रतिपद्यते"। अनेनेदं सिद्ध्यति यत् हेतुः पञ्चरूपयुक्तत्वात् शुद्धो हेतुरुच्यते। अतो हेतुपञ्चरूपाणि अत्र प्रस्तूयन्ते।

१. **पक्षसत्त्वम्**—हेतुपक्षसत्त्वम्।

२. **सपक्षसत्त्वम्**—हेतुसपक्षसत्त्वम्।

३. **विपक्षव्यावृत्तिरथवा विपक्षासत्वम्**—हेतुविपक्षाऽभावत्वम्।

४. **अबाधितविषयत्वम्**—साध्याऽबाधितत्वम्।

५. **असत्प्रतिपक्षत्वम्**—प्रतिपक्षिहेतोरभावत्वम्।

इदम्पञ्चप्रकारयुक्तहेतुरेव सद्हेतुरस्ति। एतेषु यदि एकमपि रूपं हेतावनुपस्थितं स्यात्तदा तद्धेतुरतसद्हेतुरित्युच्यते। अथवा हेत्वाभासोऽपि कथ्यते। अर्थात् **पक्षः** तदुच्यते यत्र साध्यसिद्धिः क्रियते। इदं हेतोः प्रथमं रूपमस्ति। हेतुद्वितीयं रूपं वर्तते-**सपक्षो**-यत्र साध्यादिवह्नित्वस्य सिद्धिः क्रियते। अतवा निश्चयो लभ्यते। हेतोस्तृतीयं रूपं वर्तते—**विपक्षाद् व्यावृत्तिः**-विपक्षे हेतोरभावः विपक्षोऽयमुच्यते-यत्र साध्याभावो निश्चितो भवति। प्रस्तुतामाने जलाशयो (विपक्षः) वर्तते तत्र वह्न-भावनिश्चयत्वात्। हेतोश्चतुर्थरूपम् अबाधित विषयत्वं विद्यते। अर्थात् एतादृग्हेतुः यस्य विषयः नान्येन केनचित् प्रमाणेन बाधितो भवति। धूमवत्वहेतोः विषयः (साध्यम्) यत् पर्वते अग्निमत्वमस्ति, यत् अन्येन केनचिदपि प्रमाणेन बाधितो भवति। अयमेव अबाधितहेतुरस्ति, अर्थात् अबाधितविषयत्वमस्ति।

हेतुपञ्चरूपम् (असत्प्रतिपक्षत्वम्) अस्ति, साध्यस्य विपरीतार्थ-प्रतिपादको हेतुः असत्प्रतिपक्षो वर्तते-यथा "शब्दो नित्यो नित्यधर्म-रहितत्तवात्" अतो या (साध्यस्य) अनित्यताऽस्ति—तद् विपरीतं नित्यता

वर्तते। एतत्प्रतिपादकोऽन्यो हेतुरस्ति ''शब्दो नित्योऽनित्य्-धर्मरहितत्वात्।'' अत्र उभावपि हेतू विपरीतार्थं प्रतिपादयतः। उभयस्य (प्रतिपक्षः) विद्यमानोऽस्ति। अतः उभावपि (सत्प्रतिपक्षौ) वक्तुं शक्येते। यस्य प्रतिपक्षस्य अर्थात् विपरीतार्थस्य साधकः नान्यो हेतुर्भवति। अतएव असावसत्प्रतिपक्षहेतुर्वर्तते। धूमत्वहेतोः साध्यविपरीतार्थस्य साधकः अन्यो हेतुः नास्ति अतोऽयं हेतुः असत्प्रतिपक्षहेतुरस्ति।

अनेन प्रकारेण धूमत्वहेतुः पूर्वोक्तपञ्चरूपयुक्तः अस्ति। अतः अयं स्वसाध्य-सिद्धौ समर्थस्तथा सद्धेतुः वर्तते। अतो दृश्यते-यत् केशवमिश्रस्य तर्कभाषाऽपि कृतास्ति तथा तत् सिद्धमर्थं षोडशपदार्था अपि स्वीकृता वर्तन्ते।

यशोविजयेन जैन-तर्कभाषायां तर्कस्य यत् स्वरूपं प्रस्तुतं वर्तते, तत्समीक्षणमत्र तार्किकदृष्ट्या क्रियते।

यद्यपि वैदिकतर्कभाषायां तर्कस्य यत्स्वरूपं कृतं विद्यते तत् बौद्धैः सह संघर्षस्य परिणामोऽस्ति। मध्यकाले बौद्धस्य जैनस्य च न्यायप्रादुर्भावो जातः। यतोहि भारतीय-साहित्ये न्यायशास्त्रस्य पथनिर्देशः प्रायो धार्मिकभावनया कृतोऽस्ति। समाजे यथा तथा धार्मिकक्रान्तयः काले काले समुपस्थिता न्यायशास्त्रस्वरूपे तद्रूपं स्पष्टरूपेण अङ्कितं जातम् एतदाधारीकृत्यैव न्यायकाले विभाजनं त्रिषु कालेषु क्रियते—१. प्राचीन-न्याय, २. मध्यन्यायस्तथा ३. नव्यन्यायः।

१. प्राचीनन्यायः—बौद्धधर्मस्य प्रादूर्भावप्रतिष्ठयोश्च पूर्वं न्यायः (प्राचीनन्यायः) प्रोच्यते।

२. मध्यकालन्यायः—बौद्धजैनयोर्न्यायस्तथा बौद्धधर्मस्य पतनस्य ब्राह्मणधर्मस्य पुनरुथानकालः मध्यन्याय-कालः कथ्यते।

३. नव्यन्यायः—भारतस्य धार्मिकजगति बौद्धधर्मः भीषण-क्रान्तिरूपत्वेनोद्भूतः तथा बौद्धन्यायसमकालीनस्य तथा समानतन्त्रस्यापि समानैव स्थितिरस्ति।

अतोऽनेन प्रकारेण दृष्टं यत् बौद्धन्यायस्य दिङ्नागात् (४५०-५००) आरभ्य मोक्षाकारगुप्तपर्यन्तं (११००) यावत् निर्माणं जायमानमासीत्।

अनेन प्रकारेण जैनन्यायस्य प्रादुर्भावः आचार्यसिद्धसेनदिवाकरात् आरभ्य (४८०-५५०) यशोविजयकृज्जैनतर्कभाषापर्यन्तम्। १६०८-१६८८) उत्तूङ्गतां गतः। जैनतर्कभाषायां जैनदृष्ट्या न्यायस्य विवेचनं कृतं वर्तते। समीक्षणमस्याग्रे करिष्यते।

"[1]सकलदेशकालाद्यवच्छेदेन सांध्यसाधनभावादिविषय उहस्तर्कः" यथा "यावान् कश्चिद्धूमः स सर्वो वह्निः भवति।" "वह्निं विना भवति।" "घटशब्दमात्रं घटशब्दवाच्यम्"। इत्यादि तर्कयामि। इत्यनुभवसिद्धेन तर्केण सकलसाध्यसाधनव्यक्त्युपसंहारेण व्याप्तिग्रहोपपत्तौ सामान्यलक्षणप्रत्त्यासत्तिकल्पने प्रमाणाऽभावात् ऊहं विना ज्ञातेन सामान्येनापि सकलव्यक्तानुपस्थितेश्च वाच्यवाचकभावोऽपि तर्केणैवावगम्यते, तस्यैव सकलशब्दार्थगोचरत्वात्। प्रयोजकवृद्धोक्तं श्रुत्वा प्रर्वतमानस्य प्रयोज्यवृद्धस्य चेष्टामालोक्य तत्कारण-जनकतां शब्देऽवधारयन्तो (यतो)ऽन्त्याभावश्रवणपूर्वावयवस्मरणोपाय - जनितवर्णपदवाक्य - विषयसङ्कलनात्मक-प्रत्यभिज्ञानवतआवापोद्वापाभ्यां सकलव्यक्त्युपसंहारेण च वाच्य-वाचकभाव-प्रतीतिदर्शनादिति। अयं च तर्कः सम्बन्धप्रतीत्यन्तरनिरपेक्ष एव स्वयोग्यता-सामर्थ्यात् सम्बन्धप्रतीतिं च नयतीति नानावस्था।

समस्तदेशकालसम्बन्धिसाध्यसाधनभावादिवाच्यावचकभावं यो जानात्यसौ (तर्कः) वर्तते।

यथा—"यः कश्चिदपि धूमो भवति।"

"तत्सर्वो हि अग्नित्वे सत्येव भवति।"

"नाग्निं विना भवति।"

तथा—"यो यो घटशब्दोऽस्ति"

"सः सर्वो हि घटस्य (अर्थस्य) वाचको भवति।"

"यो यो घटपदार्थो वर्तते"

"स सर्वोऽपि घटशब्दवाच्योऽस्ति।"

---

१. जैनतर्कभाषा पृ० ३२-३३

"तर्कयामि" अनया प्रतीत्या तर्कप्रमाणं सिद्ध्यति। अनेन तर्केण समस्तसाध्यसाधव्यक्तीनाम् उपसंहारो भूत्वा व्याप्तिग्रहणं भवति सामान्य-रूपप्रत्यसत्तिकल्पनाप्रमाणाभावात्।

अतएव सामान्यज्ञाने जाते सति तर्कं विना समस्त-व्यक्तीनामुपस्थितिग्रहणाऽसम्भवम्। वाच्यवाचकावपि तर्कद्वारैव ज्ञायेते। तर्कस्य सकल-वाच्यवाचक-विषय-सम्भवत्वात्। जैनतर्कभाषायां यत् स्वरूपं प्रदत्तमस्ति, तस्य विभाजनं क्षेत्रद्वये भवति प्रथमक्षेत्रं ज्ञानस्य वर्तते, यत्र अस्माभिः ज्ञातुमिष्यते यत् वस्तु वस्तु स्वस्वरूपे कीदृशमस्ति ? अत्रापि द्वयं सापेक्षता तिष्ठति।

उदाहरणम्—यथा चन्द्रो महान् सन्नपि लघुः दृश्यते न्याय-वेदान्तादाविदं भ्रमरूपं मन्यते। परन्तु यशोविजयस्य कथनमस्ति यत् यदि दूरनित्यादि अपेक्षाणां ध्यानस्थापनं स्यात् तदा ज्ञानमिदं न भ्रमरूपात्मकम्।

अस्माकं केचन निर्णयाः स्वार्थमाधारीकृत्य भवन्ति प्रचलन्ति वा। एकस्य एव मनुजस्य पुत्रपितृभ्रातृत्वात्। न्यायदर्शनं वस्तुलक्ष्यि ज्ञानं मन्यते। अन्यत्र अद्वैतवादिपरम्पराः आत्मलक्ष्यि मन्यन्ते। तेषां कथनमस्ति यत् बाह्यवस्तूनि कल्पनाभूतानि केवलानि सन्ति। **जैनदर्शनस्य कथनमस्ति**-प्रत्येकं ज्ञाने स्वः परश्च उभेऽपि तत्त्वे मिलिते भवतः। अतः कस्यापि अपेक्षा कर्तुं न शक्यते। यदाऽवलोकयामो वयं वस्त्वेकं स्वार्थमाधारीकृत्य विभिन्न-दृष्ट्या तर्हि एका एव व्यक्तिः मनुष्य-ब्राह्मण-अध्यापक-देव-दत्तादिशब्दैः प्रकटीक्रियते। एतस्य चयनस्याधारो भवति तात्कालिकः स्वार्थः। अतोऽत्र (अपेक्षावादस्य) सिद्धान्तो दृष्टिगोचरी-भवति। येन कश्चिदपि तर्कः असत्यो नास्ति। अपेक्षावादसिद्धान्तेन सर्वेऽपि तर्काः सत्याः भवन्ति।

जैनतर्कभाषायास्तार्किकदृष्ट्या समीक्षायां कृतायां सत्यां ज्ञातमिदं भवति यदेतस्यपि मुख्यविषयः एव प्रमाणमस्ति तथा शास्त्रार्थ-युगे प्रत्यक्षापेक्षायामनुमानस्योपरि विशेषं बलं दीयते। इदमेव कारणमस्ति यत् हेतुविद्या-तर्कशास्त्रस्य मुख्यविषयो जाताः।

अनेकविचारकाणां स्वीकारोऽयमस्ति यत् अनुमानप्रमाणाऽस्वीकारे सति प्रत्यक्षप्रमाणसिद्धिर्न भविष्यति। प्रत्यक्षप्रमाणसाधनभूतेन्द्रि-

यातिन्द्रियत्वात् स्वसिद्धयनुमानापेक्षत्वात्। यदि परिहीयतेऽनुमानं तर्हि भारतीयसंस्कृतेः स्वरूपमेव विनष्टं भविष्यति। भारतस्य सम्पूर्णा विद्या शास्त्राणि वाङ्मयानि च अनुमानाधारशिलामाधारीकृत्यैवावलम्बितानि सन्ति। आगमिकजैन-ग्रन्थेषु मोक्षोपयोगि ज्ञानमेव यथार्थज्ञानम्। अथवा मिथ्याज्ञानस्य सिद्धयै आधार आसीत्। जैनतर्कभाषाकारस्य यशोविजयस्य तर्कभाषायां तार्किकदृष्ट्या प्रमाणानामवलोकनेन प्रमाणानां यत् स्वरूपमनेन प्रस्तुतीकृतमस्ति तल्लिख्यतेऽधः—

"स्वपरव्यवसायिज्ञानं प्रमाणम्"

जैनतार्किकैः प्रमाणफलस्य (स्वस्य) (परस्य) च उभयमपि ज्ञानं मतमस्ति परन्तु यशोविजयेन केवलं स्वस्यैवोल्लेखः कृतो वर्तते। तस्याऽभिप्रायो विद्यते यत् ज्ञानस्य अर्थप्रतिभासमादाय प्रकाशनं फलं वर्तते। अत्र अर्थज्ञानयोः प्रतिभासभिन्नत्वम्। ज्ञानमेव साकाररूपेण प्रतिभासि भवति।

उदाहरणम्—अस्माभिर्दर्पणे स्वप्रतिबिम्बः दृश्यते। दर्पणे प्रतिबिम्बपतनं कारणस्ति। एवञ्च प्रतिबिम्बयुक्तदर्पणस्य प्रतिभासः फलं वर्तते। अस्मिन् प्रतिभासे प्रतिबिम्बस्य न स्वतन्त्रता।

जैनदर्शनं निराकारम् एवं साकारं, बाह्यम् एव आभ्यान्तरं प्रत्येकं ज्ञानम् आत्मनो गुणं मन्यते। यशोविजयस्य कथनमस्ति यत् चेतना तस्य स्वरूपं वर्तते, तदेव यदा निराकारं भवति, तदा दर्शनमुच्यते, साकारे सति ज्ञानं कथ्यते। दैनन्दिनानुभूतिव्याख्याकृते आत्मनो गुणोऽयं अवस्थाद्वये विभज्यते। प्रथमा अवस्था लब्धिस्तथा द्वितीयावस्था उपयोगः कथ्यते। लब्धिरित्यर्थोऽयं भवति शक्तिः, या काले काले उपयोगस्य अर्थात् ज्ञानस्य रूपे प्रकटिता जायते। यशोविजयमतानुसारमुपयोग एव प्रमाणमस्ति। पुनरनेन प्रमाणानां द्वौ भेदौ कृतौ—१. प्रत्यक्षं तथा २. परोक्षम्।

१. प्रत्यक्षं—प्रत्यक्षशब्दस्य व्युत्पत्तिं कुर्वता यशोविजयेन (अक्ष) शब्दस्य अर्थद्वयं कृतमस्ति? १. (इन्द्रियाणि) तथा २. (जीवः) तथा एतदङ्गीकृत्य (सांव्यावहारिकस्य) तथा (पारमार्थिकस्य) **उभयो प्रत्यक्षयोः** समिश्रणं कृतं वर्तते। परन्तु प्रत्यक्षजन्यं ज्ञानं परोक्षजन्यज्ञानतुलनायां विशदं भवति।

अनुमानेन केवलम् अग्नेरस्तित्वमानम् एव जायते किन्तु प्रत्यक्षसत्त्वे रूपाऽकारादयः समक्षम् आयान्ति। अतः इदं मन्तव्यं भविष्यति यत् परोक्षतुलनायां प्रत्यक्षमधिकं स्पष्टं भवति।

अतोऽनेन प्रकारेण प्रत्यक्षपरिभाषा दीयते—यज्ज्ञानं अक्षम् आश्रित्य स्वस्पष्टस्वरूपे तिष्ठति, असौ प्रत्यक्षम् उच्यते। अनुमानादौ प्रकाशितविशेषाणाम् अपेक्षायाम् अधिकविशेषप्रकाशनम् (स्पष्टता) अस्ति।

साम्प्रतं परोक्ष-परिभाषा क्रियते, अक्षैरथवा (अक्षेषु) यज्ज्ञानमस्ति तत्परोक्षमस्ति। पुनः प्रत्यक्षं द्विप्रकारकं भवति।—

१. सांव्यवहारिकप्रत्यक्षम्—बाधारहितप्रवृत्तिनिमित्तस्तथा जनानां कथनरूपव्यवहारः सांव्यवहारः कथ्यते। एतद्व्यवहाराय यत् प्रत्यक्षं मन्तव्यं स्यात् तत् सांव्यवहारिकप्रत्यक्षमस्ति। इदं पारमार्थिकं प्रत्यक्षं वर्तते। यतोहि छद्मस्थजनानां प्रत्यक्षं, सांव्यवहारिकप्रत्यक्षं इन्द्रियमनोभ्यां व्यवहितात्म-व्यापारसहायतयोत्पन्नं भवति। अतस्तदनुमानवत् वास्तविक-रूपेण परोक्षमेवास्ति।

इन्द्रियजन्यज्ञानं मनोजन्यज्ञानञ्च वास्तविकरूपेण परोक्षमेव वर्तेते तत्रसंशय-विपर्यय-अनध्यवसायसम्भवात्। यथा-असिद्धं, विरूद्धम्, अनैकान्तिकानुमानञ्च। यथा (शब्दज्ञानं) सङ्केतबलेन जायते। अतएव तत्परोक्षं वर्तते। अनेन प्रकारेण सांव्यवहारिक प्रत्यक्षं इन्द्रियमनोभ्यां व्यवहितात्मव्यापारसहायतयोत्पन्नं भवति, अतएव तदपि परोक्षमस्ति।

सांव्यवहारिकप्रत्यक्षन्तथा मतिश्रुतिज्ञानम्

१. सांव्यवहारिकं प्रत्यक्षमपि-द्वि प्रकारकं भवति—१. इन्द्रियजन्यं तथा २. अनिन्द्रियजम्।

१. इन्द्रियजन्यम्—चक्षुरादि-इन्द्रियजन्यम् इन्द्रियजं कथ्यते। यथा अस्माभिः नेत्राभ्यां घटोऽवलोक्यते।

२. मनोजनितज्ञानमेवानिन्द्रियजमुच्यते। अत्र वार्तेयं ध्यातव्याऽस्ति। यत् इन्द्रियजनिते ज्ञानेऽपि मनोव्यापारो भवति। मनः सहाय्यैनैव इन्द्रियाणि ज्ञानप्राप्त्यर्थं समर्थानि भवन्ति। तथा मनसः साधारणकारणत्वम् एवञ्च इन्द्रियणामसाधारणकारणत्वमङ्गीक्रियते।

इन्द्रियजम् अनिन्द्रियजमुभेऽपि ज्ञाने मतिज्ञानश्रुतज्ञानभेदेन "द्वि प्रकारके भवतः"। यज्ज्ञानम् इन्द्रियमनोनिमित्तेनैव श्रुतानुसरणं विनैव करोति तद् मंतिज्ञानम् उच्यते। तथा च यज् ज्ञानम् इन्द्रियमनो-जन्यशीलत्वेन श्रुतस्य अनुसरणं पालयेत् तच्छ्रुतज्ञानं कथ्यते।

यशोविजयस्य कथनमस्ति-यस्मिन् ज्ञाने संशयविपर्ययानध्यव-सायानां सम्भावनाऽस्ति-तत् स्वतः प्रमाणं न भवति, तत् परोक्षम् उच्यते। मतिश्रुतिज्ञानमपि तथावत् ज्ञाने स्तः। एतद्विपरीतं यज्ज्ञानं केवलम् आत्मजन्यं वर्तते—तथा च यस्मिन् संशयादीनां सम्भवना न तिष्ठति तत्स्वतः प्रमाणमस्ति तदेव प्रत्यक्षप्रमाणपदवाच्यम्। अनेन प्रकारेण प्रत्यक्षपरोक्षयोः परस्परं भेदनिरूपणं आधारद्वये कृतमस्ति।

प्रथमः आधारः—ज्ञप्तिरर्थात् ज्ञानस्योत्पत्तिरित्यनेन सम्बन्धं स्थापयति। प्रत्यक्षं केवलम् आत्मनोत्पद्यते। तथा च परोक्षम् इन्द्रियमनः सहाय्येन।

द्वितीयः आधारः—प्रमितिः अर्थात् प्रामाण्यम् अस्ति। आत्मजन्यं ज्ञानं स्वतः प्रमाणं भवति। तस्मिन् अप्रामाण्यसम्भावना न तिष्ठति। एतद्विपरीतम् इन्द्रियमनोभ्यां जायमानं ज्ञानम् एतत् सम्भावनामुक्तं न भवति। तत्प्रमाण्यम् अन्यतथ्येषु, निर्भरं भवति।

२. पारमार्थिकं प्रत्यक्षम्—यज्ज्ञानं स्वौत्पत्तौ केवलम् आत्मनो व्यापारस्य अपेक्षां पालयति, अर्थात् मन इन्द्रियसहायता यत्र अपेक्षिता नास्ति, (तत्पारमार्थिकं प्रत्यक्षम्) कथ्यते। पारमार्थिकप्रत्यक्षं त्रिप्रकारकं भवति—

१. अवधिः, २. मनः पर्यायस्तथा ३. केवलम्। अनेन प्रकारेण जैनदृष्ट्या प्रत्यक्षनिरूपणस्य पश्चात् अनुमानस्य निरूपणं करिष्यते। तार्किक-दृष्ट्यनुमानावलम्बनत्वात्-जैनदर्शने (अभिनिवोद्यः) अनुमानमुच्यते, यत् परोक्षप्रमाणस्य पञ्चभेदाः यथा—१. स्मृतिः, २. संज्ञा (प्रत्यभिज्ञा), ३. चिन्ता, ४. अभिनिबोधः (अनुमानम्) तथा ५. आगमः (श्रुतम्) इत्यादिषु एको भेदोऽनुमानमस्ति। परोक्षपदे स्थितौ शब्दातिरिक्तेन्द्रियं मनः प्रकाशोप-

१. प्रत्यक्षादिनिमित्तं स्मृतिप्रत्यभिज्ञानतर्कानुमानागमभेदं माणिक्यनन्दी प० पु०

देशादि बाह्यनिमितानां ग्रहणं विवक्षितमस्ति। तात्पर्यमिदं वर्तते यत् पराधीनं ज्ञानं परोक्षं कथ्यते।[१] अर्थात् इन्द्रियप्रत्यक्षं तथा मानसप्रत्यक्षं परोक्षं प्रोच्यते। अनेन प्रकारेण परोक्षस्य क्षेत्रमत्यधिकं विस्तृतं विद्यते। यत्र मुख्यरूपेण स्मृत्याद्रिपञ्चभेदाः दिग्दर्शिताः सन्ति। पूर्वानुभूतवस्तुस्मरणं स्मृतिरुचय्ते।[१]

अनुभवजन्यं स्मरणपूर्णकजन्यं संयुक्तरूपज्ञानं प्रत्यभिज्ञा अथवा प्रत्यभिज्ञानम्।[२] अथवा संज्ञाऽस्ति। यथा अयं स एव देवदत्तः। अथवा गोसदृशः गवयो भवति, तद्भिन्नः महिषः। अन्वयव्यतिरेकपूर्वकजन्यं व्याप्तिज्ञानं "तर्कः[३]" भवति। अयमेव ऊहः अथवा चिन्ताऽपि कथ्यते। अग्निसत्वे धूमसत्त्वम्, तदसत्वे धूमाभावः। निश्चितसाध्याऽविनाभाविसाधन-जन्यं साध्यज्ञानम्। अनुमानमुच्यते। अत्र धूमेनाग्नेरनुमानम्। शब्दसङ्केतजन्यं यद्भवति तदागमः वर्तते। यथा सुमेरू आदिकोऽस्ति। शब्दं श्रुत्वा सुमेरूपर्वतादिबोधो भवति। इमानि सर्वाणि ज्ञानानि ज्ञानान्तरोपेक्षाणि[४] सन्ति। स्मरणे अनुभवः, प्रत्यभिज्ञाने अनुभवः स्मरणं प्रत्यभिज्ञानञ्चानुमाने, लिङ्गदर्शन-व्याप्तिस्मरणानि आगमे शब्दसङ्केतादयः अपेक्षिता वर्तन्ते। तद् विना एतदुत्पत्तिरसम्भवाऽस्ति। अतएव इमानि तथा च एतज्जातेरन्यसापेक्ष-ज्ञानं परोक्षप्रमाणं मतमस्ति।

अनेन प्रकारेण अनुमानं जैनदर्शने परोक्षप्रमाणभेदत्वेन स्वीकृत-मस्ति।

जैनतार्किकयशोविजयेन तर्कस्वरूपमनेन प्रकारेणो-पस्थापितमस्ति—अन्वयः (विधिः) व्यतिरेकः (निषेधः) एतत् पूर्वकं जायमानव्याप्तिसाध्यसाधनत्वेन अभिमतयोः द्वयोः पदार्थयोः अविनाभाव-संबंधस्य ज्ञानं चिन्ता अथवा तर्कोऽस्ति। अयम् ऊहः ऊहा कथ्यते।

उदाहरणम्—एतत्जाते एतद्भवति।

न जाते न भवति।

यथा—अग्निसत्त्वे धूमसत्त्वम्।

तथा बह्यभावे धूमाभावः। निश्चितसाध्यविनाभाविसाधने साध्यज्ञानं

---

१. तत्रैव ३.३४ *२. तत्रैव ३.५.६*

३. तत्रैव ३.७.८.९ *४. तत्रैव ३.१०.११*

भवति, तदेव अनुमानमुच्यते। यथा—धूमेन अग्निज्ञानम्। अनेन प्रकारेण तार्किकक्षेत्रे अनुमान–व्याप्तिज्ञान–सद्धेतूनां प्राबल्यमुपलक्ष्यते।

अनुमानम्—यशोविजयेन साधनजन्यं साध्यमेवानुमानमङ्गीकृतमस्ति।

अनुमानस्य द्वौ भेदौ स्तः—

१. स्वार्थानुमानन्तथा २. परार्थानुमानम्।

१. स्वार्थानुमानम्—अनुमाता यदा स्वयमेव निश्चितसाध्याविनाभाविसाधनेन साध्यस्य ज्ञानं कुरुते, तर्हि तन्नाम स्वार्थानुमानं भवति।

उदाहरणम्—'धूममालोक्य वह्नेर्ज्ञानम्' इदं संचोष्य तत् सहंचाररूपज्ञानम् अथवा कृतिकोदयं दृष्ट्वा एकमुहूर्त्तानन्तरं शकटोदयज्ञानं करोति। तदा तज्ज्ञानं स्वार्थानुमानमुच्यते।

२. परार्थानुमानम्—यदा तदेव स्वार्थानुमानमुक्तहेतुसाध्यानि चोक्त्वा अन्यस्मै तत्साध्यसाधनस्य व्याप्तिः। (अन्यथानुपपत्तिः) इत्यस्य ग्रहणं कारयति, तथा च अन्ये तद्वचनं श्रुत्वा व्याप्तिग्रहणं कृत्वा उक्तहेतुना उक्तसाध्यानां ज्ञानं कुर्वन्ति, तर्हि अन्येषां तद् अनुमानं परार्थानुमानमस्ति।

स्वार्थानुमानस्य त्रीणि अङ्गानि भवन्ति—१.धर्मी, 2.साध्यम् ३.साधनं (गमकं) च। तथा च साध्यं गमकं भवति, एवं धर्मी साध्याधारो भवति। कस्मिंचित् निश्चिते आधारे एव साध्यसिद्धिकरणम् अनुमानं वर्तते।

अथवा—स्वार्थानुमाने पक्षः हेतुश्च एतावेव अङ्गभूतौ स्तः।

अनेन प्रकारेण सद्धेतुविषये यशोविजयस्य मन्तव्यमस्ति यत् हेतुः द्विप्रकारको भवति—

१. तथोपपत्तिमूलकस्तथा २. अन्यथानुपपत्तिमूलकः।

१. तथोपपत्तिमूलकहेतुः—साध्यसत्वे एवाऽयं हेतुर्भवति।

२. अन्यथानुपपत्तिमूलकहेतुः—अयं हेतुः साध्यभावस्थले कदापि न प्राप्यते। एतस्योदाहरणमत्र अनेन प्रकारेणोपस्थाप्यते—

---

१. तत्रैव ३.९५.९६.९७

२. अकलङ्कलघीयस्वी. वृ. ३.२ इत्यस्य १०

३. अर्थापत्तिरनुमानात् प्रमाणान्तरं नवेति किनश्चिन्तय सर्वस्य परोक्षाऽन्तर्भावात् ल.स्वी. वृ. इत्यस्य २१

"अत्र वह्निरस्ति" धूमस्य वह्निजन्यत्वात् तथा "अयम् अग्निरस्ति" अग्न्यभावे धूमोत्पत्तिरसम्भवात्।

प्रथमम् उदाहरणम् अन्वयः अथवा विधिसाधकम् अस्ति द्वितीयञ्च व्यतिरेकमथवा प्रतिषेधसाधकमस्ति।अधुना निष्कर्षोऽयमस्ति यत् तार्किक-दृष्टिकोणत्वेन जैनतर्कभाषा अत्यन्तमेव महत्त्वपूर्णग्रन्थोऽस्ति। परन्तु यशोविजयस्य तर्कभाषायां केवलं शुष्कस्तर्क एव नास्ति, अपितु आगमिकपरम्पराणामपि समन्वयः अत्र प्राप्यते। एतत् सर्वेषु विषयेषु दृष्टिपातात् पूर्वमत्र विचारणीयः यत् कस्तर्क ?

सामान्यतया 'विचारविशेषो नाम तर्कः'। अयं चिन्ता-उहा-उहापोहादिशब्द-वाच्योऽपि भवति।विचारितोऽयं त्रिसृषु तर्कभाषासु।परन्तु वैदिकतर्कभाषायां तर्कस्य प्रामाण्यऽप्रामाण्य-विषयेऽभिमतमस्ति यत् "न तर्कः प्रमाणचतुष्टयान्तर्गतप्रमाणं वर्तते न च प्रमाणान्तरं विद्यते। तदपरिच्छेदकत्वात्, परिच्छेदस्य प्रमाणविभाजकत्वात्।"

तात्पर्या मिदमस्ति-प्रमाणज्ञातपदार्थस्तर्केणैव पुष्टो भवति। प्रमाणानि यत्र पदार्थान् जानन्ति—तत्र तर्कः तेषां पोषणं कृत्वा तत्प्रमाणतायाः स्थितिकरणे सहायको भवति।[१]

न्यायदर्शने तर्कः प्रारम्भादेव सर्वप्रमाणसहायकरूपत्वेनाऽभिमतोऽस्ति। परन्तु उदयनाचार्यवर्धमानउपाध्यायादिभिः पूर्वनैयायिकैः विशेषतः अनुमानप्रमाणमेव व्यभिचारशङ्कानिवर्तकव्याप्तिग्राहकरूपत्वेन तर्कः स्वीकृतो वर्तते। विश्वनाथपञ्चानन-भट्टाचार्येण हेतौ अप्रयोजनकत्वादिशङ्कानिवृत्यर्थ तर्कः एवापेक्षितोऽस्ति।

---

१. "तर्कः प्रमाणसहायो न प्रमाणमिति प्रत्यक्षसिद्धत्वात्" (न्यायवार्तिक-१ परिशुद्धिपृष्ठ ३२७) तथापि तर्कस्यारोपिता व्यवस्थितसत्त्वौपाधिकसत्त्व-विषयत्वेनानिश्चयकतया प्रमारूपाभावात् तथा च संशयात्प्रच्युतो निर्णयश्चाप्राप्तः तर्कः इत्याहुः अन्यत्राचार्याः। संशयो हि दोलायितानेककोटिकः तर्कस्तु नियतां कोटिमालभते। तर्कसंग्रहकारेण अन्नमभट्टेन तर्कः अयथार्थाऽनुभव एव (अप्रमाणम्) स्वीकृतो वर्तते। अतोऽनेन प्रकारेण न्यायदर्शने तर्कस्य मान्यता तु प्रायः सर्वैरपि अङ्गीकृतास्ति, परन्तु तत्प्रमाणिकता क्वचिदपि नास्ति।

अतश्च बौद्धैरपि तर्को व्याप्तिग्राहको मतोऽस्ति, परन्तु तैरपि (प्रत्यक्षपृष्ठभावी) विकल्पम् उक्त्वा अप्रमाणमस्ति स्वीकृतम् मीमांसका ऊहनाम्ना तर्कं प्रमाणत्वेन स्वीकुर्वन्ति।

परन्तु जैनतार्किकेण यशोविजयेन प्रारम्भात् एवं तर्कः प्रमाणत्वेन स्वीक्रियते। तथा चासौ सकल-देश कालव्याप्यविनाभावरूपव्याप्तिग्राहको मन्यते। तदनुसारं व्याप्तिग्रहः न तु प्रत्यक्षमाधारीकृत्य कर्त्तुं शक्यते न तु अनुमानमादायैव। (प्रत्यक्षेण) एतदर्थ भवितुं न शक्यते सम्बद्ध-वर्त्तमानर्थग्रहणत्वात्, व्याप्तिसर्वदेशकालोपसंहारपूर्वकत्वाच्च। अनुमानेनापि अतएव भवितुं नार्हति यतः प्रकृतानुमानेन व्याप्तेः ग्रहणमतत्वेऽन्योन्याश्रय-दोषत्वात्, तथाऽन्यानुमानत्वेऽवस्थादोषत्वात्।

अतो व्याप्तिग्रहणकृते तर्कः प्रमाणत्वेन मन्तुमावश्यक-स्तथानिवार्योऽस्ति। धर्मभूषणेनापि तर्कः पृथक् प्रमाणत्वेन सयुक्तिकः सिद्धः कृतोऽस्ति।

तर्कभाषात्रयमाधारीकृत्य प्रामाण्यवादस्य समीक्षाः—

प्रामाण्यवादविषये वैदिकतर्कस्य निरूपणम्—न्यायसिद्धान्तं निरूपयता वैदिकनैयायिकेन कथ्यते-ज्ञानस्य तु मानस-प्रत्यक्षेणैव ग्रहणं भवति, किन्तु प्रमाण्यस्याऽनुमानेन जायते।

---

१. अनिभमतकोटावनिष्टप्रसङ्गेनाऽनियतकोटिसंशयादि-निवृत्तिरूपोऽनुमिति-विषयाविभागास्तर्केण क्रियते। तात्पर्यपरिशिष्टं ३२५।
तर्कः शङ्काविधिर्मतः।.... यावदाशङ्कातर्कः प्रवृत्तेः तेन हि वर्तमानसोपाधिक-कौटौ। तदायत्त-व्याभचारकोटौ याऽनिष्टमुपनयतेच्छा विच्छिद्यते। विच्छिन्नविक्षेपच्छश्च प्रमाता भूयो दर्शनोपलब्धसाहचर्यलिङ्गमनाकुलोऽधितिष्ठति। (न्यायकुसुमाञ्जलिः३-७)

२. "तर्कसहकृतभूयोदर्शनजसंस्कारसचिवप्रमाणेन व्याप्तिर्गृह्येत" (न्याय कु० प्रकाशः ३-७)

३. "तत्र काव्याप्तिर्यत्तर तर्कोपयोगः। न तावत् स्वाभाविकत्वम्" (न्याय कु० प्रकाशः ३-७)

४. "न्यायसूत्रवृत्तिः" (१-१-४०)

५. तर्कसंग्रहः पृ० १५६

६. विविधश्च उह मंत्रविषयः शाबरभाष्यम् ९-१-१

यथा—"इदं जलमस्ति" एतत्प्रकारकज्ञानान्तरं जलाभिलाषिव्यक्तेः प्रवृत्तिः द्विप्रकारिका भवति। एका सफला प्रवृत्तिः विफला प्रवृत्तिं या सफला प्रवृत्तिर्भवति सा (समर्था) प्रोच्यते। तद्द्वारैव तज्ज्ञानस्य प्राणाण्यस्य—यस्य स्वरूपं यथार्थम् अस्ति तदनुमानं क्रियते। अनुमानस्य प्रयोगोऽस्ति यत्—

विवादग्रस्तं जलं ज्ञानप्रमाणं विद्यते (प्रतिज्ञा) सफलप्रवृत्ति-जनकत्वात्

यज्ज्ञानं प्रमाणं न भवति। तत्सफलप्रवृत्तेः जनकत्वं नास्ति।

यथा प्रमाणाभासः इदं केवलं व्यतिरेकि अनुमानमस्ति। वैदिक-तर्कानुसारं ज्ञानस्य प्रामाण्यं तथाऽप्रामाण्यमुभयमपि परतो ग्राह्यं भवति यया केवलया सामग्रया ज्ञानस्य ग्रहणं क्रियते, तद्भिन्नया सामग्रया ज्ञानस्य प्रामाण्यस्य तथा अप्रामाण्यस्य ग्रहणं क्रियते। संक्षेपतो न्यायसिद्धान्तानुसारं प्रामाण्यग्रहणक्रिया एततप्रकारिका वर्तते, यतोहि कस्यचित् पदार्थस्य निर्विकल्पकज्ञानपश्चात् सविकल्पकज्ञानमुत्पद्यते। इदं सविकल्पकज्ञानमेव निश्चयात्मकं ज्ञानं वर्तते।

संक्षेपेण प्रामाण्यविषये न्यायसिद्धान्तोऽयमस्ति-यत् मानसप्रत्यक्ष-द्वारा ज्ञानग्रहणं संजायते तथा तेन ज्ञानेन प्रवृत्तव्यक्तेः सफलप्रवृत्त्या अप्रामाण्यस्य अनुमानं क्रियते।

अतएव ज्ञानस्य प्रामाण्यस्याऽप्रमाणस्य च निश्चयं ज्ञानं ग्राहकसामग्रीभिन्नसामग्रया भवति।फलतः प्रामाण्यं तथा अप्रामण्यम् उभेऽपि परतो ग्राह्यो स्तः।अनेन प्रकारेण यदि केनचित् शङ्क्यते यत् कदाचित् प्रवृत्तेः पूर्वं प्रामाण्यनिश्चयो न भवति, तदा-इदं कथनीयं यत् समर्थप्रवृत्त्या ज्ञानस्य प्रामाणस्य निश्चयो भवति, इदं कथं भवितुं शक्रोति?

एतस्य समाधानमिदमस्ति यत्—अनेन केवलेन व्यतिरेक्यनुमानेन अनभ्यासदशापन्नज्ञानस्य प्रामाण्यनिश्चिते तद्दृष्टान्तेन जनस्य कृते प्रवृत्तेः पूर्वमेव जातीयत्वस्य (समर्थप्रवृत्तिजनक-जातीयत्वस्य) हेतुना अन्वय-व्यतिक्यनुमानेन अन्यस्य अर्थात् अभ्यासदशापन्न-ज्ञानस्य प्रामाण्यस्यानु-

मानं क्रियते। अनेन प्रकारेण प्रमाणं परतः एव भवति। अर्थात् ज्ञानस्य ग्राहकेण (साधनेन) (प्रमाण्यस्य) ग्रहणं कर्त्तुं शक्येत।

अर्थात् ज्ञानस्य भेदद्वयं वर्तते—१. अभ्यासदशापन्नं तथा २. अनभ्यासदशापन्नं, वस्तुतोऽभ्यासस्य अर्थः भूयोभूयो भवितुं भवति।

उदाहरणम्—यदाऽस्माभिः स्वगृहद्वारमालोक्य, तत्र बहुवारं प्रवेशः कृतोऽस्ति एतदनन्तरं यज्ज्ञानमुपजायते यत्-इदं मम गेहस्य द्वारमस्ति। एतदेव अभ्यासदशापन्नं ज्ञानमुच्यते। अतोऽत्र प्रवृत्तेः पूर्वमेव प्रामाण्यस्य निश्चयत्वमुपपद्यते। अतोऽस्माभिरियं प्रतीक्षा न क्रियते यत् द्वारप्रवेशः कुतो भविष्यति, तदैवास्माकं द्वारविषयकं ज्ञानं प्रामाणिकं भविष्यति।

बौद्धदृष्टिकोणेन ज्ञानस्य प्रामाण्यनिश्चयः—अनेन अभ्यास-दशापन्नं ज्ञानमेव स्वतोग्राह्यम् उक्तमस्ति। तंदविसंवादक-ज्ञानस्य प्रमाणस्वीकारः कृतोऽस्ति। तथा संवादकेन ज्ञानेन तन्निरूपितमस्ति। यत् स्वयमेव प्रदर्शितार्थं प्राप्तं कारयते। अर्थात् तस्मिन् पुरुषः प्रवृत्तः कार्य्यते।

जैनदृष्टिकोणेन ज्ञानप्रामाण्यनिरूपणम्—

जैनदृष्टिकोणेनापि अभ्यासदशापन्नज्ञानमेव प्रमाणत्वेन अङ्गीकृत-मस्ति। अर्थात् स्वस्य अज्ञातविषयस्य च निश्चयात्मकं ज्ञानमेव प्रमाणं वर्तते। अर्थात् अनेन तज्ज्ञानमेव प्रमाणं मतं विद्यते यत् स्वयं प्रकाशकं स्यात्।

तर्कभाषात्रयमालम्ब्य अनुमान-स्वरूपम्—

वैदिकतर्कानुसारम् अनुमानस्वरूपम्-पश्चाज्जन्यं ज्ञानम् अनुमानमिति स्वीकृतमस्ति तथा चैतस्य द्वौ भेदावङ्गीकृतौ स्तः। १. स्वार्थानुमानम् २. परार्थानुमानम्। पुनः १. स्वार्थानुमानस्य लक्षणमपि ज्ञापितं यत् स्वज्ञाननिमित्तं स्वार्थानुमानम् अस्ति यदा कश्चन स्वयमेव महानसादौ प्रत्यक्षेण धूमस्य अग्नेश्च व्याप्तिनिश्चयं कुरुते पुनः पर्वतसमीपमुपगम्य, तत्

१. तत्त्वसंग्रह-कारिका (३.१.२.३)

पूर्ववत्—स्थितग्नेः संदेहं करोति। अनन्तरं धूमदर्शनेन संस्कारे उद्बुद्धो भवति, ततोऽसौ निश्चयं कुरुते यत् अत्र अग्निरस्ति धूमदर्शनादिति।

२. परार्थानुमानम्—यत्र अन्यं बोधयितुं पञ्चावयववाक्यप्रयोगेण अनुमानवाक्यस्य प्रयोगः क्रियते तदेव परार्थानुमानमुच्यते।

बौद्धदृष्टिकोणेन अनुमानस्वरूपम्—

अनुमानस्य विकासः निबद्धरूपेण अक्षपादस्य न्यायसूत्रात् प्रारम्भो भवति—एतद्विकासे प्रशस्तपाद-माठर-कुमारिलभट्टसदृशानां वैदिक-दार्शनिकानाम् अतिरिक्तं बसुबन्धु-दिङ्नाग-धर्मकीर्ति-धर्मोत्तर-मोक्षा-करगुप्तादिबौद्धनैयायिकैस्तथा समन्तभद्रसिद्धसेन-विद्यानन्द-देवसूरी-हेमचन्द्र-यशोविजयादिभिः प्रमुखैस्तार्किकैः प्रमुखं योगदानं कृतमस्ति।

बौद्धतार्किकैस्तु भारतीयतर्कशास्त्रम् एतावत् प्रभावितं कृतं यत् अनुमाने तद्द्वारा संख्याबद्धाः ग्रन्थाः लिखिताः। सम्यक् ज्ञानोत्पन्नकर्तृत्वेन अपरं ज्ञानम् अनुमानमस्ति। अनुमानस्योपलब्धिः व्याप्तौ आश्रिता भवति। व्याप्तिरियं द्विप्रकारिका भवति—

१. कार्यकारणरूपा २. तादात्म्यरूपा च।

एतत् प्रायशः सर्वेषु बौद्धनिकायेषु स्वीकृतमस्ति। मोक्षाकरेणाऽपि अनुमानस्य स्वार्थपरार्थरूपत्वेन द्वौ भेदावङ्गीकृतौ वर्तेते।

अर्थात् यदा अनुमानान्तर्गत—(लिङ्गस्य) हेतोः सर्वरूपाणां ध्यानं स्थाप्यते तदा स्वतोऽनुमानं क्रियते-तदेदं स्वार्थानुमानं कथ्यते। परन्तु यदा स्वानुभूतमनुमानं वाक्यैः कस्मैश्चित् अन्यव्यक्तिकृते अनुमेयपदार्थस्य बोधं कारयितुं प्रयत्नः क्रियते तदाऽसौ परार्थानुमानपदवाच्यो भवति। त्रिरूपलिङ्गमेव सद्हेतुरुच्यते। इमानि त्रिरूपलिङ्गानि सन्ति १. पक्षः, २. सपक्षः, ३. विपक्षश्चेति। एतदाधारीकृत्यैव स्वार्थानुमानपरार्थानुमानयो विवेचनं कृतमस्ति।

जैनदृष्ट्या अनुमानस्वरूपम्—जैनसिद्धान्ते अनुमानं तदुच्यते-यत्र साध्यज्ञानं केनचिद्धेतुना स्यात्। यथा धूमहेतुना साध्यस्य अग्नेः ज्ञानम्। न्यायदर्शनवत् जैनन्यायेनाऽपि अनुमानस्य द्वौ भेदौ स्वीकृतौ स्तः।

१. स्वार्थानुमानम्, २. परार्थानुमानञ्च।

स्वार्थानुमानपरार्थानुमानयोरन्तरमिदमेव केवलं वर्तते यत्—स्वार्थानुमाने केवलां व्याप्तिम् आश्रित्य मनुष्यः अन्तःकरणे एव हेतुना साध्यनिश्चयं कुरुते। तथा च परार्थानुमाने अन्यस्मै। एतदनुमानान्तर्गत-जायमान-तर्कस्य विभिन्नस्थितीनां या अवयवपदवाच्याः भवन्ति तासां दिग्दर्शनं कार्य्यते।

तर्कभाषात्रयदृष्ट्या अवयवमान्यता—तार्किकक्षेत्रे सर्वप्रथमं गौतमेन परार्थानुमानप्रतिज्ञा-हेत्वादि-अवयवानां स्वीकारः कृतः। तस्य टीकाकारेण वात्स्यायनेन दशावयवमान्यताऽङ्गीकृताऽस्ति।

उद्योतकरस्य न्यायवार्तिके तिसृणाम् अवयवानां मान्यता स्वीकृता वर्तते। मान्यतेयं बौद्धविदुषो दिङ्नागस्याऽस्ति। यतोहि वात्स्यायनस्य पश्चात् उद्योतकारात् पूर्वं दिङ्नागेनैव अधिकाधिकाः त्रय एवाऽवयवाः स्वीकृताः वर्तन्ते।

वास्पतिमिश्रेण द्वावेव अवयवौ स्वीकृतौ वर्तेते। हेतुर्दृष्टान्तश्च बौद्धतार्किकेण धर्मकीर्तिनाऽपि द्वावेव अवयवौ मतौ स्तः।

यद्यपि जैनतार्किकेण यशोविजयेनापि द्वावेव अवयवौ स्वीकृतौ स्तः। परन्तु प्रतिज्ञासमर्थनं तथा दृष्टान्तस्य निराकरणं कृतमस्ति। अतोऽनेन

---

१. प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः

न्यायसूत्रम् (१.१.३२)

२. दश वा नित्येके नैयायकिवाक्ये संचक्षते-जिज्ञासा संशयः शक्यप्राप्तिः प्रयोजनसंशय व्युदास इति

३. अपरे त्र्यवयमिति........त्र्यवयमपि वाक्यं यथा न भवति तथोपनयननिगमयोरर्थानन्तरभावं वर्णयन्तोऽक्ष्यामः।

४. पक्षहेतुदृष्टान्तवचनैर्हि- (न्याय.वा. १.७.१०८) प्राश्निका-नामप्रतीतोऽर्थः प्रतिपाद्यते इति एतान्येव त्रयोऽवयवा इत्युच्यन्ते। (न्या.प.पृ. १)

५. "पक्षहेतुदृष्टान्ता इति त्र्यवयवम्"

६. शास्त्रे कार्यादि ग्रहणं निदर्शनार्थं कृतं नावधारणार्थम्। कस्मात् व्यतिरेकदर्शनात्। तद्यथा अध्वर्यु श्रावयन-व्यवहितस्य हेतुलिङ्गचन्द्रोदयः समुद्रवृद्धेः कुमुदविकाशस्य च शरादिजलप्रसादोऽस्त्येदस्तेति। एवमादि तत्सर्वस्येदमिति सम्बन्धमात्रवचनात् सिद्धम्। (प्रा.पा.भा.पृ. ४)

प्रकारेण दृश्यते यत् दशावयवनां पञ्चावयवानाञ्च मान्यता नैयायिकानामस्ति। द्वयोरेकस्य मान्यता जैनस्य वर्तते।

उदाहरणार्थम्—चन्द्रोदयेन व्यवहितसमुद्रवृद्धेः एवं कुमुद-विकासस्य शरत्कालीनं जलं यदा प्रसादेन अगस्त्योदयस्य ज्ञानं भवति, परन्तु नेमे हेतवः सन्ति न च प्रोक्तकार्यादिहेतुषु कस्मिंश्चित्. अन्तर्भूताः वर्तन्ते।

तात्पर्यमिदं विद्यते यत् प्रशस्तपादानुसारं वैशेषिकदर्दने पञ्चाधिका हेतवोऽङ्गीकृताः सन्ति। परन्तु अन्यहेतूनां चर्चा नैवौपस्थपिता अस्ति।

(न्याय-परम्पराया अधिष्ठात्रा)—अक्षपादेन हेतोः कणादप्रोक्तभेदा नैव स्वीकृताः सन्ति, तेन हेतोस्त्रयो भेदा अङ्गीकृता वर्तन्ते। १. पूर्ववत्, २. शेषवत्, ३. सामान्यतोदृष्टञ्च। एतेषु पूर्ववत् शेषवच्च कणादस्य कार्य-कारणरूपमेवास्ति केवलम् एतेषु नामभेदावलोक्यते। न चार्थभेदोऽस्ति। तथा यत् सामान्यतोदृष्टमस्ति तत् क्वचित् अकार्यकारणरूपमस्ति, क्वचित् संगोष्ठी, क्वचित् समवायि तथा च क्वचित् विरोधिरूपेण गृहीतमस्ति।

वात्स्यायनेन[1] न्यायसूत्रकारस्य साधर्म्यवैधर्म्यप्रयुक्तद्विविध-हेतुप्रयोगस्य अपेक्षया हेतोः द्वौ भेदौ उल्लिखितौ स्तः-१ः साधर्म्यहेतुः वैधर्म्यहेतुश्च। यथार्थत्वे नैतौ हेतुभेदौ स्तः मात्रत्वेन हेतुप्रयोगद्वैविध्यमस्ति। उद्योतकारेण अवश्यमेव भेदत्रयमुखितमस्ति। यन्नवीनं वर्तते। १. केवलान्यवयी, २. केवलव्यतिरेकी तथा ३. अन्वयव्यतिरेकी। उद्योतकारेण[2] वीताऽवीतभेदत्वेनाऽपि द्वौ भेदावङ्गीकृतौ स्तः।

अनेन प्रकारेण धमकीर्तिनाऽपि[3] हेतोः त्रयो भेदा स्वीकृता वर्तन्ते—१. स्वभावः, २. कार्यः, ३. अनुपलब्धिः।

अनुपलब्धेरपि तेन त्रयो भेदा अभिमताः सन्ति।

१. कारणानुपलब्धिः, २. व्यापकानुपलब्धिस्तथा, ३. स्व-भावानुपलब्धिः।

धर्मकीर्तिना कणादस्वीकृतहेतुभेदेन कार्यं विरोधी चानुपलब्धिः

---

१. द्विविधस्य पुनहेतोर्द्विविधस्योदाहरणस्योपसंहारद्वे ते च। समानं

२. "तावेतौ वीताऽवीतहेतू लक्षणाभ्यां पृथगभिहिताविति"।

३. एतल्लक्षणो हेतुस्त्रिप्रकार एव। स्वभावकार्यमनुपलब्धिश्चेति हेतु बिन्दुः पृ. ५४।

अङ्गीकृते स्तः। कारणसंयोगसमवायिनः इमे त्रयो बौद्ध-दर्शने स्वीकृता न सन्ति। अतस्तेनैतस्यं परित्यागः कृतः।

कारणस्य सम्बन्धे धर्मकीतेर्मतमिदं वर्तते यत् कारणं कार्यस्य अवश्यम् अनुमापकं न भवति-यतोहि नेदमावश्यकं यत् कारणसत्त्वे कार्यसत्त्वम्, परं कार्यं विना कारणात् न भवति। अतः कार्यन्तु हेतुरस्ति-परन्तु कारणं नास्ति तदुपलब्धिभेदत्रयस्य संख्या कणादाभ्युपगतविरोधिनः त्रयाणां प्रकारकाणां संख्यास्मरणं कारयति।

धर्मकीर्तिमहाभागेन विधिसाधकत्वेन स्वभावस्तथा कार्यम् एवञ्च प्रतिषेधसाधकत्वेन उपलब्धिर्मताऽस्ति। यस्य समर्थनम् अर्चरेण तथा धर्मोत्तरादिभिः कृतमस्ति।

एतादृश्यमेव विद्यानन्द-यशोविजयादिजैनतार्किकैरपि हेतुविषये स्वकीयं मन्तव्यं प्रस्तुतमस्ति।

एकलक्षणस्य मान्यताऽसन्दिग्धरूपकत्वेन जैन-विद्वद्भिरङ्गीकृतं वर्तते। यदनेन अभिनाभाव-अन्यथानुपपत्ति-रूपत्वे अकलङ्कदेवस्य कालादेव आगच्छन्तीनां मान्यतानां रूपे स्वीकृतं वर्तते। विद्यानन्देन[2] तु स्पष्टतो हेतोरेव लक्षणस्यैव प्रतिपादकं कथितमस्ति।

वस्तुतः अविनाभाव एव हेतुर्गमकतायां प्रयोजको विद्यते। त्रैरूपं पञ्चरूपञ्च तस्यैव विस्तारोऽपि। एतावदेव न उभावपि अव्यापकौ स्तः।

एतत्सम्बन्धे आचार्यधर्मभूषणेन निम्नलिखित-कारिकाद्वयेन[3] अन्यथानुपपन्नत्वमनेन प्रकारेण सिद्धं कृतमस्ति। जैनतार्किकग्रन्थेषु हेतूनां भेदविषये सर्वप्रथम् अकलङ्कदेवस्य प्रमाणसंग्रहे प्रमाणमुपलभ्यते। तेन सद्भावसाधकोपलब्धेः तथा सद्भावतिषेधकोपलब्धेरेन प्रकारेण नवानामुप-

१. संयमनुपलब्धिस्त्रिधा सिद्धिकार्यकारणभावे। सिद्धाभावस्यानुपलब्धिः, व्याप्यव्यापकभावसिद्धो सिद्धाभावस्य व्यापकस्यानुपलब्धिः, स्वभावानुपलब्धिश्च (हे.वि.पृ. ६८)

२. भगवन्तो हि हेतुत्वक्षणमेव प्रकाश्यन्ति स्याद्वादस्य प्रकाशितत्वात्। (अष्ट-साहस्त्री पृ० २८१)

३. अन्यथानुपन्नत्वं यत्र यत्र त्रयेण किम्।
नान्यथानुपनपन्नत्वं यत्र किं तत्र पञ्चभिः॥

लब्धीनाम् असद्भावोपलब्धीनां वर्णनं कृत्वा एतेषामवान्तरभेदसंङ्केतं विधाय तेषां तेष्वेव अन्तर्भावत्वेन निर्देशः कृतोऽस्ति। सहैव अनेन धर्मकीर्ति-महोदयस्य एतस्य कथनस्य स्वभावः कार्यहेतुभावः साधकस्यैव स्तः। तथा अनुपलब्धिरेव अभावसाधको वर्तते इति। निराशं कृत्वा उपलब्धिरूप-स्वभावः तथा हेतुरपि अभावसाधकत्वेन सिद्धः कृतोऽस्ति।

अकलङ्कदेवस्य मन्तव्यमिदं माणिक्यनन्दि[1]-विद्यानन्द[2]-वादिदेव-सूरिभिः[3] उपलब्धिरूपेण अनुपलंब्धिरूपत्वेन च समस्तहेतूनां संग्रहं विधाय उभावपि विधिसाधकत्वेन निषेधसाधकत्वेन च ज्ञापितौ वर्तेते। अनेन प्रकारेणाऽलोकितं यत् जैनतर्के मुख्यरूपत्वेन अन्यथानुपपन्नहेतुरेव स्वीकृतो वर्तते।

व्याप्तिविषये तिसृणां तर्कभाषाणां स्वरूपम्—अनुमानस्य मूलाधार एव व्याप्तिरुच्यते—यंस्याः शब्दार्थो भवति (विशेषव्याप्ति) अथवा विशेष सम्बन्धः।

अर्थात् व्याप्तिः तद्विशेषसम्बन्ध उच्यते यत् न व्यभिचरितो भवति, न च विच्छिनः स्यात्। तर्कशास्त्रे असौ विशेषसम्बन्धः तस्य पदार्थद्वयस्य नियतसाहचर्यसम्बन्धो भवति, यस्मिन् गम्यगमकभावः अथवा साध्य-साधने विविक्षिते वर्तेते। लिङ्गलिङ्गिमध्ये साध्यसाधनयोश्च गम्य-गमकभावस्य तथा साधन-साध्य-भावस्य प्रयोजको वर्तते। यः सम्बन्धोऽस्ति-स एव विशेषसम्बन्धः कथ्यते।

अयं साहचर्यसम्बन्धः अनियतनियतभेदद्वयेन स्वीकृतोऽस्ति।

अनियतस्य—अर्थो व्यभिचरित्वमस्ति तथा

नियतस्य—अर्थोऽव्यभिचरितं वर्तते।

वैदिकतर्कभाषायां व्याप्तेः स्वरूपम्—केशवमिश्रेण नियतसाह-चर्यसम्बन्ध एव व्याप्तिः स्वीकृताऽस्ति।

अर्थात् यत्र साध्यं हेतुश्च एकस्मिन्नेव अधिकरणे साहचर्यसम्बन्धत्वेन

---

१. *सत्प्रवृत्तिनिमितानि स्वंसम्बन्धोपलब्धयः।*
तथाऽसद्व्यवहाराय स्वभावानुपलब्ध्यः॥
सद्वृत्तिप्रतिषेधात् तद्विरूद्धोपलब्धयः।

२. *परीक्षमुखं ३.५७ तः ३.९३ यावत् सूत्राणि।*

३. *प्रमाणपरीक्षा, पृ० ४९.५७*

प्राप्तौ स्यातां तर्हि तत्र व्याप्तिः स्वीक्रियते। यथा-धूमस्य अग्नेश्च साहचर्य-सम्बन्धो महानसादौयत्र वह्निसम्भवत्वं तत्र धूमसम्भवम्। अयमेव साहचर्यसम्बन्धो वैदिकन्याये व्याप्तिरित्यङ्गीकृतोऽस्ति।

बौद्धतर्कभाषायाम्—"अविनाभावव्याप्तिः स्वीकृता वर्तते। एतत्कृते तैः तदुत्पत्तिस्तादात्म्यसम्बन्धश्च मन्येते।"

अविनाभावः—यत्र साध्यस्य साध्ये नियतत्वस्य व्यवस्थापनं तथा साध्याभावे साधनाभावस्य नियतताप्रदर्शनं करणीयं स्यात् तदेव अविनाभाव उच्यते।

हेतोः साधर्म्य-प्रयोगे-साध्याभावो व्याप्यस्तथा साधनाऽभावो व्यापको भवति।

यथा यत्र धूमो भवति। तत्र वह्निर्भवति।

एवं यत्र-अग्न्यभावस्तिष्ठति तत्र धूमाभावोऽपि भवति।

अनेन प्रकारेण एकस्य साधर्म्यप्रयोगेण अर्थापत्या अन्यस्य वैधर्म्यस्यापि सिद्धिर्भवति।

अविनाभावः—अयं तद्वस्तुद्वयस्य सम्बन्धोऽस्ति नियतः यत्र एकं वस्तु अन्यवस्तु विना कदापि नोपलभ्यते।

यथा—स्वभावहेतुः—शिंशपात्वसाध्यवृक्षत्वं तथा कार्यम्।

"धूमवत्वसाध्यं" वह्नित्वं विना कदापि न उपलब्ध्ं-भवति। यतोहि-हेतुः शिंशपात्वधूमत्वस्य साध्यवृक्षत्वेन किञ्चिदपि पृथक् अस्तित्वं नास्ति।

अनेन प्रकारेण जैनतर्कभाषायामपि अविनाभावसम्बबन्ध एव व्याप्तिरित्यनेन स्वीकृतमस्ति।

समीक्षा—अनेन प्रकारेण वैदिकतर्कभाषा-बौद्धतर्कभाषा-जैनतर्कभाषाणां तार्किकदृष्ट्य समीक्षायां कृतायां सत्यां निष्कर्षोऽयं प्राप्यते यत् वैदिकतर्क-भाषा एव सर्वास्वपि तर्कभाषासु सक्षमा तथा प्रेरणादायिनी वर्तते, यतोहि पारम्परिकदृष्टिकोणेन अन्वेषिते सति वैदिकतर्कभाषायाः मूले एव तर्कशास्त्रस्य बीजं दृष्टिगोचरीभवति। तर्कस्याधारःअनुमान-व्याप्तिज्ञान-हेतु-अवयव-पक्षधर्मतेत्यादयः सर्वेऽपि वैदिकतर्कभाषायामुप-

---

१. प्रमाणनयतत्त्वालोकस्य तृतीयपरिच्छेदः।

२. व्याप्तिबलेनार्थगमकं लिङ्गम्। यथा धूमोऽग्नेर्लिङ्गं तथाहि-यत्र धूमस्तत्र वह्निः इति साहचर्यनियमो व्याप्तिः।

लभ्यन्ते। यतोहि यदाऽहम् एतस्याः ऐतिहासिकतायां दृष्टिपातं कृतवती तर्हि उपनिषत् काले एव एतस्य प्रमाणं प्राप्तवती। यत्र इदमुक्तमस्ति यत् "आत्मा वाऽरे द्रष्टव्य।[1] आदिवाक्यैः आत्मनः श्रवणेन सह मननेऽपि बलं प्रदत्तमस्ति। यत् युक्तिभिः क्रियते स्म।[2]"

अत इदं स्पष्टं भवति यत् तस्मिन् काले अनुमानमपि श्रुतिवत् ज्ञानसाधनत्वेन मन्यते स्म परन्तु तत्काले एतस्य नाम "वाकोवाक्यम्" आसीत्। तस्मिन्नेव काले आन्वीक्षिकी-हेतुविद्या-तर्कविद्यादिनामभिरुच्यते स्म। अनुमानस्य कृते येषां घटकानामावश्यकता वर्तते, तस्य प्रारम्भिकं प्रतिपादनं कणादेन कृतमस्ति। परन्तु तदनुमानशब्दवाच्यं न भूत्वा लिङ्गनाम्ना प्रदर्शितमस्ति शब्देन अभिहितं न कृत्वा। येन ज्ञायते यत् अनुमानस्य मुख्यघटकं लिङ्गमस्ति-तद्भाष्यकारप्रशस्तपादेन अवश्यं प्रतिज्ञादि-अवयवानां तद्-घटकत्वेन प्रतिपादनं विहितं विद्यते। एवञ्च तेनैव अनु-मानस्य द्वैविध्यम् अङ्गीकृतमस्ति। यथा १. स्वार्थानुमानं २. परार्थानुमानञ्च।

१. स्वार्थानुमान्—अत्र लिङ्गस्य (हेतोः) ज्ञानमेव अनुमान प्रमाणं वर्तते। एवं तज्जन्यवह्निज्ञानमेव फलमस्ति अर्थात् फलरूपा प्रमितिः वर्तते। तथा च कथिताग्रेः ज्ञानमेव अनुमानप्रमाणं विद्यते। अग्नौ उपादेयत्वस्य हेयत्वस्य अपेक्षायाः बुद्धिरेव प्रमितिरस्ति (अनुमितिः) वर्तते। तदुत्पादक-मेव स्वार्थानुमानं प्रोच्यते।

२. परार्थानुमानम्—स्वनिश्चितार्थं बोधयितुम् अन्यस्मै येषां (पञ्चावयानां) प्रयोगो विधीयते, तदेव परार्थानुमानं स्वीकृतमस्ति।

अनुमानस्य एतत्स्वरूपमेव महर्षिरक्षदस्तथा तदुत्तरवर्तितार्किकाः एतदेव परिवर्धितं सम्वर्धितं च कृतवन्तः सन्ति।

अक्षपादेन यत् अनुमानस्य त्रयो भेदाः अङ्गीकृताः वर्तन्ते १. पूर्ववत्, २. शेषवत् सामान्यतोदृष्टञ्च, एतदेव जैनपरम्परायाः अनुप्रयोगद्वारसूत्रे १. पूर्ववत् पूर्वपदेन, २. शेषवद् सेसवंपदेन ३. सामान्यतोदृष्टं (दिट्ठ-साहम्भववाच्यत्वेन) प्रदर्शितमस्ति।

---

१. "वृहदारण्यक० २.४.५।"

२. श्रोतव्यः श्रुतिवाक्येभ्यो मन्तयश्चोपपत्तिभिः मत्वा च सततं ध्येया एते दर्शनहेतवः।

३. प्रशस्तपादभाष्यम् पृ० (५१०) *४. प्रशस्तपादभाष्यम् पृ० (५५८)*

प्रत्यभिज्ञा—माधारीकृत्य यदनुमानम् उपदर्श्यते-तदेव (पूब्बव-पदेन) कथ्यते। प्रोक्तमस्ति वा।

सेसवम्—सहसम्बन्धियुगलपदार्थेष्वेकं दृष्ट्वा अन्यस्य अनुमानं सेसवमस्ति। इदं पञ्चप्रकारकं भवति।

१. कार्यत्वेन-उदाहरणम्—अश्वशब्दोच्चारणत्वेन अश्वस्य।

२. कारणत्वेन-उदाहरणम्—घटत्वकारणं मृत्तिका भवति।

३. गुणेन गुणित्वस्य-उदाहरणम्-दन्तेन हस्तिनः, शृङ्गेण महिषस्य।

४. आश्रयित्वेन आश्रयस्य—उदाहरणं-धूमेन वह्नेः, बलाकया जलस्य।

३. दिट्ठ-साहम्भवः—अयमपि द्विप्रकारको वर्तते—१. सामान्यतोदृष्टं, २. विशेषतो दृष्टश्च।

एतस्यैव सम्मिलितं स्वरूपं बौद्धतर्के व्याप्तिस्वरूपे स्पष्टता दृष्टिगोचरीभवति यस्मिन् अविनाभावसम्बन्धम् एव व्याप्तिं स्वीकारतया तदुत्पत्तिद्वारा तादात्म्यभेदेन दर्शितमस्ति।

अनुमानस्य परिभाषा बौद्धजैनतर्कयोः या प्रदत्ताऽस्ति, सापि केनचिद्रूपेण वैदिकतर्कस्यैव परिभाषा वर्तते। यतोहि येन प्रकारेण वैदिकतर्के इदं स्वीकृतमस्ति यत् पश्चाज्जन्यं ज्ञानम् अनुमानं वर्तते। अनेन प्रकारेण बौद्धतर्कभाषायाम् इदं स्वीकृतमस्ति यत् सम्यक्ज्ञानम्—उत्पादकत्वस्य अपरं नाम अनुमानप्रमाणं वर्तते।

इदमेव जैनतर्कभाषायामनेन प्रकारेण प्रोक्तमस्ति—अनुमानं ज्ञानस्य सा प्रकिया कथ्यते—यत्र साध्यज्ञानं केनचित् हेतुना भवति।

एतत् व्यवस्थितरूपेण तदैव ज्ञातं भविष्यति, यदा हेतुसाध्ययोः सहचारत्वेन अस्माभिः परिचितैर्भाव्यम्।

यथा—धूमेन अग्नेः अनुमानं तदैव कर्तुं शक्यते, यदाऽस्माभिः धूमस्य अग्नेश्च सहचारदर्शनत्वेन व्याप्तिर्निमीयते। एतदवलोक्य इदं प्रतिभाति यत् वैदिकतर्कभाषायाः एव चिह्नं बौद्धतर्कभाषायां जैनतर्कभाषायां केनचिदपि प्रकारेण रूपेण पतितमस्ति।

येन प्रकारेण अनुमानस्य विषये बौद्धतर्कः जैनतर्कश्च वैदिकतर्कभाषायाः ऋणिनौ वर्तेते, तथैव एतद्भेदसम्बन्धेऽपि यत् १. स्वार्थानुमानं २. परार्थानुमानञ्च स्तः। एतदपि वैदिकतर्कत एवं बौद्धजैनतार्किकैरधिकृतमस्ति।

व्याप्तिविषयेऽपि इयमेव मान्यता वर्तते।

वैदिकतर्कः—नियतसाहचर्यसम्बन्ध एव व्याप्तिः स्वीक्रयते।

बौद्धतर्कः—अविनाभावसम्बन्धेन व्याप्तिः स्वीक्रियतेऽनेन।

जैनतर्कः—अयमपि अविनाभाव एव व्याप्तिं मनुते।

अनेन प्रकारेण हेतुप्रतिपादनमपि-हेतुप्रतिपादनस्य मान्यताऽपि अक्षपादात एव प्रारभ्यते-तस्य लक्षणमिदं साधर्म्यवैधर्म्ययोरवलम्बितस्ति। भेदः केवलं एतावान् एव विद्यते-नैयायिकैः हेतुः पञ्चलक्षणानि यावत् स्वीकृतं वर्तते। तथा च बौद्धजैनाभ्यां त्रिलक्षणहेतुरथवा एकलक्षणहेतुः स्वीकृतोऽस्ति।

जैनतार्किकैः अविनाभाव एव हेतोः प्रधानं तथा एकलक्षणमङ्गीकृतं वर्तते। तथा पञ्चरूपं यावत् हेतुलक्षणम् (अव्याप्तम्) (अतिव्याप्तञ्च) प्रोक्तमस्ति।

अनेन प्रकारेणावलोक्यते यत्-तर्कशास्त्रस्य निवद्धरूपे स्पष्टो विकासो महर्षिणोऽक्षपादस्य न्यायसूत्रेषु उपलब्धो भवति। अक्षपादेन अनुमानम्। (अनुमान) शब्देनैवोल्लिखितं विद्यते, तथा तत्कारणसामग्री-भेदानाम् अवयवानां तथा हेत्वाभासानां स्पष्टविवेचनं कृतमस्ति। सहैव अनुमानवाद-जल्प-वितण्डा-छल-जाति-निग्रह-स्थान-सदृशानुमान-सहायक तत्त्वनां प्रतिपादनं विधाय शास्त्रार्थोपयोगी निर्मित्तः।

वात्स्यायन उदयन-वाचस्पति-उद्योतकरगङ्गेशादिवैदिकविद्वद्भिरिदं विशेषत्वेन परिष्कृतं वर्तते तथा व्याप्ति-पक्षधर्मता-परामर्श-सदृश-तदुपयोऽयभिनयतत्त्वानां विविक्तं विधाय तद्विस्तृतं तथा सूक्ष्मं विवेचनं निरूपणं वा कृतम्।

एतस्यैव प्रभावः. अस्माकम् उत्तरवर्तिनैयायिकानां तथा वौद्धतर्कवादिदिङ्नात आरभ्य मोक्षाकरगुप्तस्य तर्कभाषां यावत् एवञ्च जैन-नैयायिकानाम् अकलङ्कदेवसमन्तभद्र-विद्यानन्द-देवसूरिभ्य आरभ्यः यशोविजयस्य तर्कभाषायामापतत्।

अनेन प्रकारेणाऽवलोकितं यत् तार्किक-क्षेत्रस्य दृष्ट्या वैदिक-तर्कभाषा एव जैनतर्कभाषायां तथा बौद्धतर्कभाषायां सर्वोत्तमाऽस्ति। सहजतादृष्ट्याऽपि बौद्धजैनतर्कभाषाद्वयं वैदिकतर्कभाषायाः ऋणि वर्तते।

षष्ठोऽध्यायः

तर्कभाषाध्ययने समधिगतवैशिष्ट्यस्य समीक्षणम्

वैदिकतर्कभाषायाः, बौद्धतर्कभाषायाः, जैनतर्कभाषाया आधारे प्राप्तविशिष्टतायाः समीक्षा, या तिसृणां तर्कभाषाणामाधारे निम्नरूपेण प्रतिफलिताऽभवत्।

१. बाह्यार्थसत्ताविषये केशवमिश्रकृतवैदिकतर्कभाषायां स्थूलवादि-दृष्टिकोणस्य प्रधानता—

बाह्यार्थसत्तायाः निरूपणं केशवमिश्रेण स्थूलदृष्ट्या क्रियते, यतोहि वस्तुवादिन इमे सन्ति। अधुना प्रश्नोऽयं समुदेति यद् बाह्यार्थतत्त्वं किमस्ति? यत्र सतः सद्भावो भवति, तथा असतोऽसद्भाव उपलभ्यते, तदेवार्थ-तत्त्वपदवाच्यं मन्यते। केशवमिश्रेण ज्ञानमर्थात् बुद्धिः विषयस्य अभिव्यक्तिप्रतिपादिकाभिमताऽस्ति। स्वीकृतमनेन यत् प्रत्येकं व्यवहारस्तदैव सम्भवो जायते, यदा मनुष्यस्य तद्विषयकं ज्ञानं समुत्पद्यते। ज्ञानमात्मन आगन्तुकधर्मस्य हेतुत्वात् ज्ञानोत्पत्ति-सामग्री भिन्ना-भिन्ना प्रत्येकं प्रमाणेषु भवति। परन्तु साधारणतया ज्ञानोत्पत्तौ चक्षुः-श्रोत्र-घ्राण-रसनात्वगादिपञ्चज्ञानेन्द्रियाणि मनश्च विषयापेक्षायामभिमतानि वर्तन्ते।

ज्ञानमिदं द्विप्रकारकं स्वीकृतमस्ति (१) स्मृतिस्तथा (२) अनुभवश्चेति। अनुभवोऽपि द्विप्रकारको यथार्थायथार्थभेदत्वात्।

(१) स्मृतेर्लक्षणम्—

ज्ञातमात्रविषयकं ज्ञानं स्मृतिः। चक्षुः रसनादिभ्यो बहिरिन्द्रियेभ्योऽजन्यं, संस्कारमात्रजन्यं ज्ञानं स्मृतिरुच्यते। प्रत्येकम् अनुभवविनष्टे तज्ज्ञानस्य संस्कारो मनुष्यस्यात्मनि अङ्कितो जायते। यत् कालान्तरे सादृश्यज्ञानात् पुनरुद्बुद्धं भवति तथा मनुष्यस्य कृते पूर्ववस्तुनो

ज्ञानं समुपस्थापयति। संस्कारैरुत्पन्नमिदं ज्ञानं स्मरणज्ञानमथवा स्मृतिपदवाच्यं प्रोच्यते। यद्यपि नाङ्गीकृता तर्कभाषायां यथार्थ-ज्ञानान्तर्गतत्वेन स्मृतिः।

(२) अनुभवलक्षणम्—

अनेन प्रकारेण स्मृतेर्भिन्नं ज्ञानं यत् तदनुभवाख्यं भवति।

अयमनुभवो यथार्थायथार्थप्रकारकत्वेन द्विभेदात्मको वर्तते। यतोहि बाह्यार्थसत्तासिद्ध्यर्थमस्माभि प्रत्यक्षानुमानादीनां साहाय्यं गृह्यते। एभिर्यज्ज्ञानं जायते तद् यथार्थपदेनोच्यते। तथा संशयविपर्ययतर्कबलेन यदाऽस्माभिः वाह्यार्थस्य वस्तुनः सिद्धीकर्तुमिष्यते तदा अयथार्थज्ञानस्य प्राप्तिर्भवति यतोहि–प्रत्यक्षप्रमाणस्य लक्षणं तेनोपस्थाप्यते प्रतिगतम् अक्षम् प्रत्यक्षम्। अनया व्युत्पत्त्या मुख्यरूपेणेन्द्रियाक्षममेव प्रत्यक्ष-प्रमाकारणं मतमस्ति। करणमिदं त्रिविधं फलभेदत्वात्। (१) इन्द्रियं (२) इन्द्रियार्थसन्निकर्षं तथा (३) ज्ञानम्। प्रस्तूयतेऽत्र प्रत्यक्षशब्दस्य त्रयाणामर्थानां विषये विस्तारपूर्वकं किञ्चितथ्यम्। प्रत्यक्षप्रकरणस्यात्र सविस्तारवर्णनम् अतएव प्रस्तुतं क्रिय–माणं वर्तते–यतोहि प्रत्यक्षप्रमाणबलेन वाह्यार्थस्य सिद्धौ सारल्यमनुभूयते।

(क) प्रत्यक्षशब्दस्य व्युत्पत्तिरस्ति—

प्रतिगतम् अक्षम् अर्थात् "विषयं प्रतिगतम् अक्षम्" (गतिसमास) विषयत्वेन सन्निकृष्टेन्द्रियम्–एतदेव प्रत्यक्षप्रमाणं वर्तते।

न्यायभाष्यानुसारम्–"अक्षस्याक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम्।"[१]

(ख) प्रत्यक्षम्—

प्रमार्थे प्रत्यक्षशब्दस्य प्रयोगः "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षम्।"[२]

---

१. वात्स्यायन भाष्यम् १.१.३
२. न्यायसूत्रम् १.१.४
३. अव्ययीभावः (न्यायसूत्रम्)
४. न्यायसूत्रम्

अर्थेऽस्मिन् प्रत्यक्षशब्दस्य व्युत्पत्तिरस्ति—"अक्षम् अक्षम् इति वर्तते[3]" अथवा अक्षम् अक्षं प्रतीत्य उत्पद्यत इति प्रत्यक्षम्।[4]

(ग) प्रत्यक्षविषयोऽथवाप्रत्यक्षविषयो

यथा आत्मनः प्रत्यक्षत्वमस्ति (आत्मा प्रत्यक्षः) अस्मिन्नर्थे शब्दस्य अस्य व्युत्पत्तिरस्ति-(प्रत्यक्षम् अस्यास्तीति अर्थात् तस्य प्रत्यक्षं भवति। प्रथमार्थे द्वितीयार्थे वा प्रत्यक्षशब्दो नपुंसकलिङ्गेऽस्ति। तृतीयार्थे चैतस्य प्रयोगस्त्रिषु लिङ्गेषु अभिधेयानुसारं भवति। यथा-प्रत्यक्ष आत्मा, प्रत्यक्षा पृथ्वी तथा प्रत्यक्षं रूपम्। केशवमिश्रस्य तर्कभाषा वाह्यार्थं प्रति स्थूलदृष्टिकोणकारणत्वेन विश्लेषणं प्रमाणादीनामनेन यत् कृतमस्ति तेनाऽस्माभिरिदं प्रतीयते यत् प्रत्यक्षादिप्रमाणबलेनैव वाह्यजगतः सम्पूर्णवस्तुनामभिज्ञानाय प्रयासो विहितः। अर्थात् कीदृशवस्तुनः स्वरूपम्-अतज्ज्ञातुमयं प्रयत्नशीलत्वेनावलोक्यते।

इदमाधारीकृत्यानेन प्रत्यक्षप्रमाणान्तर्गते ज्ञापितं वर्तते यत्-आत्मनो मनसा संयोगो भवति। मनस इन्द्रियैस्तथेन्द्रियाणामर्थेन सहेति। यतोहि इन्द्रियाणि वस्तु प्राप्यैव प्रकाशितानि जायन्ते। एतदनन्तरम् अर्थेन सन्निकृष्टेन्द्रियद्वारा नामजात्यादियोजनारहितस्य केवलवस्तुनो ग्रहणकर्तृत्व-युक्तम् एतदस्ति किञ्चित्। एतत्प्रकारकं निर्विकल्पकं ज्ञानमुपद्यते। ज्ञाने तस्य कारणानीन्द्रियाणि मन्यन्ते। यथा छेदनकारणं परशुः। इन्द्रियार्थयोः सन्निकर्षावान्तरव्यापारो भवति। यथा छेदनव्यापारसाधनपरशोः काष्ठेन सह संयोगः (अवान्तरो व्यापारः) निर्विकल्पकज्ञानं फलमस्ति। यथा परशुः (छेदनकारणस्य फलं) छेदनं वर्तते।

अनेन प्रकारेण श्रीकेशवमिश्रेण बाह्यार्थसिद्ध्यर्थं त्रीणि सोपानानि प्रदत्तानि सन्ति।

१. प्रथमत आत्मनो मनसा संयुक्तत्वम्। अत्रायमुदेति प्रश्नो यत् आत्मा महत्परिमाणमवानस्ति तथा मनोऽणुपरिमाणवदस्ति, अत आत्मनो मनसा संयोगः सदैव प्रतिष्ठते। परन्त्वत्र न प्रश्नावसारः समुदेति-यतोहि आत्मा मनसा तदैव संयुक्तो जायते यदा मनः पुरीतत् नाड्यां न तिष्ठति। एतत्प्रकारक आत्मनो मनश्चेति संयोगस्योत्पत्तौ कारणं मतं वर्तते।

२. द्वितीयं सोपानम् एतदनन्तरं मनस इन्द्रियैः सह संयोगो भवति इदमपि ज्ञानस्य कारणमभिमतमस्ति। यतोहि स्वप्नावस्थायामात्मनस्तथा मनसः संयोगो जायते। किन्तु मनसो बाह्यस्थूलविषयाणां नोत्पद्यते।

३. तत्पश्चात् अर्थेन सहेन्द्रियाणां संयोगो भवति। इदमेव इन्द्रियार्थसन्निकर्षोऽस्ति। बाह्यार्थसिद्धौ तस्य स्थूलदृष्टिकोणस्य स्पष्टम-मुदाहरणं तदा दृष्टिगोचरतां याति यदा समक्षं स्थापितेन घटेन सहास्माकं नेत्रेन्द्रियस्य सन्निकर्षत्वं न जायते, तावद् घटादीनां प्रत्यक्षज्ञानं नोपस्थितं भवति। कारणमिदमेवास्ति यत् सर्वेन्द्रियविषयेषु वस्तुप्राप्यकारित्वस्यैव ध्यानं स्थाप्यते।

त्वगिन्द्रियस्य वस्तुना सह सम्पर्के सति एव स्पर्शस्य ज्ञानमुत्पन्नं भवति। अनेनैव प्रकारेण रसनाद्वारापि सन्निकृष्टवस्तुनो रसस्यैव निर्वि-कल्पकम्। तत्प्रत्यक्षप्रमायाः करणं त्रिप्रकारकं (इन्द्रियम्, इन्द्रियसन्निकर्षः, निर्विकल्पकज्ञानञ्चेति) भवति। तस्य सन्निकर्षः षट्प्रकारको भवति। १. संयोगः, २. संयुक्तसमवायः, ३. संयुक्तसमवेतसमवायः, ४. समवायः, ५. समवेतसमवायस्तथा, ६. विशेषणविशेष्यभावः। एतत्षट्प्रकारकाणां सन्निकर्षाणामाधारे क्रमशः १. घटः २. घटगतो नीलः (आदिगुणः) ३. घटगतनीले समवेतः) नीलत्वजाति, ४. शब्दः (शब्दस्था) शब्दत्व-जातिः तथा ५. अभाव एवं सममावयः इत्येतेषां ग्रहणं जायते। अनेनात्मनो मनसश्च संयोगस्तु सर्वज्ञानानां कारणं मन्यते। किन्तु मनइन्द्रियसंयोगो बाह्यवस्तुनोऽस्तित्वं सिद्धं कर्तुं प्रमुखं कारणं विद्यते। बाह्यवस्तुनः प्रत्यक्षत्वं बाह्येन्द्रिय-द्वारा एव क्रियते। चक्षुः-श्रोत्र-रसना घ्राणत्वगादीनि पञ्च बाह्येन्द्रियाणि वर्तन्ते। मनोऽतीन्द्रियमस्ति। सर्वेषामिन्द्रियाणां शरीरमाश्रय-मस्ति। इमानि शरीरे तिष्ठन्ति।

सर्वाणीमानीन्द्रियाणि तदा प्रकाशितानि जायन्ते यदा किञ्चित् वस्तु प्राप्नुवन्ति। एतेषु बाह्येन्द्रियेषु चक्षुः विषयमालम्ब्य तत् प्रकाशितं कुरुते। शेषाणि चत्वार्यपि स्वस्थानमेवाधितिष्ठन्ति। तत्रैव विषयमवाप्य तत्प्रकाशितं कुर्वन्ति।

प्रथमतश्चाक्षुषप्रत्यक्षमेव गृह्यतां, चक्षुषि यत् कृष्णं ताराख्यं दृश्यते, तस्मिन् तैजसपरमाणुभिः सूक्ष्मरूपवत् चक्षुरिन्द्रियं विद्यमानं (मन्यते) भवति। नयनरश्मयो भवन्ति तैजसकारणत्वात्। यदा नेत्रं तदा चक्षूरश्मियो बाह्यघटादौ सर्पन्ति। अयमेव चक्षुषो घटस्य च सन्निकर्षः इन्द्रिय-सन्निकर्षोऽस्ति। एततत्संयोगसन्निकर्षेण चक्षुरिन्द्रियं घटं प्रकाशयति। इदमेव निर्विकल्पकं प्रत्यक्षं कथ्यते। एतदाधारीकृत्य सविकल्पक-प्रत्यक्षस्योत्पत्तिर्भवति। एतदतिरिक्तमन्यानि यानीन्द्रियाणि विद्यन्ते तेषां शरीराद् बहिर्गतिरेव नास्ति। उदाहरणम्-पुष्पाद् गन्धो वायुना घ्राणे प्रविशति। अनेन प्रकारेण रसना त्वगपि येन केन प्रकारेण स्वेन सह (सन्नकृष्टवस्तुनो) रसस्य स्पर्शस्य च प्रत्यक्षं कुरुतः।

श्रोत्रेन्द्रियविषये किञ्चित् आन्तर्यमुपलभ्यते। श्रोत्राद् बहिर्ये शब्दाः समुत्पद्यन्ते ते शब्दा वीचितरङ्गन्यायेन श्रोत्रपथे प्रविशन्ति तथा स्वस्मिन् समवेतशब्दानां श्रोत्रेन्द्रियेणा समवायसन्निकर्षद्वारा ग्रहणं जायते।

अतएव सिद्धयतीति यत् केशवमिश्रस्य दृष्टिकोणः बाह्यजगतः सत्ताविषये स्थूल आसीत्। तस्य दृष्टिकोणोऽयं कस्मिंश्चिदंशे दार्शनिकस्तथा कस्मिंश्चिदंशे भौतिकविज्ञानेन सम्बन्धितो वर्तते।

उदाहरणम्—संसाररस्य द्रव्यगुणादिसप्तपदार्थेषु विभाजनमेका दार्शनिकी प्रक्रियाऽस्ति। परन्तु पृथ्वीजलादीनां चतुष्प्रकारकाणां परमाणूनां निरूपणं तथा तेन स्थूलपदार्थानामुत्पत्तेर्वर्णनं भौतिकविज्ञानसम्बन्धि वर्तते। यदाधुनिकविज्ञानदृष्ट्या समयेऽस्मिन् सर्वथाऽनुपादेयमस्ति। तथा चैतस्य मूल्यं केवलमैतिहासिकमेव स्थितं वर्तते। यत्र यावदनेन द्रव्यादिसप्तपदार्थानां निरूपणं कृतमस्ति सैषेका दार्शनिकसमस्यैव विद्यते। यतोहि यदाऽस्माभिः किमपि वस्तूदाहरणार्थं दृश्यते तथा तदाभ्यान्तरे रूप-रसस्पर्शादीनां बहवो गुणा अवलोक्यन्ते।

क्रिया दृश्यते तर्हि एकः प्रश्नः स्वाभाविकरूपेण उत्तिष्ठति यत् किमिदं वस्तु यदस्माभिरवलोक्यमानमस्ति तथा यस्मिन् गुणक्रियादयः अनेक-प्रकारकाः धर्माः दृश्यन्ते तर्हि किं तद्वस्तु तेभ्यो धर्मेभ्यो भिन्नं वर्तते।

उदाहरणम्—किं पटस्य घटस्य रूपं पृथक्-पृथक् वस्तुद्वयमस्ति अथवा तदुभयमप्येकमेव वस्तु वर्तते। मनुष्यस्य सामान्यबुद्धया प्रतीयत इदं यत् पटमेकं वस्तु अस्ति यस्मिन् रूपरसस्पर्शादयः अनेकगुणाः सन्ति। परन्तु यदाऽयं प्रश्नः उतिष्ठति यत् दृश्यमानरूपस्पर्शादिभ्यो गुणेभ्यो भिन्नानां तेषां गुणानामाधारभूतं पटरूपं वस्तु किमस्ति। तर्हि सामान्यबुद्धिः एतत् प्रकारकस्य विश्लेषणस्य समक्षं काठिन्यमालभते। यतोहि-न तु दृश्यमानगुणानामतिरिक्तं तेषाम् आधारः (धर्मी)(वस्तु) अथवा (द्रव्यं) कश्चित् पृथक् दृष्टिपथमापतति। तथा नं त्विदं ज्ञाने आगच्छति यत् एतेषां धर्मामामाधारः कश्चित् धर्मी अथवा द्रव्यं न केवलं पृथक-पृथक् गुणादि "धर्म" एवाऽस्ति।

उपर्युक्तसमस्याया उत्तरं वैदिकतर्कभाषाया दृष्टिकोणेनोपस्थाप्यते यत् "पटः""पटरूप"श्च तत्वतो द्विप्रकारकें भिन्ने-भिन्ने वस्तुभूते वर्तेते।यद्यपि ते उभे सहैव प्राप्येते। परन्तु उभेऽपि एतादृशे भिन्ने स्तः यत् उभयोः कारणमस्ति भिन्न-भिन्नम्।

येन प्रकरेण "पटः" "पटरूपात्" भिन्नो भवति, तेनैव प्रकारेण पटस्थिता क्रिया "पटत्वं" नामकसामान्यधर्मः (Universal)अपि "पटात्" भिन्नो वर्तते। एतदरूपादिधर्मैः भिन्नधर्मिणोऽनुभवो मनुष्यस्य सामान्यबुद्धेः साक्षात् रूपेण जायते। तन्निषेधो न कर्तुं शक्यते। अनेन प्रकारेण वक्तुं शक्यतेऽस्माभिर्यत् वैदिकतर्कभाषाया मुख्याधारभूतसिद्धान्तो धर्मधर्मिभेदोऽपि भवितुमर्हति। येनाऽस्माभिः पटमाधारीकृत्य तद्गुणादीना-मपि विवेचनं कर्तुं पार्य्यते। दृश्यते इदमनेन प्रकारेण यत् यथा कश्चन "मैकेनिकः" "अभियान्त्रिकः" पूर्व कस्यचित् वस्तुनः प्रत्येकं भागमेकत्री कुरुते तथा तस्य संयुक्तरूपं ददते। तथैव केशवमिश्रेण स्वस्थूलवादिदृष्टिकोणबलात् बाह्यजगत् प्रति सिद्धं कर्तुं सर्वप्रथमं दार्शनिकविश्लेषणद्वारा सहैव प्रतीयमानद्रव्यगुणयोः पार्थक्यं प्रस्तूयते। तथा तन्नियोजयितुं "समवाय" नामकस्यैकस्य नवीनसम्बन्धस्य कल्पना क्रियते।

यद्यपि पटः पटरूपञ्च अर्थात् द्रव्यं गुणश्च, अथवा धर्मी तथा धर्मश्च तत्त्वतो भिन्नतां यान्ति परन्तु तेषामयमपि स्वभावो वर्तते यत् ते अन्योन्याश्रय-सम्बधान्विताः सन्ति अर्थात् परस्पराश्रयत्वाभावे तद-स्थितिः। अर्थात् पटः पटरूपं विना नैव स्थातुं प्रभवति। परन्तु यत्र द्रव्यद्वयस्य सम्बन्धो भवति तत्र स संयोग-सम्बन्धो मन्यते। यथा घटः पटश्च।

साधारणतया मनुष्यस्य सामान्यबुद्धेः द्रव्यगुणौ उदाहरणार्थं-पटः पटरूपञ्च द्वे पृथक्-पृथक् वस्तुनी ययोस्तत्त्वं स्वरूपं भिन्नं-भिन्नं स्यात् न प्रतीयते। पुनः वैदिकतर्कभाषायां पृथक्-पृथक् वस्तुद्वयं स्वीकृतमस्ति एतस्य कारणमिदं वर्तते यत् धर्म-धर्मिभेदस्य सिद्धान्तमपहास्यते तर्हि बाह्यजगतः अस्तित्वमेवं सङ्कटापन्नं भविष्यति।

एतत् प्रकारक-"बाह्यार्थवादस्य" सिद्धयर्थमेव कारणसिद्धान्तस्य स्थापना भवितुमर्हति, यत् "असत्कार्यवादः" अथवा "आरम्भवादो" वर्तते। यतोहि पटःस्वकारणात्तन्तोर्नूनमेव भिन्नोऽस्ति। परन्तु यदा तन्तुषु किञ्चित् नवीनप्रकारकसंयोगत्वे नवं संस्थानमथवा नवाऽकृतिर्निर्मिता जायते तदेवाऽस्माभिः "पटत्वे"नोच्यते।

अतएव मन्तव्यमिदं भवति यत्तन्तूनामतिरिक्तं "पट"-नामकमेकं नवीनं "द्रव्यम्" उत्पन्नं जातं वर्तते, यत् पूर्वं नासीत्। अतोऽत्रावलोक्यते "असत्कार्यवादस्य स्वरूपम्।" यतोहि नवीनं द्रव्यं समुत्पन्नं विद्यते। अत एष आरम्भवादिदृष्टिकोणोऽपि वक्तुं शक्यते, यः बाह्यार्थजगतः सिद्धयै आवश्यकोऽस्ति। तस्य बाह्यर्थवादस्य सिद्धयर्थं तेन सप्तपदार्थाणां स्वीकारः कृतो यः स्थूलदृष्टिकोणस्य कृते अत्यन्तमावश्यकमस्ति। केशवमिश्रेण बाह्यर्थवादस्य सिद्धये उदाहरणमिदं प्रस्तुतं वर्तते यत् प्रत्यक्षज्ञाने घटः साक्षात् रूपेण भासः स्थितोऽस्ति, न तु अस्माकं ज्ञानम्। पुनर्यदाऽस्माभिर्घटस्य साक्षात् रूपेण दर्शनं क्रियते, तर्हि अनुव्यव-सायात्मकज्ञानमाधारीकृत्य मानस-प्रत्यक्षत्वमपि भवति। एतदेव कारण-मस्ति यदनेन बाह्यर्थस्य, सत्तां सिद्धां कर्तुं प्रामाण्यस्य परतो ग्राह्यताया निरूपणं कृतमस्ति।

तस्य कथनमेतदस्ति यज्ज्ञानस्य तु मानसप्रत्यक्षेणैव ग्रहणं जायते, किन्तु प्रामाण्यग्रहणम् अनुमानेन सम्भवं भवति। एतस्योदाहरणं प्रस्तुतं कुर्वन् वक्ति यत्–यथा–इदं जलमस्ति'' इदंप्रकारकजलज्ञानस्य प्रत्यक्ष-स्वरूपेण ज्ञानस्य पश्चात् जलाभिलाषस्य पुरुषस्य व्यक्तेर्वा प्रवृत्तिर्द्वि-प्रकारिका भविष्यति एका सफला प्रवृत्तिपरा विफला प्रवृत्तिः। अनयोर्या सफला प्रवृतिरस्ति, सा समर्था इत्युच्यते यतोहि तदाधारीकृत्य ज्ञानस्य प्रमाण्यं यस्य स्वरूपं वर्तते, याथार्थ्यस्य अनुमानं क्रियते। अनुमानस्य प्रयोगोऽयमस्ति।

प्रतिज्ञा—विवादग्रस्तजलज्ञानं प्रमाणं वर्तते।

हेतुः—यतोहि स सफ्रलाप्रवृतेर्जनको विद्यते।

(पक्षः) अनुमानेऽस्मिन् यो जनकः सफलाप्रवृत्तेरस्ति।

केवलव्यतिरेकिणोऽनुमानस्योदाहरणम्

प्रमाणाभासो हि तज्ज्ञानं यत्प्रमाणं नास्ति। अत्र यः सफलाप्रवृत्तेर्जनकोऽस्ति। अर्थात् यज्जलज्ञानं वर्तते, तदेव पक्षोऽस्ति। अतः केशवमिश्रेण ज्ञानं प्रामाण्यं तथाप्रामाण्यमुभयमपि मन्यते। तस्य कथनमिदमस्ति यत् यां कारणसामग्रीमाधारीकृत्य ज्ञानस्य ग्रहणं क्रियते, तद्भिन्नसामग्रीद्वारा ज्ञानस्य प्रमाण्याऽप्रामाण्ययोर्ग्रहणं जायते।

तेन संक्षेपेण प्रामाण्यग्रहणप्रक्रियाऽनेन प्रकारेण प्रदर्शिता विद्यते। ज्ञापितं हि तेन प्रत्यक्षप्रमाणसन्दर्भे यत्–कस्यचित् पदार्थस्य निर्विकल्पक-ज्ञानान्ते तस्य सविकल्पकं ज्ञानमुत्पद्यते। एतत् सविकल्पकज्ञान-माधारीकृत्यैव बाह्यार्थस्य सत्ता निश्चायकस्वरूपे लब्धा भवति। अत्र वस्तु नामाजात्यादियोजनसहितमुपलभ्यते। प्रोच्यते हीदं ज्ञानं निश्चयात्मकज्ञानं, व्यवसायात्मकज्ञानमथवा व्यवसायश्च।

यस्य स्वरूपम् ''अयं घटो विद्यते'' ''इदं पुस्तकं वर्तते'' इत्यादि। एतदनन्तरं मयाऽयं घटो ज्ञातोऽथवा जानेऽहं घटमिति रूपेण ज्ञानं जातम्।

अतोऽवगम्यते यत् केशवमिश्रस्य ज्ञानं दृष्टिकोणो वा बाह्यार्थसताया विषये स्थूलम् आसीत्। नैव जायते केवलं स्थूलदृष्टिकोणेन बाह्यार्थसताया बोधः। अतो मोक्षाकारगुप्तेन बाह्यार्थसत्तासिद्ध्यर्थमङ्गीकृतः सूक्ष्मदृष्टि-कोणो, यतोहि वैदिकबौद्धयोर्वैचारिकोऽथवा दार्शनिकसंघर्षस्तु पूर्वकादेव आगचछन् वर्तते। कस्यचिदपि वस्तुनः स्वरूपद्वयं जयते। (१) स्थूलस्वरूपं तथा (२) सूक्ष्मस्वरूपम्।

बाह्यार्थसत्ताया विषये वैदिकतर्कभाषायां केशवमिश्रेण स्थूलदृष्टि-कोणवस्तु स्वीकृतस्तथा मोक्षाकारगुप्तेन बौद्धतर्कभाषायामङ्गीकृतः सूक्ष्म-दृष्टिकोणः।

बाह्यार्थसत्ताया विषये मोक्षाकारगुप्तस्य तर्कभाषाया सूक्ष्मवादि-दृष्टिकोणस्य प्राधान्यम्—

मोक्षाकारगुप्तप्रणीतबौद्धतर्कभाषायामिदमुक्तं वर्तते बाह्यार्थसत्ताया विषये यत् स्वयं प्रकाशवज्ज्ञानं भवति। नास्त्यावश्यकता तत्प्रतीत्यर्थमन्यस्य ज्ञानस्य (अर्थात् यदास्माभिरलोक्यते घटः) तर्हि अस्माकं ज्ञाने एकमेव वस्तु अवभासते प्रोच्यतां तज्ज्ञानमथवा ज्ञानाकारः तथा तद् बाह्यवस्तु घटो वा कथ्यताम्। लभ्यते ज्ञाने यदाकारो बाह्यपदर्थाणां तदेवाधारीकृत्य विज्ञानवादस्य सिद्धान्तस्य पुष्टिर्भवितुं शक्नोति।

बाह्यार्थसत्ताया विषये मोक्षाकारगुप्तस्य दृष्टिकोणः अनुमेय-वादिनोऽनित्यवादस्य च समर्थक आसीत्—

यद्यपि एतेषां पूर्वं बौद्धन्यायदृष्ट्या बाह्यर्थसत्ताविषये स्व-स्व-दृष्टिकोणः प्रस्तुतो वर्तते। वैभाषिकैरिदं स्वीकृतं यत् बाह्यसताया अस्तित्वं प्रत्यक्षगोचरीभवति। कारणमिदेवास्ति यदिमे बाह्यप्रत्यक्षवादिन उच्यन्ते। सौत्रान्तिकानां कथनमिदं वर्तते यत् बाह्यार्थसत्ताया ज्ञानं नैव प्रत्यक्ष-माधारीकृत्य लब्धुं पार्य्यते, अपितु अनुमानबलेन कर्तव्यं भवति।

मोक्षाकारगुप्तेन बाह्यार्थसत्ताया ज्ञानमनुमानबलमाधारीकृत्यैव स्वीक्रियते। प्रक्रियाऽस्य ज्ञानस्य अनेन इदं प्रोच्यते यत् बाह्यसत्तायां

विनष्टायां सत्यां चित्ते तदाकारोतपत्तिर्जायते तथा तद्धेतुरूपं मत्वा बाह्यसत्ताया अनुमानं क्रियते। अतो बाह्यवस्तुनो ज्ञान परम्परया भवति। न तु साक्षात्। एतस्य कथनमेतद् वर्तते यद्व्योम्नि यन्नीलादिप्रतिभाषित्वं समुत्पद्यते, न तद् बाह्यार्थः जडवस्तुनि प्रकाशायोगत्वात्। अतएव दृश्यं स्वाकारानुरूपस्य ज्ञानस्य जनकं भवति न तदिन्द्रियगोचरतामुपयाति।

अकलङ्केनाप्युक्तं यत् नीलस्य संवेदनं भवति, तर्हि न तद् बाह्यपदवाच्यम् अर्थात् तद् बाह्यं कथं वक्तुं शक्यते। तथा यदि नीलस्य संवेदनमेव नास्ति तर्हि तद् बाह्यं कथं वक्तुं शक्यते। अतोऽनेन प्रकारेण स्वीकृतमिदं वर्तते यत् बाह्यपदार्थाणां ज्ञानमनुमानेनैव जायते। तस्य प्रत्यक्षस्य कृते विषयचित्तेन्द्रियाणां तथा सहायकतत्त्वानां यथा (प्रकाशाकारादीनां) वस्तुमानपेक्षा वर्तते। एतेषां परस्परं मेलनेन मनसि उत्पन्नस्य विषयस्य विचारः (Idka) अथवा अनुवृत्तिः (Concph) प्राप्यते। अनेन प्रकारेण बाह्यवस्तुनि मनःस्थितविषयस्य विचाराणाम् अथवा ज्ञानस्थितविषयस्य विचाराणां प्रतिनिधिमात्राणि वर्तन्ते। मानसिक-धारणाभिरेव मनो बाह्यपदार्थाणामनुमानं कुरुते। अतएव एतैः केवलं वर्तमानकालस्य सत्तैव स्वीक्रियते। दिङ्नागधर्मकीर्ति-असङ्गादिभिरा-चार्यैरिदमङ्गीकृतं यच्चित्तं यत् सर्वेषु वस्तुषु उपसर्पति, नासत् तत् भवितुमर्हति। मनोगृहीताः सर्वे पदार्थाः धारणामात्रभूता विद्यन्ते। मानसिक-धारणा एव बाह्यवस्तुरूपे भ्रमवत् दृष्टिगोचरतामायाति। एतेषु केवलं ज्ञानमेवैकं शुद्धं चैतन्यं वर्तते। अनेनेदं सिद्धतां गच्छति यत्-बाह्यार्थस्य सत्तामिमेऽनुमानमाधारीकृत्य स्वीकुर्वन्ति। बाह्यार्थस्य जगतः सिद्धयर्थमेव तैरिदं प्रोक्तं यत् "प्रमाणं सम्यग्ज्ञानपूर्वम् अगोचरम्।[1] अर्थात् बौद्धतर्कभाषायां मोक्षाकारंगुसेन सम्यग्ज्ञानमेव प्रमाणं स्वीकृतमित्युप-लभ्यते। अतोऽत्र दृश्यते यदनेनाऽन्यं सूक्ष्मदृष्टिकोणं प्रस्तोतुं प्रमाणस्य व्यवस्था विहिता।"

सम्यग्ज्ञानमेव अविसंवादकमिति कथ्यते। अविसंवादकज्ञानमनुभवेन अबाधितमनधिगतं ज्ञानं मन्यते। ज्ञानस्य कार्यं प्रदर्शनमेवास्ति। अर्थात्

---

१. बौद्ध-तर्कभाषा

यज्ज्ञानमाधारीकृत्य प्रदर्शितवस्तुनः प्राप्तिर्भवेत्, तदेवाऽतिवसंवादकम् अथवा अविसंवादकं ज्ञानं कथ्यते। अविसंवादकत्वेनैव मनुष्यप्रवृत्तिर्दृश्यते। यदा ज्ञानेन वस्तु प्रदर्शितं क्रियते, तदा व्यक्तिरभिलषति तद् वस्तुनो ग्रहणं कर्तुम्, अथवा त्यक्तुं वाञ्छति। इयमेव हेयत्वस्य उपादेयत्वस्य प्रवृत्तिरुच्यते। इमां प्रवृतिमुत्पन्नां कर्तृत्वे अविसंवादकज्ञानम् अथवा प्रमाणं भवति। यतोहि प्रमाणमेव स्वप्रदर्शितवस्तुनां प्राप्तौ सहयोगि मन्यते। तथा अर्थस्य प्रतीतिरेव तस्य फलत्वेन कथ्यते। अतः सिद्धमिदं भवति यत् बौद्धतर्कभाषायां प्रमाणप्रमयोरभेदत्वमस्ति। ज्ञानस्य चत्वारि कारणानि स्वीकृतानि अनेन। तानि यथा (१) आलम्बनम्, (२) समनन्तरम्, (३) अधिपतिस्तथा (४) सहकारि।

अत आलम्बनप्रत्ययमाधारीकृत्य बाह्यवस्तु अस्माभिः तदाकार-ज्ञानबलेन ज्ञायते। एतदनन्तरम् आलम्बनप्रत्यये सत्यपि उत्पन्नेन अव्यवहितपूर्ववर्तिज्ञानमपि ज्ञातस्योत्पत्तौ कारणं विद्यते। अयमेव समनन्तरप्रत्ययपदवाच्यो ज्ञायते, कथ्यते वा। अतएवानेन प्रकारेण आलम्बन-समनन्तर-प्रत्यययोरनन्तरमिन्द्रिसन्निकर्षोऽपि नितान्तमस्ति आवश्यकः। एष एवाधिपतिपदेनोच्यते। एतदतिरिक्तं वस्तुन आकारा-लोकादीनां सहाकरिकारणानामपि स्थितिः ज्ञानोत्पत्तौ सहायकत्वं भजते। अयमेव संहकारिप्रत्ययपदवाच्यत्वमलङ्करोति। अतः कस्यचिदपि बाह्यवस्तुनो ज्ञानं चतुष्प्रकारेण ज्ञायत इति।

वैदिकर्तभाषाया भिन्नोऽयमस्ति। यतोहि वैदिकतर्कभाषायां प्रमाण-करणमप्युपलभ्यते तथा तस्य फलं प्रमा अथवा यथार्थज्ञानं वर्तते, एतेन प्रकारेण मोक्षाकारगुतेन सम्यग्ज्ञानमेव प्रमाणं प्रमा चाभिमता। ज्ञानेन सह अर्थस्य साध्यमेव प्रमाणम्, अर्थप्रतीतिरेव फलं विद्यते। अर्थसारूप्यमेव, सारूप्यस्य च प्रतीत्यानान्तरं भेदो वा वर्तते। एकस्यैव अविसंवादकज्ञानस्य सारूप्यदृष्ट्या प्रमादृष्ट्या वा प्रमाणमस्ति, तथा प्रतीतिदृष्ट्या फलं वर्तते। उभयोरभेदत्वमित्युपलभ्यते।

एतस्य कारणमिदमस्ति यत् अविसंवादकं ज्ञानं (प्रमाणं) एव स्वप्रदर्शितवस्तुप्रत्यर्थं समर्थतामेति। यतोहि अविसंवादके ज्ञाने अर्थेऽथवा

बाह्यवस्तुप्रतीतौ अविनाभाविसम्बन्धो दृश्यते। प्रतीतिसत्त्वे प्रमाणत्वमस्त्येव। प्रमाणसत्वे प्रतीतिरस्त्येव। केषाञ्चित् वस्तुनां ज्ञानं साक्षात्रूपेण प्रत्यक्षरूपेण वा क्रियते तथा केषाञ्चित् वस्तुनां ज्ञानम् असाक्षात् रूपेण अथवा अपरोक्षरूपेण जायते।

अतो बाह्यार्थसत्तासिद्धर्थं तेनाऽपि प्रमाणमङ्गीकृतं यस्य भेदद्वयमस्ति—(१) प्रत्यक्षं तथा (२) परोक्षम्। यस्य साक्षाद्रूपेण ज्ञानं भवति तत् प्रत्यक्षगम्यज्ञानं तथा यस्य परोक्षरूपेण ज्ञानं लभ्यते तदनुमेयमस्ति। अत एतत्साधनमपि द्विप्रकारकं वर्तते—(१) प्रत्यक्षं तथा (२) अनुमानम्।[1] प्रत्यक्षस्य विषयः (स्वलक्षणं) अनुमानस्य च विषयः (सामान्यः) वर्तते।

एवं रीत्या सिद्धमिदमभवत् यत् मोक्षाकारगुप्तेन बाह्यार्थ-तत्त्वं सूक्ष्मदृष्टया स्वीकृतम्।

मोक्षाकारगुप्तस्य बाह्यवस्तुनः सम्बन्धे अनित्यवादी दृष्टिकोणः— अनेनायंमङ्गीकृतो यत् प्रत्येकमपि वस्तु स्वभावत एवाऽनित्यं भवति।

तस्योत्पत्तिः सदैव कस्मिंश्चित् कारणे निर्भरतामुपैति। एवञ्च तत् स्वयमेवाऽन्यत् कार्यमुत्पादयति। स्वभावादेव उत्पत्तिमद्वस्तुनः तथा स्वभिन्नवस्तुनः उत्पत्तौ कारणत्वात् संसारस्य सर्वो हि पदार्थो सादिपदेन सान्तपदत्वेन चोच्यते। अन्येन शब्देन ते स्वभावादेव पदार्था अनित्या वर्तन्ते। तदनुसारेण सांसारोऽपि अनित्य एव वर्तते नाशवान् अस्ति परिवर्तनशीलश्चास्ते। परिवर्तनमेव विश्वसत्तायाः स्वाभाविको गुणोऽस्ति। नास्ति किमपि वस्तु नित्यमनित्यं वा पूर्णरूपेणैतस्मिन् जगति। सत्यं त्विदमस्ति यत् इदं निरंतरं परिवर्तितं भवति। एतदेव प्रतीत्य-समुत्पाद-सिद्धान्तस्य पंदमलङ्कुरुते प्रतीत्यसमुत्पादसिद्धान्तो वा प्रोच्यते।

---

१. *तत्र ये कृतका भावाते सर्वे क्षणभङ्गिनः।*
विनाशं प्रति सर्वेषामनपेक्षतया स्थिते॥
यद्भावं प्रति यन्नेव हेत्वन्तरमुपेक्षते।
तत्तत्र नियतं ज्ञेयं स्वहेतुभ्यस्तथोदयात्॥
(तत्त्वसंग्रहकारिका ३५४)

एतत्कृते दीपशिखाया उपमा प्रदत्ता वर्तते। यावत् पर्यन्तं दीपो ज्वलति, तावद्धि तस्याः शिखाग्रभाग एक एव प्रतीयते। परन्तु वास्तविकरूपेणेयं दीपशिखा नैकैव अपितु अनेकशिखानां शृङ्खला वर्तते। एकतैलबिन्दुनो ज्वलनेन या शिखोत्पद्यते, सान्येन तैलबिन्दुना उत्पन्नशिखाया भिन्नाऽस्ति। एवं तस्यापि एतच्छिखानां निरन्तरं ज्वलनेन प्रवाहेण वा तासु एकतायाः प्रतिभानं दृश्यते। अनेनेदं सिद्धं भवति यत् यद्यपि सम्पूर्णमपि जगदनित्यमस्ति, तथापि तत्र एकतायाः प्रतीतिर्लभ्यते।

अतोऽनेनानुसारं किञ्चद् वस्तु स्वभावत एव विनश्वरं भवति, यतोहि प्रत्येकमपि वस्तु स्वोत्पत्तेरनन्तरं स्वयमेव विनष्टतामेति। विनाशोऽयं निर्हेतुको मन्यते, अर्थात् विनाशस्य कृतेऽन्यस्य वस्तुनो नावश्यकताऽनुभूयते, यत् परपदत्वेन कथ्यते। तद्घटः क्षणस्य सन्तानः अविच्छिन्प्रवाहमात्रमस्ति, नैकं स्थिरं वस्तु। यदा घटो मुद्गरप्रहारेण त्रोट्यते, तदा घटसन्तानः समाप्तिमेति।[१] तथा तत्स्थले त्रोटितभागानां (कपालादीनां) अवस्थानमेव प्रवाहितं भवति। अतः प्रत्येकं वस्तु स्वभावेन अनित्यं मन्यते। न तद्विकासार्थमन्यस्य वस्तुन आवश्यकता भवति।

अनेन प्रकारेणेदं सिद्धं भवति यत् बाह्यार्थसत्ताया विषये वैदिक-तर्कभाषायाः दृष्टिकोणः वस्तुवादी आसीत् तथा मोक्षाकरगुप्तस्य (बौद्धतर्क-भाषाकारस्य) दृष्टिकोणोऽनित्यवादी तथा अनुमेयवादी अस्ति।

परन्तु जैनतर्कभाषाकारेण एतस्मिन् बाह्यर्थसत्तासम्बन्धिदृष्टिकोणे वस्तुवादिताऽनित्यवादिता चोभयमपि स्वीकृतम् एवं प्रस्तुतञ्च, वैदिकतर्कभाषाबौद्धतर्कभाषादृष्टिकोणस्यैकाङ्गित्वात्।

यशोविजयेन बाह्यार्थस्य प्रत्यक्षं हेतु चत्वारि सोपानानि स्वीकृतानि (१) अवग्रहः, (२) ईहा, (३) अवायस्तथा (४) धारणा।

तत्र भेदद्वयमङ्गीकृतं वर्तते अवग्रहसम्बन्धे जैनदार्शनिकेषु। प्रथमे मते उमास्वातिः, जिनभद्रः, सिद्धसेनगणिः तथा यशोविजयश्च सन्ति येषां मते अवग्रहे निश्चयात्मकं ज्ञानं न जायते। द्वितीयं मतमवग्रहं निश्चयात्मकं ज्ञानमङ्गीकरोति। एतन्मतसमर्थका हेमचन्द्र-अकलङ्कादयो वर्तन्ते।

१. धर्मोत्तरविरचिता न्यायबिन्दुटीका पृ० (२२६)

अवग्रहोऽपि भेदद्वात्मको मन्यते—१. व्यञ्जनावग्रहस्तथा २. अर्थावग्रहः।[1] पदार्थेण सहेन्द्रियसम्बन्धे सति पदार्थस्य ज्ञानात् पूर्वं तस्य यदाभासो जायते-स एवं व्यञ्जनावग्रहो वर्तते। अर्थावग्रहे पदार्थस्य ग्रहणं भवति यत् किञ्चद् अस्ति। चक्षुर्मनोऽप्राप्यकारित्वात् तत्र व्यञ्जनावग्रहो नैवोत्पद्यते। केवलमर्थाग्रह एव भवति। शेषै इन्द्रियाणां प्रत्यक्षत्वे उभावप्यवग्रहौ जायेते।

विद्यानन्देनाऽवग्रह इन्द्रियार्थयो योगे सति वस्तुमात्रत्वस्य ग्रहणान्ते वस्तुभेदस्य ग्राहकः प्रतिपादितो वर्तते।[2] जैननैयायिकैरागमिकधारासु प्रतिपादितस्य अवग्रहस्य सामान्यग्रहणार्थम् अग्रे न कृत्वा तन्निश्चयात्मक-स्वरूपत्वेनोपस्थापितम्। एतस्य मुख्यं कारणं प्रमाणशास्त्रे निश्चयात्मकं ज्ञानमेव प्रमाणपदवाच्यत्वेन स्थितमतिष्ठत्।

ईहा—अवगृहीतार्थस्य विषये विशेषज्ञानाभिलाषैव ईहा कथ्यते।[3] यथा निद्रायां कस्यचित् सुप्तस्य निरन्तरं सम्बोधने सति तस्य ध्वनिना सम्पर्के सति च ध्वनिरयमिति, अनेन रूपेण ग्रहणन्तु अवग्रहोऽस्ति। किन्तु यदा तस्य ज्ञानमिदमुपद्यते तर्हि ध्वनिरयं कस्येति, पुरुषस्य, नार्यो वाद्ययन्त्रस्य वा अतो नाश्रीयत इदं यदाऽयं ध्वनिरस्य वर्तते तदिदमेव ईहेत्युच्यते। संशय-ज्ञानपूर्विकेहा, संशयरूपत्वं न। संशयज्ञान-निश्चयात्मकत्वाभावात्, परन्तु ईहायां निर्णयपरकं ज्ञानमापद्यते।

३. अवायः—

ईहितार्थविशेषस्य निर्णयोऽवायो विद्यते। यथा शब्दमाकर्ण्य इयमीहाऽभवत् यच्छब्दोऽयं पुरुषस्य स्यात्। अवायेदं निश्चीयते यदयं

---

१. नन्दीसूत्रम् २६

२. अक्षार्थ-योगजाद् वस्तुमात्रग्रहणलक्षणात्

३. अवायो विनिश्चयः ल० ५२ तस्ययैवनिर्णयोऽवायः।

विशेषाकांक्षेहा-लघीयस्त्रये, ५

४. अवग्रहेहाऽवायधारणा ज्ञातुं नन्दीसूत्रेषु प्रदत्तमुदाहरणं द्रष्टव्यम्। नन्दीसूत्रे ३५,१- प्रतिबोधकदृष्टान्तः श्मल्लके दृष्टान्तः। इतिह विशेष निर्णयोऽवायः प्रमाणनयतत्वालोके २.९

(बौ० प्र० मी० की जै.दृ.से.स.) पृ. (१४२)

शब्दः कस्यचित् पुरुषस्यैव वर्तते। संक्षेपेण यदि प्रोच्यते तर्हि अवाय एव प्रत्यक्षप्रक्रियायां पूर्णनिर्णयात्मकमपि वक्तुं शक्यते, तथेदमेव प्रमाणस्य वास्तविकं स्वरूपं यत् हेयोपादेयताया ज्ञानं कारयति। अस्यावायशब्दस्य कृते उपायशब्दोऽपि प्रयुज्यते।

४. धारणा—

जिनभद्रेण अवायज्ञानस्य अविच्युतिरेव धारणा प्रोक्ता।[१] अकलङ्केन विद्यानन्देन च स्मृतिहेतुरेव धारणा मता।[२] परन्तु वादिदेवसूरी इत्यनेन धारणा साक्षात् हेतुर्नास्तीति स्वीकृतम् अस्ति। तथा सा धारणा पारम्परिको हेतुर्विद्यते।[३] तन्मतानुसारं यदाऽवायो दृढतमं हेतुं धारयति तदेव धारणा मन्यते।[४] हेमचन्द्रस्य मतमिदं वर्तते यत् धारणाया सत्यामेव हेतुः शक्यो भवति। अतएव धारणा स्मृतेर्हेतुर्मन्तव्या, इदमेवोचितमिति।[५] तस्य कथनमिदं विद्यते यद् धारणाय अभावत्वे स्मृतिरूपं परोक्षज्ञानं न भवितुं शक्नोति यातोहि अवग्रहादिज्ञानत्रयन्तु (अधिकतमानि अष्टचत्वारिं-शत्क्षणानि यावत्) विद्यमानतां लभते।[६] संक्षेपेण यद्युच्यते तर्हि धारणा अवायरूपे निर्णीतस्य ज्ञानस्य संस्कारोऽस्ति, यः स्मृतेर्हेतुत्त्वमङ्गीकुरुते।

अवग्रहेहाऽवायधारणानां सांव्यवहारिकप्रत्यक्षे आवश्यकक्रमो वर्तते। किन्तु शीघ्रतापूर्वकत्वेन क्रमस्य भानं नैव जायते। यथा शताधिक-पङ्कज-पत्रच्छेदत्वे सति नैतद् ज्ञायते यत् किं पत्रं पूर्वं छिन्नमिति तथापि तेषां छेदनं क्रमश एव भवति।

---

१. अविच्चुई धारणाहोई। विशेषावश्यकं भाष्यं (१८०)

२. (क) धारणा स्मृति हेतुः लघीयस्त्रये (६)

(ख) स्मृतिहेतुः धारणा तत्त्वार्थश्लोकवार्तिकम् १.१५.४

३. स्यादवादरत्नाकरः २.१०.४

४. स एव दृढतमावस्थापन्नो धारणा (प्रमाणमयतत्त्वालोकः २.१०)

५. स्मृतिहेतुर्धारणा प्र० मी० १.१.२९

तत्त्वार्थश्लोकवार्तिकम् १.१६.४ अवग्रहादयस्तु आन्तर्मोहूतिकाः।

प्रमाणमीमांसावृतिः।

६. क्वचित् ग्रामस्यानुपलक्षणमेषामाशूत्पादात् उत्पलत्रव्यतिभेदक्रमवत्।

प्रमाणनयतत्त्वलोकः (२.१७)

वर्त्तमानयुगे दूरभाषया वार्तालापसमये अनुभूयते यत् द्वितीय एव क्षणे ध्वनिरमेरिकां गच्छति। परन्तु वैज्ञानिकदृष्ट्या स ध्वनिरपि विद्युत्तरङ्गेषु परिणतो भूत्वा क्रमेणैवामेरिकामुपयाति। किन्तु न तत्र क्रमज्ञानं शीघ्रतापूर्वक-गमनत्वात्। अतोऽनेन प्रकारेण वैदिक-बौद्ध-जैनतर्कभाषा सिद्धान्तानां प्रतिष्ठापकैः बाह्यार्थ-सत्तायाः सम्बन्धे स्व-स्व-मतं प्रतिष्ठापुरस्सरमुपस्थापितमस्ति। यत्र बाह्यार्थसत्ताविषये तिसृणां तर्कभाषाणामध्ययनस्य पश्चात् जैनतर्कभाषात्यधिकं स्पष्टा तथा स्वसिद्धान्तं प्रतिष्ठापयितुं सर्वाधिकरूपेण सक्षमतां भजते, वर्तमानयुगस्य भौतिक-व्यवस्थावादित्वात्। यत्र आध्यात्मिकमूल्यानां किञ्चिदपि विशेषौचित्यं न वर्तते। यद्यपि जैनतर्क-भाषाऽपि स्वभूतकालिकपरम्परायां भौतिकमूल्यानामपेक्षाविषये तथा आध्यात्मिकमूल्यानामपि अधिकं बलं ददाति। तथापि तर्कभाषाया अन्तर्गतेऽनेन सैव व्यवस्था उत्तमाऽभिमता या साम्प्रतिके युगे लोकव्यवहाराय योग्यत्वमेति।

एतेन वाग्जालयुक्तैः शब्दैः स्वभाषा स्वसिद्धान्तश्च नैव प्रदर्शितः, अपितु पाण्डित्यप्रदर्शनमपहाय लोक-व्यवहारप्रचलितशब्दानामेव प्रयोगो विहितः जैनतर्कभाषायाम्।

यशोविजयेन जैनतर्कभाषा त्रिषु परिच्छेदेषु विभक्ताऽस्ति तद्यथा- प्रमाणं, नयः निक्षेपश्च। यत्र यावत् प्रमाणनययोः प्रश्नो वर्तते-नास्ति दिगम्बरेश्वेताम्बरपरम्परायां कश्चन भेदः। किन्तु नैकरूपेण निक्षेपः उभाभ्यां स्वीकृतः। आभ्यां प्रमाणस्य नयस्य च प्रतिपादनं अपेक्षावाददृष्टिकोणद्वारा कृतमस्ति। एतस्येयमस्ति विशेषता यदनेनाऽगमिकतार्किकपरम्पराणां सुन्दरः समन्वयः प्रस्तुतोऽस्ति।

शास्त्रार्थयुगे प्रत्यक्षस्यापेक्षयाऽमनुमानमेव श्रेष्ठत्वं लभते स्मकारणमिदमेवास्ति यत् हेतुविद्या तर्कशास्त्रस्य मुख्यो विषयः जातः।

एतदतिरिक्तं केचन सिद्धान्तास्तेषां मौलिकत्वे प्रधानभूताः सन्ति। एतैस्तर्कभाषाया विभाजनं क्षेत्रद्वये कृतम्-

प्रथमं क्षेत्रमस्ति ज्ञानस्त यत्र जिज्ञास्यते यत् इदं वस्तु स्वरूपे कीदृशमस्ति। अत्र सापेक्षवादस्य सिद्धान्तः प्राप्तो भवति।

उदाहरणार्थं—चन्द्रमा महीयान् सन्नपि लघुत्वेन दृश्यते। न्यायादाविदं भ्रमत्वं मतमस्ति परन्तु यशोविजयस्य कथनमिदं वर्तते यत् दूरापेक्षातादृष्ट्या ध्याने स्थाप्येत तर्हि नहीदं ज्ञानं भ्रमरूपात्मकमस्ति। परिस्थितिविशेषे तदिदमेव भविष्यति। एला एवाऽपेक्षाः द्रव्यकाल-भावपदत्वेन प्रकटीक्रियते। अस्माकं केचन निर्णयाः (स्वार्थ) लक्ष्ये स्थाप्यन्ते। यथा—शत्रुमित्रादयः। यथा एक एव व्यक्तिविशेषस्य पिता पुत्र भ्राता च भवति। न्यायदर्शनं ज्ञानं वस्तुलक्षिय मन्यते।

अपरस्मिन् अद्वैतवादिपरम्पराया इदम् आत्मलक्षियपदत्वेनाङ्गीक्रियत इत्युपलभ्यते। तथापि यशोविजयेन प्रत्येकं ज्ञाने (स्वत्वं) (परत्वञ्च) उभयमपि स्वीकृतमस्ति। तस्य कथनमिदमस्ति यत् यदा पर्यन्तं (स्वत्वं) (परत्वञ्च) उभयमपि सहैव च चलतः न तावत् ज्ञानस्य प्रामाणिकता जायते।

एतद्द्वितीयः प्रतिपाद्यो (नयो) वर्तते[1]

नयस्य मुख्यः सम्बन्धो व्यवहारेण भवति। अर्थात् एकमेव वस्तु स्वार्थमाधारीकृत्य विभिन्नदृष्टिभिरवलोक्यते। एको हि व्यक्तिविशेषः मनुष्य-ब्राह्मण-देवदत्त-अध्यापकादि-शब्दैः व्यपदिश्यते। एतस्य चनय-स्याऽधारस्तात्कालिकः स्वार्थोऽस्ति। यतोहि प्राणिशास्त्रे मनुष्यगणना-समये पुरुषः, जातिगणनाकाले ब्राह्मणस्तथा व्यवसायगणनयाऽध्यापकश्च मन्यते। अपेक्षा-वादस्यं सिद्धान्तमाधारीकृत्य सत्यं हीदं सर्वमस्ति। काव्यशास्त्रे शब्दस्य अभिधातिरिक्तं लक्षणाव्यञ्जना-नामक-शक्तिरपि स्वीकृता वर्तते। अस्माभि-रुच्यते यदियमुकव्यक्तिरस्ति। उक्तिरियं नास्ति असत्येति। अत्रार्थोऽयं वर्तते वृषभस्य बुद्धिहीनो मूर्खोऽथवा।

यशोविजयेनेदमङ्गीकृतं यदिदमन्तर्भूतमस्ति नैगमनये। अनेन प्रकारेण सामान्यग्राहि विशेषग्राहीन्द्रियाणि नयरूपत्वे विभाजितानि वर्तन्ते।

तृतीयं तत्त्वं निक्षेपोऽस्ति[2]—नयो न्यूनाधिकमात्रायामर्थस्यापेक्षां

---

१. *जैनतर्कभाषा हिन्दी टीका पृष्ठ ७*

२. *तर्कभाषा पृ० (६)*

स्थापयति। परन्तु बहूनि स्थलानि एतादृशानि अपि मन्यन्ते, यत्र व्यवहारेण सह अर्थस्य कश्चिदपि सम्बन्धो नैव तिष्ठति।

उदाहरणम्—एतद्व्यक्तेर्नाम वाचस्पतिरस्माभिः स्वीक्रियते। यो मूर्खत्वं सर्वथा लभते। अत्र प्रश्नोऽयं समुदेति यत् तद्वाचस्पतिवाच्यत्वमसत्यं भाषणं वर्तते। प्रस्तरमूर्तयो दुर्गासरस्वतीत्यादिपदेन देवीदेवतानां नामानि कथ्यन्ते। शतरञ्जाख्याणां मुद्राणां हस्ति-तुरग-मन्त्रिपदम् अभिधीयते। एतदेव दृष्टिगतं कारयितुं कर्तुं वा तेन निक्षेपस्य सिद्धान्त उपस्थापितः। शब्दोऽयं क्षिप् धातोः निष्पद्यते। यस्यार्थः क्षेपणं भवति। अर्थालोचनं विनैव शब्दस्य वस्तुनि क्षेपणं निक्षेपत्वमित्यङ्गीक्रियते।

अतोऽत्रवलोक्यते यत् नये व्यवहारस्य प्रधानता तिष्ठति। या न्यूनाधिकमात्रायामर्थलक्ष्यिपदाख्या मन्यते। परन्तु निक्षेपे अर्थस्य ध्यानं नैव स्थाप्यते। तृतीयो द्रव्यनिक्षेपभूताम् अथवा भावि-अवस्थामवाप्य चलति। एवं सत्त्वेऽपि चतुर्थभावनिक्षेपो वास्तविकतामादाय प्रचलितो भवति। यशोविजयस्याऽयं सिद्धान्तोऽपि निक्षेपस्य मौलिकरूपेण प्रदानभूतोऽवगम्यते। अत्र ज्ञानप्रतिपादनकाले पूर्व नाम-स्थानपना-द्रव्याणां रूपेऽस्य विवेचनं प्रस्तूयते, पुनर्भावज्ञानरूपत्वेन वास्तविकवस्तुनः। अतोऽनेन प्रकारेण निक्षेपस्य तर्कशास्त्रे सम्मेलनकरणं तस्य मौलिकं प्रदानमस्ति। इदानीमिदमवलोकनीयमस्ति यत् जैनतर्कभाषा कैश्चित् कारणैः वैदिकतर्कभाषायाः बौद्धतर्कभाषाया विशिष्टाऽभिमता। एतत्कृते सर्वप्रथमं प्रमाणवादस्य सिद्धान्तः प्रस्तोष्यते तर्कभाषात्रयमाधारीकृत्य।

वैदिकतर्कभाषाया[1] दृष्टिकोणेन प्रमाणस्य स्वरूपं तथा भेदः- प्रमाणशब्दस्य व्याख्यामाश्रित्य भारतीयदर्शनशास्त्रेषु बहवः सिद्धान्ता दरीदृश्यन्ते। एतेषा व्युत्पत्तिर्द्विप्रकारिका मन्यते। (१) "प्रमीयतेऽनेनेति प्रमाणम्।" श्रीकेशवमिश्रेण प्रमाणस्य परिभाषाऽनेन प्रकारेणोक्ता- प्रमाकरणं प्रमाणम्। यथार्थानुभवः प्रमा, स्मृतिभिन्नं ज्ञानमनुभवः, संस्कारजन्यं ज्ञान स्मृतिः-आशयोऽयमस्ति यत् प्रमायाः साधनं प्रमाणपदेन

१. *वैदिकतर्कभाषा पृ० १८ ले० डा० श्रीनिवासशास्त्री स.भू. (२ तर्कसंग्रहः)*

कथ्यते। प्रमा यथार्थानुभवः। साम्प्रतं प्रश्नोऽयमुदेति यत् का नाम स्मृतिः? अतोऽत्र समाधानमुपस्थाप्यते संस्कारजन्यं ज्ञानं स्मृतिरुच्यते।

केशवमिश्रेण स्मृतिरनेन प्रकारेण परिभाषिता। "ज्ञातमात्र-विषयकं ज्ञानं स्मृतिः[१]" तथा चैतस्य भेदत्वेन सादृश्य-अदृष्ट-चिन्तादयः प्रकल्पिताः।

स्मृतेः स्वरूपं-यदा कस्यचिद्वस्तुनः प्रत्यक्षत्वेन अनुभवो लभ्यते। एतदनन्तरं सूक्ष्मभाव एक आत्मनि वस्तुविषये अवशिष्यते, स एव भावनामकसंस्कारो भवति अथवा केवलं संस्कारत्वपदमेवालङ्कुरुते। एतदेव स्मृतेर्बीजमस्ति। संस्कारोऽयं यदा सादृश्यचिन्ताऽदृष्टादीनां कारणैरुद्बुद्धो जायते तर्हि स्मृतिरुत्पद्यते। यथा अस्माभिः पूर्वं किञ्चित् वस्तु विलोकितं, तदनन्तरं तत्सादृश्यं वस्तु यदि दृश्यते, तस्मिन् काले त्वरितमेव पूर्वदृष्ट-वस्तुनः स्मरणं भवति। इदमेव सादृश्यमुच्यते।

चिन्ता—कस्मिंश्चित् समये किमपि विचार्य्यते, तदेव चिन्ताऽथवा चिन्तनमित्युच्यते, तदापि पूर्वज्ञातवस्तुनः स्मृतिर्जायत एव।

अदृष्टः—अनेन प्रकारेण अदृष्टः (धर्माऽधर्मवशादपि) कस्यचित् पूर्वज्ञात-वस्तुनः स्मृतिरुत्पद्यते। न्यायस्य परिष्कृतपदावल्यामस्माभिः प्रमेयमुच्यते यत्—"तद्वति तत्प्रकारकोऽनुभवो यथार्थः।" उदाहरणं—यथा घटोऽयमस्ति अस्मिन् ज्ञाने "घटत्वप्रकारकत्वं" विशेषणं वर्तते। अतो ज्ञानमिदं घटत्वप्रकारकं मन्यते। अस्य ज्ञानस्य विषयो घटो विद्यते। अर्थात् ज्ञानं घटे संतिष्ठते। तस्मिन्नपि घटे घटत्वं विद्यमानतामेति। अतोऽत्र तद्वति। घटत्ववति, घटत्वेन युक्ते तत्प्रकारकं घटत्वमस्ति। प्रकारः अर्थात् विशेषणं यत्र ज्ञानमिदं जायमानं स्यात्। अतएव अयमस्ति यथार्थः। 'प्रमायाः करणं प्रमाणमित्यभिधीयते' केशवमिश्रेण स्वतर्कभाषायामिदं लक्षणं स्वीकृतमिति दृश्यते। प्रमाया अर्थस्तु मया ज्ञापित एवास्ति इदानीं प्रश्नोऽयं समुदेति यत् करणं किं? करणशब्दस्यैका प्रसिद्धा परिभाषा वर्तते—'व्यापारवद् असाधारणं कारणं करणं'। व्यापारयुक्तत्वावच्छिन्नम् असाधारणं कारणं करणमित्युच्यते। अर्थात् यत्कारणं कार्यकारण-

१. समीक्षात्मकभूमिकाभाषानुवादव्याख्यात्मकटिप्पणी। वैदिकतर्कभाषा पृ. १६

निमित्तत्वात् उत्पन्नतामुपगच्छति। तदव्यापारवद् असाधारणं कारणं करणं प्रोच्यते तथा इदमेवासाधारणं कारणं करणमिति कथ्यते।

करणस्य लक्षणम्—'यस्य कार्यात् पूर्वभावो नियतः अन्यथासिद्धश्च' लक्षणेऽस्मिन् यस्य कार्यात् पूर्वभावः यस्य कार्यात् पूर्वं सत्तात्वं स्यात् मिदमुक्तवा कारणात् कार्यं भिन्नमभिमतं वर्तते। कारणे कार्यस्य पूर्वाभाविमतत्वात्।

उदाहरणम्—पटत्वमेकं कार्यत्वं विद्यते तत् कारणत्वेन तन्तुरस्ति। पटात् पूर्वमिदं विद्यमानं भवति। अनेन प्रकारेण कारणं पूर्वभावि कार्यञ्च पश्चाद् भावि व्यपदिष्टम्। कारणलक्षणं (नियतं) तथा (अन्यथासिद्धम्) इति भेद्वयमङ्गीकृतमस्ति। यस्मादतिव्याप्तिर्दोषो नोत्पद्यते।

अतएव वैदिकतर्कभाषाद्वारा प्रमाणसिद्धरनन्तरं सम्प्रति प्रमाणस्य भेदाः ये स्वीकृतास्ते ज्ञाप्यमानाः वर्तन्ते। प्रमाणस्य चत्वारो भेदा उपलभ्यन्ते—१. प्रत्यक्षम्, २. अनुमानम्, ३. उपमानम्, ४. शब्दश्चेति।

१. प्रत्यक्षम्—इत्यस्य शब्दस्य व्युत्पत्तिरस्ति प्रतिगतम् अक्षम् (न्या. वृ.) अर्थात् विषयं प्रतिगतम् अक्षं (गतिसमासविषयेन) सन्निकृष्टमिन्द्रियम्। इदं प्रमाणमेव प्रत्यक्षनामकं प्राधान्यरूपत्वेनाभिमतं विद्यते। प्रत्यक्षप्रमायाः त्रिप्रकारकाणि करणानि सन्ति। तानि यथा १. इन्द्रियम् २. इन्द्रियार्था सन्निकर्षः ३. ज्ञानश्चेति। निर्विकल्पकप्रत्यक्षसत्त्वे इन्द्रियकरणता। अर्थात् यदाऽत्मनो मनसा सह संयोगो जायते। मनस इन्द्रयेण, तदा ज्ञानोत्पत्तिर्दृश्यते।

अतोऽनेन प्रकारेण प्रत्यक्षमपि निर्विकल्पकं सविकल्पकञ्चेति भेदद्वयेन स्वीकृतमस्ति।

निर्विकल्पक-प्रत्यक्षे वस्तुनः स्वरूपस्य आभासो जायते (किञ्चित् इदम्)। सविकल्पकं ज्ञानं विशेषण-विशेष्यसम्बन्धं स्थापयति, नाम-जाति-योजना-विशेषण-विशिष्टत्वात् सविकल्पकज्ञानस्य। अत्र आदि-पदेन गुणाः क्रिया च विवक्षिते स्तः। ब्राह्मणोऽयम् इत्यस्मिन् ब्राह्मणत्व-जातिपदत्वेन विशिष्टव्यक्तेः प्रतीतिर्भवति।

प्रत्यक्षस्य स्वरूपप्रतिपादनान्तरं साम्प्रतम् अनुमानस्य विषये

विवरणं प्रस्तूयते। श्रीकेशवमिश्रेण तर्कभाषायामनुमानशब्दस्य व्युत्पत्तिरेभिः शब्दैः प्रदर्श्यते-(येन हि अनुमीयते तद् अनुमानम्)। यत्र अनुमीयते इत्यस्य अर्थः अनुमितिरिति कल्प्यते। अतोऽनुमानप्रमाणस्य फलमनुमतिर्विद्यते। तत्फलं येन प्रमाणेन सम्पन्नं क्रियेत तदनुमान-मित्युच्यते।

लिङ्गपरामर्शेणैवानुमितिः जायते। अतो लिङ्गपरामर्शौ एव अनुमान-पदेन प्रदर्शितौ। अनुमितेः साधकमित्यभिधीयते। व्याप्तिबलेन अर्थ-बोधकमित्यभिधीयते। व्याप्तिबलेन अर्थबोधकारयितृत्वेन लिङ्गमुच्यते।

यथा-धूमोऽग्निरित्यस्य लिङ्गमस्ति। साहचर्यनियमत्वात् यत्र-यत्र धूमस्तत्र वह्निः। अयं साहचर्यनियमो व्याप्तिरिति। अयमेव अविना-भावसम्बन्धोऽपि कथ्यते। लिङ्गस्य तृतीयं ज्ञानं परामर्शत्वेनाभिधीयते। यथा महानसे भूयो भूयो धूमस्य अग्नेश्च साहचर्यत्वात् व्याप्तिर्निश्चीयते। इदमेव प्रथमं लिङ्गदर्शनं वर्तते। पर्वतादौ धूमदर्शनं द्वितीयं लिङ्गदर्शनमस्ति। एतदनन्तरं स्मर्य्यते यत् धूमस्य अग्नेश्च व्याप्तिरिस्ति। तदा पुनः पर्वतादौ तृतीयं लिङ्गज्ञानं मन्यते यत् अग्निना व्याप्तधूमः पर्वतेऽस्ति, इदं तृतीय-लिङ्गज्ञानं लिङ्गपरामर्शपदेनेपकल्प्यते।

अनुमानस्य द्वौ भेदौ मन्यते—१. स्वार्थानुमानं तथा २. परार्थानु-मानम्।

१. स्वार्थानुमानम्—स्वज्ञाननिमित्तं यदस्ति अनुमानं तत् स्वार्थानुमानं कथ्यते। यथा कश्चन पुरुषः धूमाग्नयोः साहचर्यत्वमव-लोक्यापि व्याप्तिनिश्चयं विधायापि च पर्वतमुपगम्य तत्स्थिताग्निविषये शङ्कते तथा धूमरेखामूर्ध्वं गच्छन्तीं दृष्ट्वा पर्वतादौ पश्यति, तदा धूमदर्शनेन तस्य व्याप्ति-विषयक-संस्कार उद्बुद्धौ जायते, ततश्च धूमाग्नयोर्व्याप्तेः स्मरणं कुरुते। तत् पश्चात् अत्र पर्वतेऽपिं धूमो वर्तते। अनेन प्रकारेण परामर्शः कर्तृत्वमङ्गीकरोति।

अतः स स्वयमेव ज्ञानं लभते यत् पर्वतादावग्निरस्ति पर्वतात् निर्गच्छत् धूमदर्शनेन व्याप्तिसिद्धत्वात्।

२. परार्थानुमानम्—यदा कश्चित् स्वयमेव धूमेन वह्नेरनुमानं प्राप्य पुनर्यदा तेनाऽन्यस्य बोधं कारयितुं वाञ्छति, तदा तत् पञ्चावयवानुमानवाक्यस्य प्रयोगं कारयते। तत्परार्थानुमानपदवाच्यत्वेन मन्यते।

इमे पञ्चावयवा सन्ति १. प्रतिज्ञा, २. हेतुः, ३. उदाहरणम्, ४. उपनयस्तथा, ५. निगमनम्।

उदाहरणम्, **प्रतिज्ञा**-पर्वतोऽयमग्निमानस्ति। **हेतुः**-धूमवत्वात्। **उदाहरणं** यो धूमवान् भवति स अग्निमानपि मन्यते यथा महानसः। **उपनयः**-अयं पर्वतोऽपि वह्निव्याप्यधूमवान् विद्यते। **निगमनम्**-अतोऽयं पर्वतोऽग्निमान् वर्तते।

अतः पञ्चरूपयुक्तहेतुत्वेन अपरोऽपि पुरुषः वह्नेरनुमानं कुरुते यद्धि परार्थानुमानमित्युच्यते।

बौद्धतर्कभाषायां प्रमाणस्य स्वरूपं भेदश्च—प्रमाणं सम्यग्ज्ञानपूर्वगोचरम्। प्रमीयतेऽर्थोऽनेनेति प्रमाणम्। तदेव सम्यग्ज्ञानं सन्देह-विपर्यासदोषरहितत्वात्। लोकेऽविसंवादि ज्ञानं सम्यग् ज्ञानमित्यभिधीयते। न स संशय-विपर्यासज्ञानयोरविसंवादकत्वमस्ति। यथा स्थाणुर्वा पुरुषो वा वेति ज्ञानस्य, मरीचिकासु वा जलज्ञानस्य। अपूर्वो गोचरो यस्येत्यपूर्वगोचरम्। गोचरो विषयो घटादिः तस्मादुत्पन्नं तदर्थप्रापणयोग्यं ज्ञानं प्रमाणम्।

अपूर्वविषयक-सम्यग्ज्ञानम् अर्थात् यथार्थज्ञानं यस्य विषयात् पूर्वं ज्ञानं नो भवेत्, तत् प्रमाणमभिधीयते। अर्थात् येन बलेन कश्चिद् विषयोऽभिज्ञातः स्यात् यस्मिन् ज्ञाने अविसंवादकतोपपद्येत अर्थात् विषयसङ्गतापद्येत तथा यत् सन्देहविपर्यासदोषरहितं स्यात्। यस्य गोचरो (घटादिविषयोऽपूर्वः स्यात्) तेन विषयेण समुत्पन्नमेवं तदर्थं प्राप्तं कर्तुं योग्यज्ञानं (प्रमाणम्) अस्ति।

बौद्धतर्कभाषायामपि प्रमाणस्य द्वौ भेदौ स्वीक्रियेत—१. प्रत्यक्षं तथा २. अनुमानमिति।

१. प्रत्यक्षम्—अक्षसम्बन्धिज्ञानं प्रत्यक्षत्वेन उपवर्ण्यते। अक्षस्य तात्पर्यमिन्द्रयत्वमिति। यस्य चक्षुः श्रोत्रघ्राणजिह्वाकायादीनि नामानि

वर्तन्ते। एतदुत्पन्नं ज्ञानं प्रत्यक्षमुच्यते। परन्तु एवं सति केवलमिन्द्रिय-सम्बन्द्धं ज्ञानमेव प्रत्यक्षं कथयिष्यते यस्मात् कारणान्मानसिकं ज्ञानं यदिन्द्रियजन्यं न मन्यते तत् प्रत्यक्षत्वेन न व्यवह्रियते।

इयं परिभाषा प्रत्यक्षशब्दस्य व्युत्पत्तिमवलम्व्य वर्तते। परन्तु बौद्धतर्कभाषायाः मुख्यमुद्देश्यं ध्येयं वा स्वसंवेदनरूपार्थस्य साक्षात्कार-करणं प्रत्यक्षमुच्यते-यथा पङ्कजशब्दस्यार्थोऽपि प्रयुज्यते। अनेन प्रत्यक्षस्य चत्वारो भेदा अङ्गीकृताः सन्ति। यथा—१. इन्द्रियज्ञानं, २. मानसप्रत्यक्षं, ३. स्वसंवेदनम् एवञ्च, ४. योगिज्ञानम्।

१. इन्द्रियज्ञानम्—ज्ञानमिदमुत्पद्यत इन्द्रियद्वारा। यच्चक्षुः-श्रौत्रघ्राण-जिह्वादिभिरुत्पन्नं भवति।

चक्षुर्विज्ञानस्य विषयो रूपं भवति।
श्रोत्रविज्ञानस्य विषयः शब्दो वर्तते।
घ्राणविज्ञानस्य विषयो गन्धोऽस्ति।
जिह्वाविज्ञानस्य विषयो रसो मन्यते।
त्वग्विज्ञानस्य विषयः स्पर्शो विद्यते।

इन्द्रियसाधारणकारणत्वात् ज्ञानानीमानि इन्द्रियप्रत्यक्षत्वेनोच्यन्ते। यथा भेर्यादिजनितः शब्दो भेरीशब्दपदेन तथा यवादुत्पन्नोऽङ्कुरो यवाङ्कुरो मन्यतेऽभिधीयते वा।

२. मानसप्रत्यक्षम्—मनोजन्यं ज्ञानं मानसप्रत्यक्षपदमलङ्कुरुते। ज्ञानसन्ताने इन्द्रियज्ञानान्ते मानसप्रत्यक्षमङ्गीकृतम् अस्ति। नास्ति हि मानसप्रत्यक्षातिरिक्तं किञ्चिद् वस्तुत्वमिति। अपितु इन्द्रियज्ञानस्यैव विषयोऽस्ति। आन्तर्यं केवलमिदमेव वर्तते यन्मानसप्रत्यक्षेण आभ्यन्तर-सत्तायाः प्रत्यक्षमुत्पद्यते तथा इन्द्रियप्रत्यक्षेण बाह्यसत्तायाः प्रत्यक्षं भवति।

३. स्वसंवेदनप्रत्यक्षम्—बाह्यविषयाणां ज्ञानन्तु इन्द्रियप्रत्यक्ष-माधारीकृत्य जायते, परन्तु चित्तस्य चैतसिकधर्मस्यैव उदाहरणम्, सुखदुःखादिज्ञानं कस्मिंश्चित् अन्यस्मिन् कारणे आधारितं न भवति। चैतसिकधर्माणां वेदना स्वत एवोपपद्यते। अतएव स्वसंविदितानि मतानि सन्ति। चैतसिकवेदना परम्पराया नापितु साक्षात् जायते। अतएवेदं स्वसंवेदनमस्ति।

४. **योगिप्रत्यक्षम्**—योगिनां जगत्-सत्ता विषयिकाऽनुभूतिर्योगि-प्रत्यक्षमुच्यते। साक्षादत्यन्तस्पष्टवात् योगिनां ज्ञानं प्रत्यक्षपदेन कथ्यते।

प्रमाणस्याऽन्यो भेदोऽनुमानमित्युच्यते सम्यग् ज्ञानमुत्पादयितुमन्यत्प्रमाणमनुमानमस्ति। हेतुज्ञानस्य हेतुसाध्यस्य सम्बन्धस्मरणात् पर्वतादौ वह्नेः यत् वस्तुन अग्न्यादिसम्बन्धे जायमानं ज्ञानमस्ति, तदेव अनुमानं वर्तते। अनेनापि अनुमानस्य भेदद्वयमङ्गीकृतं वर्तते यथा १. स्वार्थानुमानं तथा २. परार्थानुमानञ्च।

१. **स्वार्थानुमानम्**—यदनुमानं स्वार्थे जायते, तदेव स्वार्थानुमानत्यिभिधीयते। ज्ञानरूपमिदं मतम्। यथा पर्वतादौ पक्षे धूमहेतुं दृष्ट्वा द्रष्टुर्यदा साध्यादेर्ज्ञानमुत्पद्यते। एतज्ज्ञानद्वारा परोक्षार्थस्य प्रतिपत्तिः केवलं द्रष्टुरेव। अन्यस्य ज्ञानेनैतेन परोक्षार्थस्य प्रतीतिः न भवति। अतएवानुमानमिदं स्वार्थानुमानमित्युच्यते।

२. **परार्थानुमानम्**—यदनुमानमन्यस्य कृते समुपजायते, तत् परार्थानुमानं कथ्यते। परार्थानुमानं वचनात्मकं। त्रिषु रूपेषु लिङ्गस्य प्रतिपादयितृत्वेन वचनेन अन्यस्यापि अर्थस्य प्रतिपादन-कर्ताऽस्ति तथा ज्ञानं च कारयति। इदं मत्वैव वचनमनुमानत्वेन सम्बोध्यते। अनुमानमिदं शब्दस्य लाक्षणिकस्तथा गौणप्रयोगो वर्तते। यथा धृतमेवायुरस्ति। आदिवाक्यम् आयुवर्धके धृते आयुःशब्दस्य प्रयोगो विधीयते।

जैनतर्कभाषाया दृष्टिकोणेन प्रमाणभेदस्तस्य स्वरूपञ्च—

'स्वपरव्यवसायि ज्ञानं प्रमाणम्' अर्थात् स्वं परञ्च निश्चयात्मकरूपेण जायमानं ज्ञानं प्रमाणमित्युच्यते। एतस्य तात्पर्यमिदं, यत् येन ज्ञानं तथाऽन्यस्य घटपटादिपदार्थानां स्वरूपं सम्यक् प्रकारेण निश्चीयते अथवा सम्यक् प्रकारेण ज्ञायते तदेव प्रमाणमिति मन्यते।

अनेन प्रकारेण वैदिकतर्कभाषायां बौद्धतर्कभाषायाञ्च प्रमाणस्य यत् स्वरूपं प्रदर्शितमस्ति-तदपेक्षया अधिकं श्रेयस्करं जैनतर्कभाषायां प्रमाणस्वरूपं प्रदर्शितं वर्तते।

यतोहि यशोविजयेन यत्प्रमाणस्वरूपमुपस्थापितं प्रदत्तं वा तत्

'स्वपर-व्यवसायि ज्ञानं प्रमाणम्' अत्र (स्वस्य) अर्थः यथा यशोविजयेन आत्मा कृतः, तथैव स्वस्य अर्थः स्वकीयोऽपि वर्तते। वर्तमानसमये प्रचिलतत्वात्। यथा स्ववित्तपोषी, तत्र स्वस्यार्थः स्वकीय एव मन्यते। न तु आत्मेति अर्थात् व्यक्तेः स्वकीयं यज्ज्ञानं भवति तदेव स्वपदेनोच्यते अर्थात् 'स्वानुभूतज्ञान' मिति कथ्यते। परन्तु यदा तत् स्वानुभूतज्ञानं कश्चिदन्यं बोधयितुमभिलषति तदा तत् स्वानुभूतज्ञानस्य परेण सह व्यवसायं करोति। अर्थात् स्वानुभूतपरव्यवसायात्मकं ज्ञानमेव प्रमाणम्। यशोविजयेन जैनतर्कभाषायां यत् प्रमाणस्य लक्षणं प्रदर्शितं तस्य महत्तायाः कारणमिदमस्ति यत् लोकप्रचलितानां शब्दानां तेन अल्पप्रयत्नेन दिग्दर्शितं कारयितुं प्रयत्नो विहितः। व्यवसायशब्दसर्वज्ञानविषयत्वात् यथा विदुषाऽपि ज्ञायते तथैव मूर्खेणैवाप्यवगम्यते। तथा च ते तस्य व्यवहारवाचकशब्दस्य प्रयोगमपि कुर्वन्ति।

अनेन लक्षणेन स्थाणुर्वा पुरुषो वेति तादृशं सन्देहात्मकं ज्ञानमपि न जायते। तथा च नैव मरुमरीचिकाभूमौ जलज्ञानस्य विपर्ययज्ञान-मेवोत्पद्यते। संशय-विपर्यय-अनध्यवसायातिव्याप्ति-निवारणार्थमेव तेन व्यवसायिपदं प्रयुक्तम् अर्थात् अत्र परस्य स्वस्य शब्दस्य प्रयोगं कृत्वा असौ प्रयत्नमिममकरोत् ज्ञापयितुं यत् ज्ञानं न तु ज्ञातं भवति न चैव अज्ञातमेव। अर्थात् तत् प्राप्त्यर्थमन्यस्य साहाय्यं न लभ्यते अर्थात् आवश्यकतैव नानुभूयते। ज्ञानं स्वयमेव ज्ञातुं स्वं प्रवर्तते।

अतएव परशब्दस्य प्रयोग एतदर्थे कृतोऽस्ति यत् स्वानुभूतं तावन्न प्रजायते, प्रमाणितं यावत् तत् परस्य अर्थात् घटपटादिपदार्थानां कृते प्रमाणं नोत्थापयेत्।

जैनतर्कभाषाया दृष्टिकोणेन प्रमाणभेदः—

जैन-तर्कभाषायामपि प्रमाणानां द्वौ भेदौ स्वीकृतौ वर्तेते। १. प्रत्यक्षम् २. परोक्षम्। अक्षशब्दस्य अर्थद्वयं भवति। इन्द्रियम् आत्मा च। अतएव यज्ज्ञानम् अक्षाश्रितं विद्यते, तत्प्रत्यक्षमित्यभिधीयते। यस्मिन् ज्ञाने स्पष्टता पतति तत्प्रत्यक्षं तथा अक्षभिन्नं यज्ज्ञानमुपद्यते ज्ञानेऽस्पष्टतोपपद्यते तत् परोक्षमित्यभिधीयते। अतोऽनेनेदं सिद्धयति यत् (अक्षस्य)

तात्पर्यमिन्द्रियं तथा आत्मा वर्तते तर्हि स उदाहरणत्वस्वरूपेणेदं प्रकारेण प्रस्तूयमानोऽस्ति। अक्षस्य अर्थो नेत्रं भवति। अनेन प्रकारेण प्रत्यक्षस्यापि अर्थो नेत्रयोः सामक्ष्यमेव दर्शयितुं शक्यते।

यथा–घटो दृश्यते तदा ज्ञानं जायते यदयं घटो विद्यते। यदा नेत्राभ्यां घटस्वरूपस्य दिग्दर्शनं क्रियते यदयं मृत्तिकया निर्मितोऽस्ति एतस्य स्वरूपं घटाकारकं वर्तते अतोऽयं .नूनमेव घटोऽस्ति। नान्यत् वस्तु। अतः प्रत्यक्षस्येदं स्वरूपं सर्वैरपि अङ्गीक्रियते सामान्यविशेषपुरुषैः। यशोविजयेन प्रत्यक्षस्य स्वरूपस्यास्य भेदद्वयं स्वीकृतमस्ति—

१. सांव्यवहारिकं प्रत्यक्षम्—अर्थात् यस्मिन् व्यवहारे समानत्वेन व्यवहारः सम्मिलितो भवति स संव्यवहारः कथ्यते। तद्व्यवहार-माधारीकृत्य यस्य प्रत्यक्षस्य सिद्धिर्भवेत्। तत् सांव्यावहारिकं प्रत्यक्ष-मित्युच्यते।

आशयोऽयमस्ति यत् यत्प्रत्यक्षमाश्रित्य समुचितोऽपि व्यवहारो विधीयते, तत्सांव्यवहारिकं प्रत्यक्षं प्रोच्यते। तथा

२. पारमार्थिकं प्रत्यक्षम्—अर्थात् परमस्य महतोऽर्थस्य सिद्धिर्येन प्रत्यक्षेणोपजायते तत्पारमार्थिकं प्रत्यक्षं विद्यते कथ्यते वा।

एतस्य तात्पर्यमिदमस्ति यत् व्यवहारिकं जगत् संव्यवहारमाश्रित्य स्थितिमास्ते। तथा यत्र सांव्यवहारिकजगतो दूरं कस्यचिन्महतोऽर्थस्य सिद्धिर्येन, प्रत्यक्षेणोत्पन्ना भवति, तदेव पारमार्थिकं प्रत्यक्षमित्य-भिधानतामेति। अनेन प्रकारेणावलोक्यते यत् प्रत्यक्षं व्यवसायात्मकं भवति स्वार्थस्य निश्चियत्वात्। मोक्षाकरगुप्तेनापि मानसप्रत्यक्षेण व्यवसायात्मकत्वेन भवितव्यमिति स्वीकृतम्। भवति हि मानसेन्द्रिय-प्रत्यक्षमध्ये आन्तरत्वमुत्पन्नमिति। तथा इन्द्रिय-प्रत्यक्षद्वारा गृहीतं कारणमङ्गीकुरुते। कारणानेनेदं प्रत्यक्षं मन्तुं शक्यते।

वैदिकबौद्धतर्कभाषाभ्यां प्रदत्तप्रत्यक्षादेः खण्डनम्—

बौद्धतर्कभाषायां स्वसंवेदनम् अर्थात् निर्विकल्पकं ज्ञानं प्रत्यक्षस्वरूपमभिमतमस्ति।

परन्तु निर्विकल्परहितस्य स्थिरचित्तस्य पुरुषस्याऽपि चक्षुषा

स्थूलकारकं वस्तु दृष्टिगोचरं भवत्येव स्वलक्षणं वस्तु नैव दृश्यते। अतः प्रत्यक्षस्य स्वरूपं नैव निर्विकल्पकं भवितुमर्हतीति। यतोहि सर्वतश्चित्तस्य संहारे सत्यपि पुरुषस्य चक्षुषा रूपस्य स्वस्य च व्यवसायः स्पष्टो भवति। चित्तविकल्परहितावस्थायामपि स्वस्य परस्य च निश्चयात्मकज्ञानसत्त्वात्। ज्ञानमिदं निश्चयात्मकं स्वपरव्यवसायात्मकतया रहितं न भवति। अतएव प्रत्यक्षानुभूतिकारणं प्रत्यक्षं स्वपरव्यवसायात्मकरूपकल्पनया रहितं न वक्तुं शक्यते। बौद्धतर्कभाषायां प्रत्यक्षस्यैकमपरमपि लक्षणं दर्शितमस्ति 'कल्पनापोढमभ्रान्तं प्रत्यक्षम्' अत्र कल्पनाशब्दस्य चत्वारोऽर्थाः स्वीकृता वर्तन्ते-

1. अस्पष्टप्रतीतिः कल्पनाऽस्ति।
2. स्वार्थयोर्निश्चितिरस्ति कल्पना।
3. अभिलाषवर्तिप्रतीतिः कल्पना विद्यते तथा
4. अभिलाप-संसर्ग योग्यप्रतीतिर्मन्यते कल्पनेति।

कल्पनाया एतेषु चतुर्षु स्वरूपेषु प्रारम्भिकस्वरूपद्वयं विद्यानन्देन स्वीकृतं वर्तते। अस्पष्टप्रतीतिरूपकल्पनाया जैनसम्मते प्रत्यक्षलक्षणे परिहारः कृतोऽस्ति। तथा स्वार्थयोः व्यवसीतिरूपकल्पनां यशोविजयः प्रत्यक्षलक्षणे आवश्यकीं स्वीकृतवानस्ति।

बौद्धतर्कभाषायामिदमभिमतमुपलभ्यते यत् श्रोत्रस्य शब्देन सन्निकर्षं विनैव शब्दस्य ज्ञानं भवितुं शक्नोति। अत इदं सिद्धतामेति यत् श्रोत्रम् अप्राप्यकारि न जायते। यतोहि श्रोत्रमप्राप्यकारि भवेच्चेत् तेन प्रत्यक्षेण बाधाऽपि स्वीकार्या यतोहि कर्णयोः मशकानां ध्वनौ सति शब्दानां ज्ञानं श्रोत्रद्वारा शब्दसन्निकर्षे सत्येव जायते। दूरनिकटादिविषयज्ञानं व्यवहारो वा, श्रोत्रे प्राप्यकारिणि सति सम्भवोऽस्ति। यथा घ्राणेन्द्रियं यदा अर्थेन सह (गन्धेन सह) सन्निकृष्टं जायते, तदैव ज्ञानमिदमुत्पद्यते यद् आयाति दूराद् गन्धत्वं पद्मस्य उत पार्श्वात्। यथा दूरनिकटादेः व्यवहारः सम्भवो वर्तते। तथैव शब्दसन्निकर्षसत्त्वेऽपि दूरस्थनिकटस्थयोः ध्वनेर्बोधो जायते।

अनेन प्रकारेण बौद्धतर्कभाषायां यत् श्रोत्रस्य अप्राप्यकारित्वं प्रदर्शितं विद्यते तस्य खण्डन द्वारा इदं सिद्धं भवति यत् श्रोत्रं प्राप्यकारि जायते।

यतोहि श्रोत्रेन्द्रिस्य श्रवणत्वेन सन्निकृष्टसत्त्वेऽपि यदा भेर्याः ध्वनिरायाति, तर्हि मशकध्वनिवत् सञ्जायते।

इदानीं यदि कश्चित् प्रश्नमिममुपस्थापयति यत् शब्दः स्वोत्पत्तिस्थाने गृहीतं मन्यते? परन्तु एतादृश्यां शङ्कायामिदं निवारणं भवति यत् यदि शब्दः स्वोत्पत्तिस्थले एव गृहीतो भवति तर्हि दूरस्थभेर्यादेः शब्दानां ग्रहणं नैव भवितुं शक्नोति। केवलं मशकस्य ध्वनेः एव श्रूयते, परन्तु नेदमुपपद्यते। अनेन दृष्टिकोणेनाऽपि जैनतर्कभाषा अत्यन्तं सूक्ष्मा प्राप्ताऽस्ति। यतोहि तत् चक्षुषः अप्राप्यकारित्वस्य खण्डनं कुरुते, सूर्यस्य रश्मयः भासुररूपत्वेन निवर्त्य चक्षुरभिसमन्वयसत्त्वे चक्षुषः अभिधातो हेतुर्भवति। श्रोत्रे अभिधातस्य हेतोः प्रश्न एव नोपस्थितो भवति यत् शब्दात् निवर्त्य श्रोत्रेण अभिसम्बन्धो मन्यते। अतो मम दृष्टिकोणेन श्रोत्रमप्राप्यकारि मन्तव्य-मेवोचितम्।

मानस-प्रत्यक्षस्य खण्डनम्

वैदिकतर्कभाषायां येन केन प्रकारेण मानसप्रत्यक्षस्य समनन्तर-प्रत्ययेन्द्रियप्रत्यक्षं स्वीकृतमस्ति तथा दृष्टिकोणोऽयं बौद्धतर्कभाषायामपि यथातथ्यरूपत्वेनाभिमतं विद्यते अर्थात् मानसप्रत्यक्षस्य पश्चात् इन्द्रियप्रत्यक्षं स्वीकृतं वर्तते। परन्तु जैनतर्कभाषायामपि यशोविजयेन सांव्यवहारिक-प्रत्यक्षमवलम्ब्य स्वीकृतमिदं यन्मन इन्द्रियप्रत्यक्षं विनैव समस्तानाम् अर्थानां ग्रहणं करोति। यत्र इन्द्रियमनसोः काचित् आवश्यकतैव न जायते। किन्तु मूलतः आत्मना अन्यस्य मनसः पर्यायेषु अथवा मनसि विचारिता-नामर्थानां ज्ञानं समुत्पद्यते। वास्तविकरूपेण मानस-प्रत्यक्षे व्यव-सायात्मकताऽभावकारणात् इदं जैनतर्कभाषायां स्वीकृतमप्रमाणमस्ति। यदीदमुच्यते तर्हि इन्द्रियप्रत्यक्षे मानसप्रत्यक्षे भेदोऽस्ति। इन्द्रिय-प्रत्यक्ष-सविकल्पकज्ञानं सन्तानभेदकारणं मूलरूपेण उत्पन्नं न कुरुते, मानस-प्रत्यक्षेण विकल्पमुत्पन्नं करोति। अतएव मानसप्रत्यक्षम् इन्द्रियप्रत्यक्षाद् भिन्नमस्ति।

अर्थात् येन प्रकारेण सविकल्पकज्ञानात् इन्द्रियप्रत्यक्षं सन्तान-भेदकारणानि भिन्नानि सन्ति। मानस-प्रत्यक्षमपि अनेनैव प्रकारेण विकल्पकं ज्ञानमपि मानसप्रत्यक्षेण उत्पन्नं न जायते।

साम्प्रतं यदि केनचिदुच्यते यत्–यावन्तीन्द्रियाणि प्रत्यक्षभूतानि सन्ति, तावन्त्येव मानस–प्रत्यक्षाणि भवन्ति तर्हि तेषु प्रतिसन्धिर्न भवितुं शक्नोति। यत् अहं स एव, येन शष्कुल्या गन्धमादाय भक्षणं कृतम् अस्ति।[1] यद्येकमेव मानस–प्रत्यक्षं रूपरसगन्धस्पर्शादिसमस्तविषयाणां ग्रहणं लभते, तर्हि पुनः पञ्च प्रकारकाणीन्द्रियाणि अनावश्यकानि मंस्यन्ते।[2]

यदि प्रत्येकमिन्द्रियस्य पश्चात् न्यूनादपि मानस–प्रत्यक्षं स्वीक्रियेत तर्हि इन्द्रियप्रत्यक्षाणां सहोत्पत्तेः बौद्ध–मतं खण्डितं जायते। यतोहि अनेन प्रकारेण इन्द्रियप्रत्यक्षस्य अनन्तरं मानस–प्रत्यक्षं भविष्यति। पुनरेतस्य विकल्पो जनिष्यते। तदनन्तरमेव अन्यदिन्द्रियप्रत्यक्षं मन्यते जायते वा। अतो विभिन्नैन्द्रियप्रत्यक्षाणां तथा विकल्पानां मध्ये मानस–प्रत्यक्षव्यवधान-मुत्पन्नं करिष्यते।

अतः इन्द्रिय–प्रत्यक्षद्वारा एव निर्णयात्मकं ज्ञानं भवितुमर्हति। अतोऽङ्गीकारस्य कल्पना व्यर्था वर्तते। इन्द्रिय–प्रत्यक्ष–निर्णयात्मक-विकल्पयोर्मध्ये मानस–प्रत्यक्षस्य तस्य विरोधो हि जायते प्रत्यक्षानु-मानाभ्याम्।

खण्डनमस्यानेन प्रकारेण वर्तते यत् मानसप्रत्यक्षस्य तथा इन्द्रिय—

प्रत्यक्षस्य विषयो यदि वर्ततेऽभिन्नस्तर्हि मानस–प्रत्यक्षमपि इन्द्रियप्रत्यक्षवत् सन्तानभेदत्कारणेन स्मृतिमप्युत्पन्नां कर्तुं शक्ष्यति।

मानस–प्रत्यक्षमेव कैश्चिद् बौद्धदार्शनिकैः स्वसंवेदनप्रत्यक्षस्यैव एकः प्रकारोऽभिमतोऽस्ति। परन्तु मम मते यदा वेदनादेर्ज्ञानकर्तृत्वेन स्वसंवेदनप्रत्यक्षे समावेशो भवितुमेव शक्नोति तर्हि मानसप्रत्यक्षत्वेन पृथक् प्रमाणमभिमतमनुचितमस्ति।

इदानीं कश्चन वक्ति यत्—

मानस–प्रत्यक्षमेव केवलं निश्चयात्मकं रूपमधिकरोति, येन नीलोऽयं पीतोऽयं इत्याद्युल्लेखो युक्तो जायते। परन्तु इन्द्रियं ज्ञानं निश्चयरूपं न भवति।

---

१. *शष्कुलीभक्षणादौ चेत्तावत्येव मनांस्यपि।*
यावन्तीन्द्रियचेतांसि प्रतिसन्धिर्न युज्यते॥
न्याय. वि. १५९–६०

२. *अर्थकं सर्वविषयमस्तु किं वाऽबुद्धिभिः।* न्याय. वि. १६०

तथापि यशोविजयेन इन्द्रियज्ञानमेव निश्चयरूप–मङ्गीकृतमिति। यतोहीन्द्रिय ज्ञानान्मानसज्ञाने नास्ति कश्चिद् भेदः। अतएव यदि मानसज्ञाने संशयो नोत्पद्यते तर्हि तन्निवारणाय नास्त्या–वश्यकतानुमानस्य।

स्वसंवेदनप्रत्यक्षस्य निरसनम्

ज्ञानस्य स्वसंवेदनप्रत्यक्षविषयेऽपि जैनतर्कभाषाया दृष्टिकोण एव अस्मन्मान्यो भवति। स्वसंवेदन–प्रत्यक्षस्य बौद्धतर्कभाषायां स्वीकारः कृतोऽस्ति। तथेदमेव यत्किञ्चिद् रूपेण केशवमिश्रेणाऽपि स्वतर्कभाषाया–मङ्गीकृतमस्ति। तथापि अनयोरुभयोरपि तर्कभाषयोरतिरिक्तं जैन–तर्क–भाषायाः दृष्टिकोणः स्वसंवेदनविषये ममाऽनुकुलोऽस्ति। मोक्षाकरगुप्तेन 'चित्त–चैत्त–समस्त–विकल्पानाम् आत्मसंवेदन स्वीकारत्वात्।'

परन्तु यशोविजयेन निर्णयात्मकं ज्ञानस्यैव प्रमाणं स्वसंवेदन–मङ्गीकृतम् बौद्धतर्कभाषायामिदमस्ति स्वीकृतं[1] यत् रागादिचित्त–विकल्पानां ग्रहणं स्वसंवेदनप्रत्यक्षत्वेन स्वीकृतं वर्तते। तथा प्रत्यक्षमिदं निर्विकल्पकमभिमतम्।[2]

एवं सत्यपि जैनतर्कभाषायां ज्ञानं स्वप्रकाशरूपत्वेननाङ्गी–कृतमुपलभ्यते तत्रेदमस्ति तथापि निर्णयात्मकस्वरूपमेव प्रमाणमिति। परस्य स्वस्य चार्थः स्वाधिक उपयुक्तः प्रतीयते यतोहि व्यक्तिः स्वयं (प्रकाशयुक्ताः) अर्थात् ज्ञानयुक्तः सन् कश्चिन्निर्णयमेति तथा स्वरूपं स्वस्य प्रमाणिकमेव जायते। तदेव ज्ञानं प्रमाणिकं भवितुं शक्नोति यत् बाह्याभिमुखत्वेन बाह्यार्थमपि जानीते। तथात्माभिमुखत्वेन स्वयमपि जानाति।

उदाहरणम्–यदि घटं जानेऽहं तर्हि ममेदमपि ज्ञानमस्ति यदहं स्वज्ञानेनैव घटो विद्यत इति जानामि। अनेन प्रकारेण ज्ञानं यथा ममात्मनो जातं तथैव तत् बाह्यार्थस्य निश्चयात्मकमपि भवति।

अतोऽनेनैव प्रकारेण प्रत्यक्षस्य तत्भेदानां दिग्दर्शनं कुर्वत्या मया

---

१. वेदनादिवदिष्टं चेत्कथं नाति प्रसज्यते न्याय. वि. १६२

२. निश्चयात्मा स्वयं सिद्धयेत। (लघीयस्त्रय १९)

३. मानसं चार्थ रागादिस्वसंवित्तिरकल्पिका। प्रमाण सं. (   )

अनुमानस्वरूपमपि दर्शयिष्यते, यत् जैनतर्कभाषायां यशोविजयेन स्वीकृतमस्ति।

यस्यां तर्कभाषायां वैदिकतर्कभाषाबौद्धतर्कभाषावत् अनुमानं नाङ्गीकृतं वर्तते, परोक्षप्रमाणस्य एकभेदान्तर्भूतमवश्यमेवाऽस्ति।

"अक्षेण परः परोक्षम्" मम दृष्ट्या परोक्षस्यार्थोऽयमस्ति यत्-सर्वप्राणिनेत्रेभ्यो दूरं यदस्ति, अर्थात् न केनचिदपि द्रष्टुं शक्येत। तदेव परोक्षप्रमाणत्यिभिधीयते। यशोविजयेन परोक्षस्याऽर्थः अनेन प्रकारेण प्रदिष्टो वर्तते यत्—"अस्पष्टज्ञानं परोक्षमुच्यते।" परन्तु वर्तमान-सामाजिक्वाग्व्यवहारे अक्ष्णोः परः परोक्षम् एतदेव परिभाषा-रूपत्वेनोचितमिति, मन्तव्यं भवति।)

अत इदानीं पर्यन्तमत्र वैदिक-बौद्ध-जैनतर्कभाषाणां समीक्षात्मक-रूपं स्पष्टं क्रियमाणमुक्तं यत् वैदिकतर्कभाषां इन्द्रियार्थयोः सन्निकर्षजन्यं ज्ञानं प्रत्यक्षं मनुते तथा तत् चतुर्षु रूपेषु विभक्तमभिमनुते। चक्षुः-श्रोत्र-घ्राण-जिह्वा यासामर्थत्वेन रूप-स्पर्श-शब्द-गन्धरसाः सन्ति। इन्द्रियाणि हि भौतिकानि वर्तन्ते। एतत् श्रीकेशवमिश्रेण स्वीकृतमस्ति। अनेन इन्द्रियाणि भौतिकानि साधयता स्वीकुर्वता वा तासामुत्पत्तिः पृथ्वीत्यादि-पञ्चभूतेभ्यो मता वर्तते। अस्माभिरवगम्यते यत् गोलकरूपे दृश्यमानमेव चक्षुरिन्द्रियमस्ति। वस्तुतस्तु गोलके स्थितं भूतविशेषमिन्द्रियं वर्तते। अतः कृष्णतारास्थितं तेज एव चक्षुरस्ति। अनेन अन्यानीन्द्रियाण्यपि ज्ञातव्यानि। अतः इन्द्रियाणि अतीन्द्रियत्वं यान्ति सन्ति वा। नैतासां प्रत्यक्षम् अस्माभिर्न गृह्यते, अनुमानेनोपलभ्यते। अत इन्द्रियाणि शरीरसंयुक्तानि ज्ञानकरणनि तथा अतीन्द्रियाणि सन्ति। मोक्षाकरगुप्तने, इन्द्रियाणि भौतिकानि स्वीकृतानि वर्तन्ते यासां प्रतीतिः बाह्येन भवति। इदं विषयं न प्राप्तुं शक्नोति अपितु दूरात् गृह्णाति। अतश्चक्षुरप्राप्यकारि वर्तते। यद्यपि एतस्य खण्डनं पूर्वमुपस्तापित-मस्ति तथा जैन तर्कभाषामाधारीकृत्य एतस्य प्राप्यकारित्वस्य समर्थनमपि प्राप्तं दृश्यते। तथापि बौद्धतर्कभाषायां मोक्षाकरगुप्तेन यत् इन्द्रियाणि भौतिकानि स्वीकृतानि सन्ति तासां स्वरूपमत्र उपस्थापनीयमिति मत्वा मयोपस्थापनं क्रियते, यदनेन प्रकारेण वर्तते।

यदि चक्षुः प्राप्यकारि स्यात्तर्हि नेत्ररश्यमो गोलकमपहाय विषयसामीप्यमायान्तु। अतः यो विषयो दूरं स्यात् तत्र गमने समयः अधिकः व्यतीतो जायेत। तथा निकटस्थं वस्तु प्रति न्यूनकालः। तत्र समयस्याल्पत्व-मिति। चक्षुषा हि गृह्यते निकट्स्थ-दूरस्थवस्तुनां समान-रूपत्वेन दर्शनम्। अतोऽत्र वैदिक-तर्कभाषायामिन्द्रियार्थयोः सन्निकर्ष-प्रत्यक्षं स्वीकृतमस्ति। बौद्धतर्कभाषायामक्षसम्बन्धि ज्ञानं प्रत्यक्षमभिमतं विद्यते।

साम्प्रतं प्रश्नोऽयं समुदेति यत् इन्द्रियाश्रितं ज्ञानमेव प्रत्यक्षमस्ति तर्हि मानसस्वसंवेदनादिप्रत्यक्षस्य उपेक्षा भविष्यति। परन्तु "प्रतिगम् अक्षम्" अनेन विग्रहेण दर्शितमिदमस्ति यत् प्रत्यक्षशब्दे गतिसमासः विद्यते। अतः प्रत्यक्षशब्दस्य प्रयोगो भवितुं शक्नोति त्रिष्वपिलिङ्गेषु। गति समासस्य नियमोऽयं भवति यत् यस्मिन् विशेषमाश्रित्य लिङ्गनिर्धारणं क्रियते। तथा तस्य प्रयोगः प्रत्यक्षं ज्ञानम्, प्रत्यक्षा बुद्धिः, प्रत्यक्षो घटः, इत्यनेन प्रकारेण भवेदिति ज्ञायते।

अत्र प्रश्नोऽयमेकः समुदेति यत् इन्द्रियाश्रितं ज्ञानमेव प्रत्यक्षमस्ति, इति प्रकारिका केवलं व्युत्पत्तिरेव प्रत्यक्षस्योपदर्शिताऽस्ति न त्वर्थः। शब्दार्थो हि व्युत्पत्तिप्रवृत्तिनिमित्ताभ्यां भिन्नो भवति। अर्थात् कस्य-चिच्छब्दस्य यौगिककार्यहेतोः प्रकृतिप्रत्यादीनां विभागः क्रियते। शब्द-सिद्धिरेव शब्दव्युत्पत्तिरिति। व्युत्पत्तिः प्रायः निरुक्तेरथवा निर्वचनादि-शब्दस्य समानार्थको वर्तते। यथा-गच्छतीति गौः-या गच्छतिं सा गौरिति। अतः "प्रतिगतम् अक्षम्" इदं प्रत्यक्षशब्दस्य व्युत्पत्तिनिमित्तमस्ति। अनेन प्रकारेण प्रवृत्तिनिमित्तं यत्र शब्दस्य प्रयोगः कस्यचिदर्थस्य कृते क्रियते अत्र गोशब्दस्य प्रवृत्तिनिमित्तं गोत्वं विद्यते।

अत्र प्रत्यक्षशब्दस्य प्रवृत्तिनिमित्तं सहकारित्वमस्ति। अर्थात् यज्ज्ञानमर्थस्य साक्षात्कारं कुरुते तत्प्रत्यक्षमित्यभिधीयते। प्रवृत्तिनिमित्त-कारणत्वात् अयमर्थः सहकारित्वमानसयोगि-स्वसंवेदन-प्रत्यक्षेषूपजायते। यद्यपि एतत्सर्वेषां खण्डनं कुर्वता प्रमाणं तद्भेदाश्च जैन-तर्कभाषाकारेण यशोविजयेनाऽपि प्रत्यक्षपरोक्षरूपत्वेनोपस्थापिताः। पुनः प्रत्यक्षस्यापि भेदः अयं यथा सांव्यवहारिकं प्रत्यक्षम् पारमार्थिकं प्रत्यक्षञ्च कृतं वर्तते। तथा येन

प्रकारेण सर्वैरपि प्रत्यक्षमनुमानञ्च प्रमाणत्वेनाङ्गीकृतं तथैवैतेनापि न स्वीकृतमपितु अनुमानं परोक्षप्रमाणस्य एको भेदः इति स्वीकृतम्। यतोहि परोक्षप्रमाणस्य पञ्च भेदाः सन्ति ते च यथा—१. स्मरणं २. प्रत्यंभिज्ञानं ३. तर्कः ४. अनुमानं तथा ५. आगमः।

१. स्मरणम्—अनुमानजन्यं ज्ञानं स्मरणमिति मन्यते। यथा तीर्थङ्करस्य प्रतिभा।

२. अनुभवस्मरणाभ्यामुत्पन्नतिर्यक्सामान्यस्य ऊर्ध्वतासामान्यस्य ज्ञातृत्वेन योजकरूपज्ञानं प्रत्यभिज्ञानपदवाच्यं मन्यते। यथा गौरियं तस्या जातेरस्ति। गवयो गोसदृशः स एव देवदत्तो वर्तते इत्यादि।

३. तर्कः—समस्तदेशकालसम्बन्धिसाध्यसाधनभावादि-अविनाभावव्याप्तिः वाच्यवाचकज्ञानं कर्तृत्वेन ज्ञानं यत् तत्तर्कपदाख्यं भवति। यथा यत्र धूमस्तिष्ठति तत्राग्निरपि भवति।

४. अनुमानम्—साधन साध्यज्ञानमनुमानमस्ति। अनुमानमिदं द्विप्रकारकं मन्यते यत् (१) स्वार्थानुमानं तथा (२) परार्थानुमानम्।

(१) स्वार्थानुमानम्—हेतुज्ञानसत्त्वे व्याप्तिस्मरणसत्त्वे च साध्यज्ञानसत्त्वं स्वार्थानुमानमित्युच्यते।

यथा—धूमप्रत्यक्षद्रष्टुः तथा धूमाग्निव्याप्तिस्मरणकर्तुरिदं ज्ञानमुत्पद्यते यदयं पर्वतोऽग्निमान्। एतत् प्रकारकं ज्ञानमेव स्वार्थानुमानमस्ति। मम दृष्टौ "स्व" इत्यस्यार्थ निज इति वर्तते। अर्थतात्पर्यं भवति निश्चयः। अर्थात् यत्प्रमाणमस्माभिः स्वयमेव निश्चेतुं शक्यते तदेव स्वार्थानुमानमित्युच्यते। यथाऽस्माभिर्निश्चीयते यत्र धूमोऽस्ति तत्र वह्निरवश्यमेव तिष्ठति तदेव स्वार्थानुमानं कथ्यते। अतः स्वार्थानुमान एव हेतुग्रहणं व्याप्तिस्मरणञ्चावश्यमेव भवेतामिति।

हेतुवादस्य सिद्धान्तः—

वैदिकदृष्टिकोणेन वैदिकतर्कभाषायां हेतुत्रयं स्वीकृतं वर्तते।

१. अन्वयव्यतिरेकी हेतुः।

२. केवलान्वयी हेतुः।

३. केवल-व्यतिरेकी हेतुः।

१. अन्वयव्यतिरेकी हेतु—धूमो वह्नेः लिङ्गम् अथवा हेतुरुच्यते।


हेतुरयं त्रिप्रकारकमङ्गीकृतं वर्तते यथा १. अन्वयव्यतिरेकी, २. केवलान्वयी तथा ३. केवलव्यतिरेकी।

यथा 'पर्वतो वह्निमान् धूमत्वात्' अत्र पर्वतस्य वह्निमत्वे (अग्निमत्वम्) अग्निःसाध्योऽस्ति, धूमवत्त्वं हेतुर्वर्तते। अन्वय- व्यतिरेक-व्याप्तियुक्तकारत्वात् अन्वय-व्यतिरेकी वर्तते।

यथा-यत्र-यत्र धूमो वर्तते तत्र-तत्र वह्निरस्ति। यथा महानसादौ। अनेन प्रकारेण यत्राग्निर्नास्ति तत्र धूमोऽपि नास्ति। यथा सरोवरः। इयमस्ति व्यतिरेकव्याप्तिरिति। जलाशये धूमाग्नयोरुभयोरभावत्प्राप्तवात्। हेतोः यत् अन्वय-व्यतिरेकीत्यादि भेदत्रयमस्ति तस्य आधारत्वेन द्विप्रकारिका व्याप्तिः भवितुं शक्नोति—१. अन्वयव्याप्तिः २. व्यतिरेकव्याप्रिश्च। यत्र उभय-प्रकारिका व्याप्तिः जायते तदन्वयव्यतिरेकी हेतुरुच्यते।

अन्वयस्य अर्थो भवति यत् यत्र साधनसत्त्वे साध्यसत्ता भवति तदन्वयव्याप्तिः इति। अनेन साधनं हेतुर्वा व्याप्तो जायते तथा साध्यं व्यापकं भवति। व्यापकार्थस्याभिप्रायोऽयमस्ति। "अधिकदेशवृत्तित्वम्" अर्थादिदमधिकदेशत्वमङ्गीकुरुते। व्याप्यशब्दस्य अयमर्थो भवति यत् "न्यूनदेशवृत्तित्वम्"। गणितस्य अङ्केषु इदं वक्तुं शक्यते यत् व्याप्तं शताधिकेषु स्थलेषु वर्तते तर्हि व्यापकं तदधिकेषु स्थलेषु नूनमेव स्थास्यति। व्याप्यव्यापकयोरिदं आपेक्षिकसम्बन्धत्वं मया लघुवृत्तमाध्यमेन वृहता वृत्तेन प्रस्तुतं क्रियमाणमस्ति। यत्र एकं द्वितीयाऽभ्यान्तरे तिष्ठति।

यथा—



अनेन प्रकारेण व्यतिरेकस्य अर्थोऽभावो मन्यते-(तदसत्त्वे तदसत्त्वम्) साध्याभावस्याभावे साधनस्याप्यभावो व्यतिरेकव्याप्तिरस्ति। अर्थात् यत्र वह्निर्नास्ति तत्र धूमोऽपि न विद्यते।

२. अन्वयव्यतिरेकी हेतुः—यत्र अन्वयव्यतिरेकिणौ उभावपि हेतू स्तः, तत्र अन्वयव्यतिरेकी भवति। यथा-शब्दोऽनित्यः कृतकत्वात् घटवत्

शब्दः अनित्यो वर्तते, कृतकत्वेन, घटसदृशम्। अत्र अनित्यत्वमस्ति साध्यम्। एतत् सिद्धयर्थं हेतुः प्रदत्तोऽस्ति। कृतकत्वमर्थात् कार्यत्वम्। अयं कृतकत्वपदहेतुरन्वयव्यतिरेकी हेतुरस्ति। अत्र अन्वयव्याप्तिरनेन प्रकारेण वर्तते—"यत्र कृतकत्वं तत्रानित्यत्वम्" यदपि कार्यपदार्थत्वमुपलभ्यते तदनित्यं भवति। घटपटादयः उदाहरणस्वरूपाः सन्ति।

व्यतिरेकव्याप्तिरनेन प्रकारेण प्रस्तोतुं शक्यते

यत्र अनित्याभावः तत्र कृतकत्वाभावः। उदाहरणमेतस्य आकाशोऽस्ति। अन्वयव्यतिरेकी हेतु पञ्चरूपयुक्तः सन् स्वसाध्यं साधयतिः अतः अन्वयव्यतिरेकी हेतुः सदस्ति तदैव यदा पक्षसत्व-सपक्षसत्व-विपक्षव्यावृति-अबाधितविषयत्वऽसत्प्रतिपक्षत्वादिपञ्चरूपैर्युक्तो भवेत्।

केवलान्वयी हेतुः अयं हेतुः चतूरूपयुक्तो मन्यते यतोहि तत्र कश्चिद् विषयो न भवति। उदाहरणार्थ—"घटोऽभिधेयः" प्रमेयत्वात् अतोऽयं केवलान्वयी हेतुरस्ति। अत्र घटस्य पक्षत्वात्। सर्वो हि अभिधेय-पदार्थः सपक्षो वर्तते। अत्र साध्यस्य (अभिधेयत्वस्य) केनचिदपि प्रकारेण बाधा नोत्पद्यते। किञ्चायमवाधितविषयोऽपि वर्तते तथा चात्र साध्याभावस्य साधकः कश्चन अपरोऽपि हेतुः नास्ति अतोऽत्र असत्प्रतिपक्षत्वमपि विद्यते।

अतोऽनेन प्रकारेण केवलान्वयी हेतुः चतूरूपयुक्तत्वेन स्वसाध्यं प्रसाधयति। केवल-व्यतिरेकहेतुरपि चतूरूपयुक्तः सन् सद्धेतुरुच्यते। नास्ति अत्र कश्चित् सपक्ष-दोषः। अतः सपक्षत्वनामकस्य हेतोः रूपमपि तत्र न भवति। यथा-जीवत्छरीरं सात्मकं प्राणादिमत्वात्। अत्र प्राणदिमत्वं (प्राणादिमुक्त्वं) केवलव्यतिहेकीहेतुः वर्तते। हेतुरयं जीवशरीरे स्थितो भवति। अतो वर्ततेऽत्र सपक्षत्वमिति। जीवितशरीरत्वेन अन्यत्र प्रमाणादिमत्वं नास्ति। अतएवात्र विपक्षासत्त्वं विद्यते। एतस्य साध्यस्य (सात्मकत्वस्य) केनाचिदपि प्रमाणेन न बाधितुमुपक्रम्यते। अतएवाऽस्मिन् अबाधितविषयत्वमपि दृश्यते। किञ्चास्य साध्यस्याभावस्य साधकः कश्चिन्नान्योऽस्ति हेतुरिति। अतोऽत्र अंसत्प्रतिपक्षत्वमस्ति। अनेन हेतौ सपक्षत्वमपहाय सर्वाण्यपि रूपाणि विद्यन्ते। सपक्षस्य सात्मकत्वात्। किन्तु जीवितशरीराद्भिन्नो वर्तते। नाप्तुं शक्यते किमप्येतादृगुदाहरणम्।

सात्मकत्वस्य जीवितशरीरान्तर्भावात्। अर्थात् ते सर्वेऽपि पक्षान्तर्भूता जायन्ते। नास्ति अत्र कश्चन सपक्ष इति।

दृश्यतेऽस्माभिर्यत् केवलव्यतिरेकी हेतुः केवलः चतूरूपैर्युक्त एवाऽस्ति। अतो वैदिक-तर्कभाषाया दृष्टिकोणेन हेतुवादस्य सिद्धान्तनिरूपणं तथा तद्भेदाश्च विज्ञापिताः।

बौद्धतर्कभाषाया दृष्टिकोणेन हेतुवादस्य सिद्धान्तः

लिङ्गं हेतुरथवा करणमुच्यते। कारणमिदं द्विप्रकारकमस्ति—१. कारकं २. ज्ञापकञ्च। कारकमुत्पादकमपि कथ्यते यथा बीजेनाऽङ्कुरोत्पत्तिः। ज्ञापककारणं ज्ञानं प्रबोधयति। यथा दीपको घटस्य ज्ञापको वर्तते। घटस्यांधकारस्थितत्वात्। अतो दीपकमपहाय घटो नैवावलोक्यते। अतोऽयं ज्ञापको हेतुरस्ति। लिङ्गं साधनमपि प्रोच्यते। इदमेव व्याप्यमपि कथ्यते। व्याप्य-व्यापकस्य अविनाभावी सम्बन्धो वर्तते। यथा धूमो वह्नेर्व्यापको भवति। व्याप्यस्य स्वभावोऽयमस्ति यत् व्यापकं विना एतत् स्थातुमेव न शक्नोति। यथा धूमोऽग्निं विना। एतस्य लिङ्गस्य हेतोर्वा त्रीणि लक्षणानि मतानि सन्ति। १. पक्षः २. सपक्षस्तथा ३. विपक्षः। अर्थात् हेतोः पक्षसत्त्वं विपक्षसत्त्वं सपक्षसत्त्वमेव। अतः प्रश्नोऽयमुदेति यत् के पक्ष-विपक्ष-सपक्षाः।

पक्षः—एष पक्ष उच्यते यस्यानुमानं क्रियते अर्थात् पक्षोऽनुमेयोऽस्ति।

उदाहरणार्थ—यथा पर्वतादौ वह्निरस्ति। अत्र पर्वतः पक्षो वह्निश्च साध्यो वर्तते। समानधर्मः (सपक्षः) कथ्यते। अर्थात् यः पदार्थः पक्षवत् भवति स एव सपक्षपदवाच्यो मन्यते।

विपक्षे हेतुः कदापि न भवति। अर्थात् यत्र पक्षाभावो विद्यते (तदसपक्षः) अथवा विपक्षः कथ्यते। अस्य त्रिरूपात्मकस्य हेतोस्त्रयो भेदाः समुपलभ्यन्ते। यथा—१. स्वभावः, २. कार्यम् तथा ३. अनुपलब्धिः।

१. स्वभावहेतुः—यः साध्यो हेतु-स्वसत्तात्वेनोपस्थीयते स स्वभावहेतुरूच्यते। तात्पर्यमिदमस्ति यत् यत्र द्वौ धर्मौ सहैव भवतः तथा एकोऽपरस्य धर्मस्य अविनाभावो जायते, तत्र अविनाभाविधर्मद्वारा अन्यस्य

अनुमानं क्रियते। अविनाभाविस्वभावस्य मात्रत्वात्। अतोऽयं स्वभावो हेतुर्वण्यते। उदाहरणं—अयं वृक्षोऽस्ति एतच्छिंशपात्वात्। अत्र वृक्षत्वं शिंशपात्वञ्चोभयमपि एकस्यैव वस्तुनः स्वभावो वर्तते। अतः उभयत्रापि तादात्म्यमस्ति।

२. कार्यहेतुः—यत्र कार्यत्वं तत्र कारणोपलब्धित्वम्। उदहरणम्—तत्राग्निरस्ति तत्रधूमास्थितित्वात्। लोकप्रसिद्धमिदम्।

३. अनुपलब्धिहेतुः—दर्शनाऽभावो ह्यनुपलब्धिरूच्यते। यद् वस्तु इन्द्रियगम्यमस्ति, तद्दर्शनयोग्यं वर्तते, तथा यत् अतीन्द्रियत्वं वर्तते, तदेवानुपलब्धिरिति प्रोच्यते। अतो दर्शनयोग्यवस्तुनोऽनुपलब्धित्वेन तस्य अभावो ज्ञायते। उदाहरणार्थं-भूतले घटोऽस्ति इदमनुपलब्धित्वहेतुत्वं वर्तते।

जैनतर्कभाषाकारेण यशोविजयेन खण्डनम्

बौद्धैः हेतुवादस्य यस्य सिद्धान्तस्य स्थापना कृता, तत्खण्डनं कुर्वता यशोविजयेनोक्तं यत् बौद्धानामिदं कथनं न सुष्ठु-यतोहि बौद्धतर्कभाषायां स्वीकृतमिदमस्ति यत् दोषत्रयभावं विना अनुमानोत्पत्तिर्नैव भवितुं शक्नोति।

यशोविजयस्य कथनमिदं वर्तते यत् पक्षधर्मता अर्थात् हेतोः पक्षे स्थितस्याऽभावेऽपि अनुमानानीमानि द्रष्टुं शक्यन्ते। १. एकमुहूर्त्तस्य पश्चात् शकटनक्षत्रस्य (रोहिणीनक्षत्रस्य) उदयो भविष्यति, समयेऽस्मिन् कृत्तिकोदयत्वात्।

२. उपरि सूर्योऽस्ति पृथ्वीप्रकाशमयत्वात्

३. आकाशे चन्द्रो वर्तते जले चन्द्रस्थितत्वात्। त्रीणीमानि हेतुत्वानि पक्षास्थितत्वात् सन्ति। अतः पक्षधर्मता नास्ति-तथाप्येते हेतवो गमकाः सन्ति।

बौद्धमतखण्डनं कृत्वा नैयायिकमान्यतायाः खण्डनमपि यशोविजयेन हेतुवादसिद्धान्तमाधारीकृत्य कृतमस्ति-नैयायिकानां मान्यतानुसारं हेतौ पञ्च लक्षणानि भवेयुः। पूर्वोक्ते लक्षणत्रये अबाधितविषयत्व[1]-असत्प्रति-पक्षत्वयोः[2] मिश्रणेन हेतोः पञ्चलक्षणानि भवन्तीति। आम्रफलानीमानि

१. *प्रत्यक्षादिप्रमाणत्वेन साध्याऽबाधाभावः।*

२. *समानबलशालिनो विरोधि - हेतोरभावः।*

पक्वानि सन्ति-एक-शाखोत्पन्नत्वात्, इत्यादिबाधितविषये हेतोरतिप्रसङ्गः निवारयितुमबाधितविषयत्वमावश्यकं मन्यते। देवदत्तोऽयं मूर्खोऽस्ति-अमुकस्य पुत्रत्वात्। अन्यपुत्रवत्। एतत्-प्रकारके सत्प्रतिपक्षहेतुषु अति-प्रसङ्गं निवारयितुम् असत्प्रतिपक्षत्वं हेतोः लक्षणत्वेन मन्तव्यमावश्यकं वर्तते-मतमिदं वैदिकतर्कभाषायामप्युलभ्यते।

परन्तु नैयायिकानां मतस्य खण्डनं यशोविजयेन तथैव कृतं यथा बौद्धतर्कभाषाद्वारा प्रदत्तहेतुवादस्य खण्डनं कृतमस्ति। यतोहि शकटस्योदयो भविष्यति, एतत्समये कृत्तिकोदयो वर्तते। इत्यादिहेतुषु पक्षधर्मत्वमेव न सेत्स्यति।

एतदतिरिक्तं गर्भस्थः पुत्रो मैत्रस्य श्यामोऽस्ति-मैत्रीपुत्रत्वात्। अत्र हेत्वाभासेऽपि पञ्च लक्षणानि विद्यमानानि सन्ति। आशयोऽमस्ति यत् क्वचित्-क्वचित् समीचीने हेतावपि पञ्च लक्षणानि न भवन्ति। अतो हेतोरुक्तलक्षणेषु अतिव्याप्तिदोषो निपतति। तथा यत्र-तत्र हेत्वाभासोऽपि प्राप्यते। एतत्कारणात् अतिव्याप्तिदोषः आपतति।

अतोऽनेन प्रकारेण वैदिकतर्कभाषाबौद्धतर्कभाषाप्रदत्तस्य हेतुवाद सिद्धान्तस्य खण्डनं कुर्वाणेन यशोविजयेन जैनतर्कभाषायां हेतुवाद-सिद्धान्तविषये स्वमतमुपस्थापितं यदत्र प्रस्तूयते—**यशोविजयेन जैन-तर्कभाषायां ज्ञापितं वर्तते** यत्-हेतुरित्यस्य प्रयोगः प्रकारद्वयेन कर्त्तव्यः १. साध्योपपत्तिरूपेण तथा २. अन्यथानुपपत्तिरूपेण। साध्यसत्त्वे यत्र हेतुस्थितिः निश्चिता स्यात् तत्साध्योपपत्तिरूच्यते। यथा-पर्वतो वह्निमान् वर्तते वह्निसत्त्वे धूमसत्त्वात्। यत्र साध्याभावे साधनाऽभावो विद्यते किल तदेव अन्यथानुपपत्तिहेतुरित्युपकल्प्यते। यथा तत्र धूमत्वं नास्ति, तत्र अग्नित्वमपि नो वर्तते। एतदुभयप्रकारे प्रयोगे केनचिदेकेन प्रयोगेण साध्यज्ञानसत्त्वे एकस्थले एवाऽपरप्रयोगस्य उपयोगिता नास्ति।

हेतोर्मूलं द्विप्रकारं भवति यथा—१. विधिरूपं २. प्रतिसेधरूपञ्च। विधिरूपस्यापि द्वौ भेदौ भवतः—१. विधिसाधकः २. निषेधसाधकश्चेति।

१. विधिसाधकः—विधिरूपहेतुरपि षट्प्रकारको मतोऽस्ति यथा १. व्याप्यहेतुः—शब्दोऽनित्यः प्रयत्नजन्यत्वात्। अनित्यतोपलभ्यते घटादिषु

तथा मेघविद्युदादीष्वपि। किन्तु प्रयत्नजन्यता केवलं घटादावेव वर्तते, न मेघविद्युति। अतएव प्रयत्नजन्यत्वम् अनित्यत्वस्य व्याप्यमस्ति। यद्यपि सर्वेऽपि हेतवो व्याप्यत्वेनैव व्यवह्रियन्ते तथाप्यत्र तस्यैव व्याप्यस्य विवक्षा कृता वर्तते-यत् कार्यादिरूपेण न स्यात्। अनेन प्रकारेण व्याप्यहेतुः कार्यादिहेतुभ्यः पृथक् कृतः। वृक्ष एष वर्तते। शिंशपात्वात् इत्यादि-हेतवोऽपि एतदन्तगर्तत्वेन वर्तन्ते।

२. **कार्यहेतुः**—यथा पर्वतोऽयमग्निमानस्ति अग्न्यभावत्वे सति धूमाभावत्वं। अत्र धूमो हेतोरग्नेः कार्यं वर्तते। तथा अग्नेरभावोऽसन् अग्नेर्गमकोऽस्ति।

३. **कारणहेतुः**—यथा वर्षा भविष्यति यतोहि वृष्टिः मेघानामन्य-धानुपपत्तिरस्ति। "मेघो वृष्टेः कारणम् तथा स्वकार्यवर्षणमित्यस्य जनको विद्यते।"

४. **पूर्वचरो हेतुः**—मुहूर्त्तान्ते शकटस्योदयो भविष्यति, यतोहि साम्प्रतं कृत्तिकोदयत्वात्। कृत्तिकोदयानन्तरमेव नियमत्वेन एकस्मिन् मुहूर्त्ते शकटस्य उदयो जायते। अतएव कृत्तिकोदयः पूर्वचरहेतुरस्ति। तथा शकटोदयस्य ज्ञापकोऽपि वर्तते।

५. **उत्तरचरो हेतुः**—जातो हि वर्तते भरणी-नक्षत्रोदयः। कृत्तिकोदयत्वात् सम्प्रति। अत्र "कृत्तिकोदयः" उत्तरचरस्य हेतुर्विद्यते तथा भरणीनक्षत्रस्य उदयज्ञापकोऽस्ति। प्राप्यते कालव्यवधानं पूर्वचरोत्तरहेत्वोः। न तथा कार्यकारणयोर्व्यवधानं दृश्यते। पूर्वक्षणवर्ति कारणं तथा उत्तरक्षणवर्ति कार्यमस्ति। अतएव कार्यहेतुः कारणहेतुः भिन्नो वर्तते।

६. **सहचरहेतुः**—यथा विजौरालताविशेषोऽयमस्ति रूपवान् रूपसहचरत्वेन सहचरहेतुत्वे पौर्वापर्याभावात्। अर्थात् कार्यकारणवत् अग्रे पृष्ठे न भवति। अनेन कारणेन तत्कार्यकारणहेतोरन्तर्गति न मन्तुं शक्यते। उपरि यानि हेतोः षड् उदाहरणानि प्रदत्तानि सन्ति-तेषु धूमादिहेतुः स्वयं सद्भावरूपो वर्तते। तथा च सद्रूपाग्न्यादिकमेव साधयति। अतएव स विधिसाधको विधिरूपश्च वर्तते। अयं विरुद्धोपलब्धिपदवाच्योऽपि भवति।

हेतोः द्वितीयो भेदो विरुद्धोलब्धिरस्ति। अयं निषेध–साधकोऽपि भवति। अस्य स्वभाव व्याप्यविरुद्धोपलब्ध्यादि भेदा भवन्ति। यथा सर्वथा एकान्तस्याऽपलब्धिरस्ति। यतोहि अनेकान्त हेतुः, प्रतिषेध्यैकान्तात् स्वभावत एव विरुद्धोऽस्ति। अमुकपुरुषस्य तत्त्वविषयक–निश्चयात्मक–ज्ञानाभावो विद्यते यतोहि तत्त्वे सन्देहो वर्तते। अयं विरुद्धव्याप्यो–लब्धिहेतुरस्ति। यतोहि तत्त्वसन्देहहेतुः प्रतिषेध्यतत्त्वनिश्चयात् विरुद्धा–निश्चयस्य व्याप्योऽस्ति।

3. अस्य पुरुषस्य क्रोधोपशमाऽभावो विद्यते, यतोहि एतस्य मुखमण्डले विकारी वर्तते। अयमेव विरुद्धकार्योपलब्धिहेतुरस्ति। यतोहि वदनविकारः कोरोधोपशम–विरुद्धभूतानुपशमस्य कार्यमस्ति।

4. अस्य कथनं मिथ्या। यतोहि रागादि–अकलिङ्कितज्ञान–सम्पन्नोऽस्ति अयम्। अतोऽसत्यस्य विरुद्धभूतसत्यवचनस्य कारणमस्ति।

5. मुहूर्त्तानन्तरं पुष्यतारोदयो न भविष्यति यतोहि साम्प्रतं रोहिण्या उदयोऽस्ति। अत्र रोहिण्युदयः पुष्यतारोदयात् विरुद्धमृगशीर्षनक्षत्राद्युदयस्य पूर्वचरः।

6. मुहूर्त्तात् पूर्वं मार्गशीर्षोदयो न जातः, यतोहि सम्प्रति फाल्गुनी नक्षत स्योदयोऽस्ति। अयं विरुद्धोत्तरचरहेतुः। यतोहि पूर्वफाल्गुनी–नक्षत्रस्योदयस्योत्तरचरः।

प्रतिषेधरूपहेतुरपि भेदद्वयसंवलितोऽस्ति—

1. विधिसाधको 2. निषेधसाधकश्च।

विरुद्धानुपलब्धिहेतुः—यो हेतुः निषेधरूपाश्रयोऽस्ति किन्तु विधेः साधकोऽस्ति। स विरुद्धानुपलब्धिपदवाच्यः, अयं हि पञ्चभेदात्मकः तद्यथा–1. साध्यविरुद्ध–कार्यानुपलब्धिः, 2. साध्यविरुद्धकारणानुपब्धिः 3. साध्यविरुद्धभावानुलब्धिः, 4. साध्यविरुद्धव्यापकानुपलब्धिः 5. साध्य–विरुद्धसहचारानुपलब्धिश्चेति। एतेषामुदाहरणानि क्रमशः प्रस्तूयन्ते तथाहि

1. पुरुषेऽस्मिन् रोगद्रुतत्वं वर्तते आरोग्य–व्यापारानुपलब्धित्वात्—
2. अतस्तस्य कष्टं विद्यते इष्टसंयोगाभावात्।
3. वस्तु अनेकात्मकमस्ति एकान्तस्वभावनुपलब्धित्वात्।

4. अत्रच्छायाऽस्ति उष्णताऽनुपलब्धित्वात्।

5. मिथ्याज्ञानमस्मिन्नस्ति सम्यग्दर्शनानुपलब्धित्वात्।

(यो हेतुः स्वयमेव निषेधरूपो वर्तते (निषेधस्यैव साधकोऽस्ति) स एव अविरुद्धनुपलब्धिरस्ति, साध्याविरुद्धः)

1. स्वाभावानुपलब्धिरित्यादयः तस्य सप्त भेदाः कथ्यन्ते।

1. स्वभावानुपलब्धिः-भूतलेऽस्मिन् घटो नास्ति। उपलब्धियोग्य-सत्त्वेऽपि स हेतुः उपलब्धतां नेति।

2. व्यापकानुपलब्धिः-नास्त्यत्र पनसः तद्वृक्षाभावात्।

3. कार्यानुपलब्धिः-अत्र अप्रतिहतशक्तिमत्वमर्थात् यस्य सामर्थ्ये नास्ति कश्चिदवरोधः। एतादृशं बीजं नास्ति अङ्कुरादर्शनात्।

4. कारणानुपलब्धिः- अस्मिन् पुरुषे प्रशमादिभावो न वर्तते तत्त्वार्थ-श्रद्धात्वात्।

5. पूर्वचरानुपलब्धि-मुहूर्तान्ते स्वातीनक्षत्रोदयो न, साम्प्रतं चित्रोदयाभावात्।

6. उत्तररानुपलब्धिः-मुहूर्त्तात् पूर्वपूर्वभाद्रपदुदयो नैव जातः उत्तरभाद्र- पदुदयत्वाभावात्।

7. सहचरानुपब्धिः-पुरुषेऽस्मिन् सम्यग्ज्ञानाभावः सम्यग्दर्शन-रूपानुपलब्धित्वात्।

अनेन प्रकारेण प्रतीयते हेतोरेकलक्षणत्वमेव स्वीकृतं वर्तते। तथा च तदेव भिन्न-भिन्न-रूपत्वेन व्यपदिश्यते। यतोहि जैनतर्कभाषायामिदं स्वीकृतिपथमायाति यत् यस्मिन् अन्योपपत्तिनामकहेतोरभावो भवति तत् हेत्वाभासपदेन व्यह्रियते।

मम दृष्टिकोणेन जैनतर्कभाषायां यद्धेतोर्लक्षणं प्रदतं स्पष्टं क्षमञ्च प्रतीयते। यतोहि जैनतर्कभाषायां हेतुवादसिद्धान्तः स्पष्टतया निरूपितोऽस्ति। यतोहि अन्यथानुपपत्तेरन्योऽप्यर्थः तद्यथा न अन्यथोत्पद्यत इति।

अन्यथा+अनुपपत्तिः।

अन्यथा=भिन्नपथेत्यर्थः।

अन्=नास्ति भावः।

उत्पत्तिः=उत्पन्नं भवतीत्यर्थः।

अर्थात् (यस्मिन हेत्तौ शक्तिरियं स्यात् यत् साध्यं तदतिरिच्य केनचिदन्येन प्रकारेण नोत्पद्यते तदन्यथानुपपत्तिहेतुरुच्यते)

द्वितीयो हेतुः यशोविजयेन साध्योपपत्तिरूपेण स्वीकृतोऽस्ति— मद्दृष्टया साध्योपपत्तिहेतुरन्यथाऽपि व्याख्यायंते तथाहि साध्य उपयपत्तिः साध्यजन्यम् अर्थात् यस्योत्पत्तिः साध्येति भावः।

1. **साध्योपपत्तेरुदाहरणम्**—पर्वतो वह्निमान् साध्यसत्त्वे हेतुसम्भवात्। अतः अवश्यं तत्र धूमसत्ता।

2. **अन्यथानुपपत्तेरुदाहरणम्**—यतोहि वह्निधूमाभावाभावसत्वे धूमाऽभावसत्त्वम्।

तर्कभाषात्रयमाधारीकृत्य हेत्वाभासनिरूपणञ्जैनदृष्टया हेत्वभासस्य महत्त्वपूर्णं स्वीकृत्युपेता समीक्षा वैदिकतर्कभाषादृष्ट्या हेत्वाभास-निरूपणम्—

वैदिकतर्कभाषादृष्टया असद्धेतुः हेत्वाभासपदेन व्यवह्रियते। अर्थात् हेत्वभावेऽपि हेतुवद् भासते। हेत्वाभासशब्दस्य अर्थद्वयमङ्गीक्रियते। 1. आभासते इत्याभासः हेतोःआभासो हेत्वाभासः। फलतो यस्य ज्ञानमात्रेणाऽनुमितिकारणस्याथवा साक्षादनुमितेः प्रतिबन्धत्वं भवति तत् हेतुदोषपदवाच्यं हेत्वाभासपदवाच्यं वा विद्यते। अयं हि हेत्वाभासस्य प्रथमोऽर्थः।

द्वितीयार्थोऽनुहेतंवदाभासते। अर्थात् यो हेतुतुल्यत्वेन भासत इत्यर्थः। वस्तुतः दोषयुक्तकारणत्वात् यद्धेतुत्वं न प्रतिपद्यते, तद्धेत्वाभासपदवाच्यत्वेन व्यवह्रियते। अर्थात् असिद्धत्वादिदोष-संवलितस्यैव हेत्वाभासत्वमित्यर्थः।

अयं हि प्रकारणत्रयवत् सद्धेतो भिन्नो हेत्वाभासः अयमपि पञ्चप्रकारको भवति। 1. असिद्धः 2. विरुद्धः 3. अनैकान्तिकः 4. प्रकरण-समः 5. कालात्यापदिष्टश्चेति।

1. **असिद्धहेत्वाभासः**—तत्र ज्ञापकत्वरूपेण निश्चयत्वाभावात् हेतोरसिद्धहेत्वाभासरूपभेदः स्वीक्रियते। अयमपि त्रिविधः क–आश्रया-सिद्धः ख– स्वरूपसिद्धस्तथा ग– व्याप्यत्वासिद्धश्चेति।

(क) **आश्रयसिद्धः**-यथा आकाशकमलं सुगन्धितं भवति (प्रतिज्ञा) केवलं हि तस्य कमलत्वावच्छिनत्वात् (हेतु) सरोजन्यकमलवत् उदाहरणम् अत्र वर्तते हि आकाशकमलमाश्रयत्वेनोच्चरितं तथापि तद् भवतीति।

(ख) **स्वरूपासिद्धः**- शब्दोऽनित्यश्चक्षुर्ग्राह्यविषयत्वात्। अत्र चक्षुः हेतुपक्षे नं तिष्ठति शब्दग्रहणं चक्षुरसम्भवात्। शब्दग्रहन्तु श्रोत्रेन्द्रियजन्यमिति मन्यते। अतोऽयमस्ति स्वरूपासिद्धो हेतुरिति।

(ग) **व्यायत्वासिद्ध**—हेत्वाभासोऽयं व्याप्यवासिद्धो भवति त्रिप्रकारको यथा 1. यत्र नोपलभ्य तेहि व्याप्तेः ग्राहकं प्रमाणं किमपि। यथा शब्दः क्षणिकः प्रतिज्ञा, सत्त्वात्। आदि हेतुः।

शब्दो हि क्षणिकः शब्दक्षणिकत्वात्। तंत्सत्वात् (हेतुः) यत् सत्यं तन्नूनमेव क्षणिकम्। यता मेघपटलम्।

१. उपाधिभेदत्वात्—उपाधिसत्त्वेन यत्र कश्चित् हेतुर्यदि असिद्धो मन्यते तत्र साध्यधूमस्य अस्तित्वमङ्गीक्रियते तथा तत्रेदं दर्श्यते यत् साध्यधर्मः प्रदत्तहेतुनिमितत्त्वेन नापितु अन्येन निमित्तेन जायते। यथा 'अयोगोलको धूमवान् अग्निमत्वात्' अत्र अग्निमत्वहेतुसोपाधिकत्वेन व्याप्यात्वसिद्धो विद्यते। अत्र साध्यधर्मों धूमोऽस्ति। अयं धूमस्तु अयोगोलके नास्ति परन्तु तस्य अस्तित्वन्तु वर्तते एव अग्निनिमित्तत्वान्न अपितु आर्द्रेन्धननिमित्तेन जायते।

२. विरुद्धहेत्वाभासस्य लक्षणम्—साध्याभावत्वावच्छिन्नव्याप्तो हेतुर्विरुद्धः। यथा शब्दो नित्यः तस्य कृतकत्वात्, यथा आत्मा। यत्कृतकत्वं तस्याऽनित्यत्वं अतोऽत्र कृतकत्वहेतुरस्ति।

विरुद्धहेत्वाभासस्य लक्षणम् (साध्यविषर्ययो व्याप्तः). विषर्ययो विपरीतोऽथवाऽभाव उच्यते।

३. अनैकान्तिकहेत्वाभासः—सव्यभिचारोऽनैकान्तिको हेत्वाभास उच्यते। अयं द्विप्रकारको मन्यते 1. साधारणोऽनैकान्तिकः 2. असाधारणानैकान्तिकश्च।

क. साधारणानैकान्तिकः—यत्र पक्षः सपक्षो विपक्षश्चेति भवति। शब्दो नित्यः प्रमेयत्वात् आकाशवत्।

ख. असाधरणानैकान्तिकः—व्याप्तो हि सपक्षविपक्षयोर्भूत्वा केवलः पक्ष एवोपतिष्ठति। तदसाधारणानैकान्तिको वर्तते यथा भूमिर्नित्या तद्गन्धत्वात्। अत्र गन्धत्वं हि हेतुः प्रदर्शितः। स सपक्षत्वेन नित्यत्वेन तथा विपक्षोऽग्नित्वेन व्यावृतो वर्तते। केवलं पृथ्व्यामेव तिष्ठति। (व्यभिचारस्य अर्थो भवति-औचित्यस्य अव्यवस्थाया अतिक्रमणं, नियम-पूर्वकत्वेनास्थितिः) यो हेतुः साध्यत्वेन सह व्यवस्थितरूपत्वावच्छिन्नो न भवति स व्यभिचारपदवाच्यो मन्यते। तस्य नाम अनैकान्तिक-हेत्वाभासोऽस्ति। हेतोःसाध्यत्वेन सह व्यभिचारो द्विप्रकारको भवति-(क) क्वचित्तु हेतुः स्वोचितस्थलत्वावच्छिन्नेन सह तद्भिन्नेऽपि स्थले तिष्ठति,तत्र साधारणानैकान्तिको हेत्वाभासो ज्ञायते। यथा-सद्हेतुः पक्षे सपक्षेऽपि प्रविष्टो भवति। परन्तु विपक्षे न तिष्ठति।

4. प्रकरणसमः (सत्यप्रतिपक्षः)-विद्यमानो हि यस्य हेतो प्रति-पक्षः स सत्प्रतिपक्षपदेनोच्यते। प्रतिपक्षस्य अर्थो भवति साध्यविपरीतार्थेन साधकेनापरो हेतुः। यथा शब्दोऽनित्यः नित्यधर्मरहितत्वात्। (एतत्विपरीतार्थस्य साधकोऽपरो हेतुरस्ति-शब्दो नित्यो वर्तते तस्या-नियत्वधर्मरहितत्वात्। अयं प्रकरण-समो हि सत्पक्षो वर्तते।

5. बाधितविषयो वा कालात्ययापदिष्टः—बाधितविषयस्य अर्थोऽस्ति-यस्य साध्यधर्मो नान्यत्प्रमाणेन बाधितः स्यात्। अत्र विषयोऽर्थोऽस्ति, साध्यधर्मबाधस्य अर्थो वर्तते विपरीतार्थस्य निश्चयत्वमिति।

साध्यस्य विपरीतार्थस्य निश्चयो भवितुं शक्नोति प्रबलप्रमाणेनैव। अतोऽनेन प्रकारेण यस्य हेतुसाध्यस्य अन्यप्रबलप्रमाणेन बाधो भवितुमर्हति स बाधितविषयो हेत्वाभासो विद्यते।

उदाहरणम्— अग्निः अनुष्णः
कृतकत्वात्
जलवत्

अत्राग्नौ अनुष्णता सिद्ध्यर्थं यत् कृतकत्वहेतुत्वं प्रदत्तमस्ति, तस्य साध्यः (अनुष्णता) बाधितो भवति। स एव बाधितविषयो हेत्वाभासो वर्तते।

२. बौद्धर्कभाषाया दृष्टिकोणेन हेत्वाभासनिरूपणम्—

बौद्धतर्कभाषायां हेत्वाभासः साधनाभासत्वेन प्रोच्यते। साधनाभासस्य अर्थो भवति-यत्र न साधनत्वं परन्तु साधनाभासत्वं स्यात्। बौद्धतर्क-त्रिरूपात्मकलिङ्गमेव हेतुत्वेन स्वीकरोति। यदि एतेषु लिङ्गेषु किञ्चिदेकमपि लिङ्गं न्यूनं स्यात्तर्हि हेत्वाभासो मन्यते।

हेत्वाभासः—अयं हि त्रिविधः-1. असिद्धः 2. अनैकान्तिकस्तथा 3. विरुद्धश्चेति।

१. असिद्ध-हेत्वाभासः— यत्र पक्षे लिङ्गभावत्वमथवा सन्देहत्वं तत्र असिद्धो हेत्वाभासोऽस्ति। अतो लिङ्गे पक्षसंत्त्वाभावे असिद्धसन्देहसत्त्वे च संदिग्धासिद्धहेत्वाभासो भवति। अयमपि द्विविधो मन्यते-1. विशेषणासिद्धः तत्र विशेषण-सन्देहसत्त्वात्। 2. विशेष्यासिद्धश्चेति विशेष्यसन्देहग्रस्तत्वेन।

सन्दिग्धासिद्ध-हेत्वाभासः—स्वयं हेतोरथवा तदा सन्देहसत्त्वे सन्दिग्धासिद्धो हेत्वाभासः कथ्यते। स्वयं हेतुरेव असिद्धस्योदहरणमस्ति। यदा वाष्पादिभावेन पृथ्वीत्यादिभूतसमुदाये अग्निसिद्धिः क्रियते, तदा संदिग्धासिद्धो हेत्वाभासः प्रोच्यते।

२. अनैकान्तिकहेत्वाभासः—येना हेतुना साध्याभावसाध्यस्य च निश्चयो न भवति अपितु निश्चयमतिरिच्य सन्देह उत्पद्यते तदनैकान्तिको हेत्वाभासपदेनोच्यते।

उदाहरण— शब्दोऽनित्यः

प्रमेयादिहेतुत्वात्

अयं हि चतुष्प्रकारको भवति-

(क) सपक्ष-विपक्ष-व्यापि-हेतुः—शब्दोऽनित्यः प्रमेयत्वात् घटवत् आकाशवच्च। अनित्यत्वं ह्यत्र साध्यत्वं, अतो घटः सपक्षः तदनित्यवात् आकाशविपक्षत्वात्।

(ख) **सपक्षैकदेशवृत्तिहेतुः किन्तु विपक्षव्यापी**—शब्दो हि न प्रयत्नजन्यः तदनित्यत्वात् विद्युद्वत्, घटवत् आकाशवच्च। अत्र अनित्यत्वरूपं विद्युति वर्तते न च आकाशेऽमस्ति। अतोऽनेन प्रकारेण सपक्षैकदेशवृत्तित्वम् अन्यत्र च प्रयत्नजन्यत्वात् सर्वव्यांपि वस्तूनि विपक्षे वर्तन्ते। अतोऽनित्यत्वे व्यापकत्वमस्ति।

(ग) **विपक्षैकदेशवृत्तित्वं किन्तु सपक्षप्यापी**—शब्दो हि प्रयत्नजन्यः तदनित्यवात् घटवत्, विद्युद्वत्, आकाशवच्च। अनित्यत्वं ह्यत्र हेतुर्विद्यते। घटः सपक्षश्च तत् प्रयत्नजन्यत्वात्, विद्युत् आकाशश्च उभावपि विपक्षौ स्तः। अत्र हेतुः विषयैकदेशविद्युत्यस्ति। किन्तु आकाशे नास्ति। अयं हेतुः घटादौ सपक्षे सर्वत्र वर्तते। यद् वस्तु प्रयत्नजन्यं, तद् हेतुसपक्षव्यापि मन्यते।

(घ) **विपक्षैकदेशवृत्तिहेतुः तथा सपक्षैकदेशंवृत्तिहेतुश्च**—शब्दोऽनित्यः अमूर्तत्वात् आकाशादिवत्, परमाणुवत्, कर्मवत् घटवच्च। अत्र अमूर्तत्वं (हेतु)) सपक्षस्य विपक्षस्य उभयोरप्येकदेशवृत्तित्वयुक्तो वर्तते। उभयैकदेशे (सपक्षे) आकाशे तथा विपक्षकर्मणि च स्थितत्वात्।

3. **विरुद्धो हेत्वाभासः**—हेतोः द्विरूपत्वेन विपरीतनिश्चयः विरुद्ध-हेत्वाभास इत्युच्यते। उदाहरणं-शब्दो नित्यः कार्यत्वात्। अन्यदुदाहरणं यथा-शब्दो नित्यः कार्यत्वात्। अन्यदुदाहरणं यथा-शब्दो नित्यः प्रयत्नान्तरोत्पन्नत्वात्। अतोऽनेन प्रकारेण साध्याभावसिद्धकर्तृत्वकारणात् विरुद्धहेत्वाभासोऽस्ति।

जैनतर्कभाषादृष्टिकोणेन हेत्वाभासनिरूपणम्—

जैनतर्कभाषायां हेतोः मुख्यरूपेण एकमेव लक्षणं प्रदत्तम्। अन्यथानुपपत्तिः- यो हेतुरेतद् भिन्नोऽस्ति अर्थात् अयं हेत्वाभासपदवाच्यो भवति।

हेत्वाभासस्य त्रयोऽपि भेदा यशोविजयेन स्वीकृताः वर्तन्ते। 1. असिद्धः 2. विरुद्धस्तथा 3. अनैकान्तिकश्चेति।

अयं हेत्वाभासो द्विप्रकारको एतेनापि अङ्गीकृतः। यथा-(क) उभयसिद्धस्तथा (ख) अन्यतरासिद्धश्चेति।

(क) उभयासिद्धः-वादिप्रतिवादिभ्यामसिद्धो यो हेतुः स एव उभयासिद्धो हेत्वाभासत्वेन कथ्यते। यथा-परिणामी शब्दोऽस्ति।
चक्षुरादि-इन्द्रियविषयत्वात्, वादिप्रतिवादि-असिद्धत्वात्।

(ख) अन्यतरसिद्धः-यो नैकस्यापि सिद्धः। स च एव अन्यतरासिद्धो हेतुरुच्यते। यथा- 'वृक्षः अचेतनः वर्तते, विज्ञानेन्द्रियायुर्निरोध-रूपमरणत्वात्। तदुत्पत्तिमत्सत्त्वात् अतोऽयं हेतुः अन्यतरासिद्धो वर्तते।

अनयोः प्रथमो हेत्वाभासः जैनानां तथा अपरश्च सङ्ख्यानां मते न सिद्ध इति।

2. **विरुद्धहेत्वाभासः**-हेतुः यः साध्यविपरीतत्वेन सह व्याप्तः स्यात्, विरुद्धहेत्वाभासपदवाच्यो भवति।

यथा-शब्दोऽपरिणामी वर्तते,

ततकृतकत्वात्

अत्र कृतवहेतोरपरिमितवसाध्यात् विरुद्धपरिमितत्त्वेन सह स्वाप्तिरस्ति।

3. **अनैकान्तिक-हेत्वाभासः**—यस्य हेतोर्व्याप्तिः संदिग्धा स्यात्, स अनैकान्तिको हेत्वाभास इति कथ्यते। एतस्य द्वौ भेदावङ्गीक्रियेते। यथा-
1. निर्णीतविपक्षवृत्तिक-हेत्वाभासः विपक्षसत्त्वं यस्य संदिग्धं स निर्जीविपक्षवृत्तिकहेत्वाभासत्त्वेन व्यवह्रियते। यथा शब्दोऽस्ति नित्यः

प्रमेयत्वात्। अत्र प्रमेयतत्त्वहेतुर्यथा आकाशादौ सपक्षे तिष्ठति तथैव विपक्षोऽपि अनित्यघटादौ निश्चितरूपत्वेनोपतिष्ठतीति।
द्वितीयम् उदाहरणं-विवक्षितः पुरुषो न सर्वज्ञः।

तद्वकृत्वात्, अयं हि सन्दिग्धविपक्षवृत्तिकहेत्वाभासः प्रोच्यते-वक्तृत्वहेतुः विपक्षासत्वे कारणात् सन्दिग्धोऽस्ति। अत्र सन्देहत्वं वर्तते।

मम दृष्ट्या जैनतर्कभाषायां यो हेत्वाभासस्तद्भेदाश्च ज्ञापिताः सन्ति, त एव समीचीनतां समायान्ति यतोहि-तेनेदमङ्गीकृतं यत् यत्र अन्यथानुप-पत्तित्वं न स्यात् तथापि हेतोराभासत्वं प्रतीयेत-स एव हेत्वाभासः। एतस्य त्रयो भेदाः विद्यन्ते यथा 1. असिद्धः 2. विरुद्धस्तथा 3. अनैकान्तिकः। अर्थात् तैरिदं स्वीकृतमित्युपलभ्यते। यत्र हेतुरेतावान् प्रबलः स्यात् यदन्यप्रकारकस्य हेतोरावश्यकतैव न प्रतीयेत तथा साध्यसिद्धिः सम्पद्येत,

सैव सद्धेतुरस्ति। परन्तु यत्र हेतुर्नास्ति तथापि तदाभासत्वमुत्पद्येत यदत्र हेतुरस्ति, स एव हेत्वाभास इत्युच्यते। सीपीकादौ रजताभासत्वम् मरूमरीचिकादिभूमौ जलाभासत्वम्।

अनेन प्रकारेण हेत्वाभासस्य ये भेदास्तैः स्वीकृतास्त एव सुष्ठु वर्तन्ते यतोहि यः स्वयमेवासिद्धो वर्तते स कथमन्यस्य साधनं कल्प्यते, भवितुं शक्नोति वा। यथाऽस्माभिरिदं विचार्य्यतां यद् विद्युत् किमर्थं 'न वर्तते' आगच्छन्तीति। तथा चेत् विद्युच्छक्तिगृहमेव नष्टं जातं भवेत् विद्युतत्तन्तव एव खण्डिताः स्युस्तर्हि केन प्रकारेण विद्युदागमिष्यतीति।

द्वितीयो भेदो यस्तेन प्रदर्शितः स विरुद्धो वर्तते। यतोहि विरुद्धस्य तात्पर्यं भवति, यत्र विशेषरूपत्वेनावरुद्धता वर्तते। अर्थात् यत्र हेतुरनेन प्रकारेण स्यात् यत् साध्यत्वेन सह सद्धेतोरवरुद्धतां सम्पादयेत् स विरुद्धो हेत्वाभासोऽस्ति। यथा अयं घटः

स्पर्शत्वात्। अर्थात् अयं घटोऽस्ति स्पर्शत्वात्। अतोऽयं विरुद्ध-हेत्वाभासो वर्तते सर्ववस्तुस्पर्शविशेषगुणत्वात्। अथवाऽनेन प्रकारेण वक्तुं स्यात् यत् अयम् अग्निः शीतस्पर्शत्वात्

अत्र यच्छीतस्पर्शवत्वमस्ति। तत्र वह्नेः सद्धेतुत्वम्। अतो विरुद्धहेत्वाभासत्वम्।

तृतीयो भेदः-यस्य व्याप्तिर्निश्चिरूपत्वेनैकान्तिका न स्यात् यथा अयं विद्वान् अस्ति।

तद्वक्तृत्वात्। अत्र प्रदत्तं हि वक्तृत्वं यद्दृश्यते तत् विदुषि, मूर्खे, पशु-पक्षीत्यादौ सर्वेष्वपि वर्तते। अतोऽयम् अनैकान्तिको हेत्वाभासः।

इदं सर्वमवलोकन्यत्या मयैतत् ज्ञापनीयमस्ति यत् जैनतर्कभाषाया या विशेषता लब्धा सा अपेक्षावादः, अनेकान्तवादस्तथा अपेक्षावाद-सिद्धान्तश्चेति वर्तते।

1. अनेकान्तवादस्य सिद्धान्तः—यशोविजयेन स्वतर्कभाषायाम्[1] अनेकान्तवादं स्थापयता प्रोक्तं प्रत्येकं वस्तु अनन्तधर्मात्मकं भवति। अर्थात् प्रत्येकं द्रव्यम् अथवा सत्पदार्थपरिमित्वात् एकधर्ममपहाय अन्यमङ्गीकुरुते

1. *मोहनलालमेहता-जैनधर्मदर्शनम् पृ०358*

एतस्मात् स्वभावात् प्रत्येकं सद्वस्तुनः उत्पादस्तथा नाशश्च भवति। तथापि एवं सत्यपि सद्वस्तूनि परिणामशीलत्वेन स्वार्थतां न परिजहति। अयमुत्पादो व्ययश्च सदैव विद्यमानौ मन्येते। यत् ध्रौव्यपदवाच्यं जायते।

एतस्माद् विश्लेषणात् इदं ज्ञायते यत् उत्पादेन व्ययेन च सह प्रत्येकं ध्रौव्यनामको तृतीयो धर्मोऽपि वर्तते। यथा-यद् मृत्तिकातो घटो निष्पाद्यते-तर्हि घटस्य नाशः इति जातेऽपि उभयावस्थायां मृत्तिकायास्तद्भावः अर्थात् स्वरूपविद्यमानमेव भवति। अनेन प्रकारेण कस्यचित् तत्त्वस्य सत्वरूप-लब्ध्यर्थं तदनेकधर्मेषु मन्त्रणा कर्त्तव्या। एतदंनन्तरधर्मकारणात् वस्तु अनेक-(अनन्त) धर्मात्मकम् उच्यते।

एतदनेकान्तात्मकस्य वस्तुनो विश्लेषणार्थं 'स्यात्' शब्दो भवति प्रयुक्तः। यस्य अर्थात् कथञ्चित् भवति। स्याद्वादस्य आधारत्वेन इदं सत्यस्य अभिव्यक्तिः क्रियते यत् वस्तु एतद्रूपं नास्ति अपितु तदन्यद् रूपमपि वर्तते। अनेन 'स्याद्' इति शब्दः प्रयुक्तोऽस्ति-स्यात्-पूर्वकं यो वादः अर्थात् वचनमस्ति-कथनं वा वर्तते, एतदेव स्याद्वादपदवाच्यं वर्तते। अतोऽनेन दृश्यते यत् अनेकात्मकस्य अर्थस्य कथनस्य प्रयोग एव स्याद्-वाद इति ज्ञायते।[1] अन्यजैनचिन्तकानां मतानुसारं सत्यसाक्षात्कारे अनेकान्तवादः सहायको भवति वास्तविकेन तथा चैतदनेकान्तस्य प्रतिपादक-वादोऽथवा स्याद्वादो वा कथ्यते।[2] अतोऽयं सापेक्ष-सिद्धान्तः, अपेक्षावादः अथवा कथञ्चित्-वादोऽपि कथ्यते। यो विभिन्नदृष्ट्या वस्तुतत्त्वस्य निरीक्षणं कुरुते। स्याद्वादसिद्धान्तो विविधापेक्षाभिः एकस्मिन् वस्तुन्येव नित्यत्वेन अनित्यत्वेन, सादृश्यत्वेन विसदृशतात्वेन, वाच्यत्वेन अवाच्यत्वेन सत्तात्वेन असत्तात्वेन परस्परविरुद्धत्वेन प्रतीयमानधर्माणां निर्विरोधमुत्पाद्य तस्य सुन्दर एव बुद्धिसङ्गतः समन्वयः अनेन स्याद्वादेन उपस्थाप्यते।[3]

---

1. लघीयस्त्रय टीका-62
2. देवेन्द्रमुनिशास्त्री-धर्म और दर्शन पृ०100
   जैन धर्मस्यैतिहासिकी रूपरेखा-बृ०197-198
3. तत्त्वार्थसूत्रम् 10.5. जै.की.ए.रु.रे

अतोऽनेन प्रकारेण अनेकान्तवादः सत्यस्य पर्यायो वर्तते अर्थात् पर्यायवाचिदर्शनमस्ति। अनेकान्तदृष्टौ प्रत्येकमपि वस्तु नित्यमनित्यञ्च भवति। जीवद्रव्याविनाशभावात् पर्यायपरिवर्तनत्वाच्च।

तत्त्वार्थसूत्रे इदमुपलभ्यते[1] यत् प्रत्येकं सत्यपदार्थ उत्पादो व्ययरूपात्मकस्तथा ध्रौव्यात्मकोऽपि वर्तते। अर्थात् सत्पदार्थात् पर्यायात् वोत्पन्नं विनिष्टं जायमानमपि द्रव्यत्वात् ध्रुवं विद्यते। अत्र जैनमते न कदापि सतो नाशत्वं भवति तथा असतः उत्पत्तिरेव वा भवति।[2]

सूत्रकृताङ्गे वस्तुतत्त्वं जीव-शरीर-रूपत्वेनाऽङ्गीकृतमस्ति। अनेकान्तवाद एव स्पष्टसम्बोधाय सप्तभङ्गीनय इति कथ्यते।[3] अर्थात् सप्तप्रकारकाणां विचाराणां कल्पना कृताऽस्ति। या निश्चयार्थज्ञानं प्रति अत्यन्तमुपयोगिन्यः विद्यन्ते। इमे सप्तप्रकारका विचारा यथा-

१. स्याद् अस्ति।

२. स्याद् नास्ति।

३. स्याद् अस्ति, नास्ति च।

४. स्याद् व्यक्तम् अस्ति।

५. स्याद् अव्यक्तम्।

६. स्याद् अस्ति तथा अव्यक्तमपि वर्तते।

७. स्यादस्ति च नास्ति च, अव्यक्तव्यम्।

अनेन प्रकारेण दृष्टं यत् यशोविजयेन अनेकान्तवाद-सिद्धान्तमाश्रित्येदं ज्ञापयितुं प्रयतितं यत् एकमेव वस्तु एककाल एव अस्ति नास्ति च। तथापि तदस्तित्वं सार्वकालिकं ज्ञायते।

तेनेदमङ्गीकृतमस्ति सद् उत्पादविनाशध्रौव्यगुणैः युक्तो भवति[4] तथा इदमेव यत्किञ्चित् सर्वमस्ति। न सत्यं केवलं कूटस्थं क्षणिकम्, न केवलं नित्यम्-अनित्यम्, तथा न च तत् तदेव सर्वमस्ति।[5]

---

१. तत्त्वार्थसूत्रम् १०.५ जै.की.ए.रु.रे

२. पञ्चास्त्रिकाय १५ पृ. १९४-१९५

३. स्याद्वादमञ्जरी २३

४१. स्थानाङ्गसूत्रम् १०

५. उमेश मिश्र-भारतीय दर्शन पृ. १२५-३०। जै.ध.की.रू.पृ. १९७

स्याद्वादसिद्धान्तमाधारीकृत्य तस्य दृष्टिरतएव दृष्टाऽसीत्। यतोहि तेन न कस्यापि सिद्धान्तस्य निन्दनं कृतमिति। सूक्ष्मदृष्ट्याऽलोकनेनैतद् ज्ञायते यत् अयं कस्मिंश्चिदपि सम्प्रदाये स्वीक्रियते तत् प्रचारकत्वेन परन्तु स महान् तत्त्वदर्शी तथा विचारकोऽस्ति। यथा कलहसम्पन्नात् संसारात् दूरं विशुद्धसमाजस्य पोषको स्थितो भविष्यति। यस्मात् कारणात् तेन न केनापि स्थापितमतस्य खण्डनमक्रियत। स्यादित्यस्य सम्भवार्थत्वात्। यः अत्यन्तमेव प्रचलितः शब्दोऽस्ति।

तथा चैतस्य तात्पर्यमपि तदेव भविष्यति यत् यशोविजयेन स्वीकृतो वर्तते। अर्थात् सर्वतत्त्वदर्शिप्रतिपादितसिद्धान्तोऽङ्गीक्रियते तत्रैवाऽयं स्याद्वादसिद्धान्तः स्थाप्यते।

द्वितीय-विशिष्टता, नयवादस्य सिद्धान्तः—

नयसंबंधव्यवहारपदवाच्यो भवति, नयः स स्वीक्रियते यत्र अनन्त-धर्मात्मकं वस्तुनः केवलमेकदेशस्य ग्रहणं तथापि प्रमाणं सम्पूर्णदेशस्योप-लभ्यते अर्थात् वस्तुनः सम्पूर्णांशस्य ग्राहकं भवति। यथा समुद्रस्यैकांशो न समुद्र इत्युच्यते वक्तुं शक्यते न असमुद्र एव कथयितुं शक्यते। अतोऽनेन प्रकारेण नयो न प्रमाणं न च अप्रमाणमेव। अपि त्वयं प्रमाणस्यैवैकांशो विद्यते।

नयस्य द्वौ भेदौ

१. द्रव्यार्थिकनयः २. पर्यायार्थिक नयश्च।

यः प्रधानरूपेण केवलं द्रव्यमेव गृह्णाति स द्रव्यार्थिकनयः तथा च यः प्रधानरूपत्वेन पर्यायमात्रस्य ग्राहको भवति सः पर्यायार्थिकनय इत्युच्यते।

द्रव्यार्थिकनयः त्रिप्रकारकोऽस्ति—

१. नैगम २. संग्रहस्तथा ३. व्यवहारश्चेति।

पर्यायार्थिकनयस्य भेदचतुष्टयं

१. ऋजुसूत्रम् २. शब्दः, ३. समभिरुद्ध स्तथा ४. एवम्भूतश्च।

नय एकांशस्यैव ग्राहको भवति, परन्तु नैगमो नयः द्रव्यस्य पर्यायस्य उभयग्राहत्वेनाभिधीयते। परन्तु तत्राप्येकं स प्रमाणमभिमनुते अन्यम-प्रधानमिति अर्थात् अपरमप्रधानरूपत्वेन गृह्यते अतएव स प्रमाणस्य अन्तर्गतत्वेन नाङ्गीक्रियते। प्रमाणस्य द्रव्यपर्याययोः समानरूपत्वेन ग्रहणत्वात्।

द्रव्यनयस्योदाहरणम्—एतत् पुष्पमस्ति। अत्र पुष्पगुणान् तदभिन्नान् मत्वा केवलं तदाश्रितरूपत्वेन कल्पनाऽस्ति। अयं हि विशेषदृष्टिकोण एव द्रव्यनय इत्यभिधीयते।

एतद्विपरीतं यदा गुणानां प्रार्थक्ये बलपूर्वकं द्रव्यं केवलं बौद्धिककल्पनयाऽनुमीयते। तदा अस्मिन् अस्मिन् स्थितिविशेष एकस्य विशेषनयस्योपलब्धिर्जायते। स एव पर्यायनयपदवाच्यो भवति।

द्रव्यार्थिकनयस्य भेदानां स्वरूपम्

१. नैगम नय[1]—संसारे प्रत्येकं वस्तुनः स्वरूपद्वयं भवति—१. सामान्यं २. विशेषश्चेति। यथा—कस्यचित् पुरुषस्य हस्ते पुस्तकमस्ति। यदि स पृच्छयेत यत्तव हस्ते किमिदमस्ति तथा स कथयेत् यत् पुस्तकमस्ति। तर्हीदमस्ति तत्पुरुषस्य तत्पुस्तकेन सह सामान्यदृष्टिकोणः। अर्थात् सामान्यदृष्टिकोणत्वेन पुस्तकसम्बन्ध्यालोचनानामभावो वर्तते। अयमेव नैगमनयपदवाच्यं भवति। जैनिनां मतानुसारं न्याय-वैशेषिकसिद्धान्तोऽपि एतस्यैवोदाहरणरूसवेन लभ्यते।

२. संग्रहनयः—संग्रहनयः स दृष्टिकोण उच्यते यत्र समस्तसामान्यगुणानां वर्णनं क्रियमाणं विशेषगुणानाम् उपेक्षा क्रियते। एतद्दृष्टिकोणानुसारं सामान्यातिरिक्तं विशेषस्य न किमप्यस्तित्वं भवति।

---

१. संग्रहोमन्यते वस्तु सामान्यात्मकमेव हि।
सामान्यमतिरिक्तोऽस्ति न विशेषः खपुष्पवत्॥
(नयकणिका श्लोक ७१), नयकणिका श्लोकः ८-१०

३. व्यवहारनयः—संग्रहनय विरूद्धत्वेन यदा सामान्यं तिरस्क्रियते, केवलं विशेषस्य महत्वमुपस्थाप्यते तदा एको भिन्नो[1] दृष्टिकोण उपत्पन्नो भवति। अयमेव व्यवहारनय इत्युच्यते। अत्र बोध्यते इदं यत् न कापि सत्ता पृथक् सामान्यातिरिक्तं विशेषस्य क्वचिदस्ति। नय कस्मैंचित् पुरुषाय फलमिति यदि आदेशो दीयते-तर्हि यदा स समर्थो भविष्यति।

अतः सामान्यदृष्टिकोणेन सह विशेषदृष्टिकोणस्यापि उपयोगिता व्यावहारिकजगतः कृते आवश्यकी वर्तते।

अतएव इदं सिद्धं जायते यत् नास्ति विशेषातिरिक्तं सामान्यस्य सत्ता।

अयं दृष्टिकोणः सांख्या दर्शने उपलभ्यते। यतोहि तेनेदं स्वीकृतमस्ति यत्–न भिन्ना प्रकृतिः सत्वरजस्तमेभ्यः।

पर्यायनयस्य भेदः

ऋजुसूत्रनयः[2]—ऋजुसूत्रनये अतीतानागतरूपाणां ध्यानं न दीयते यथा—कश्चन भिक्षुकः केनचिद् वक्तव्यः स्यात् यत् तव पूर्वजन्मानि पुत्रो राजकुमार आसीत् अथवा भविष्यति तत्दायदः एकः धनी पुरुषो भविष्यति तर्हि कथनस्यमिदं तद्भिक्षुक कृते न महत्त्वपूर्णतां यास्यति। एतन्नयस्य महत्ता बौद्धदर्शने उपलभ्यते। यत्र वस्तु तदतीताऽवस्थाभ्यः पृथक् केवलं गुणानां सञ्चयमात्रं मतमस्ति।

५. शब्दनयः—शब्दनये वस्तु[3]पर्यायवाचिशब्दानां द्योतकत्व-मेकस्मिन्नेवार्थे मन्यते।

उदाहरणम्—कुम्भः कलशो घटश्च एकस्मिन्नेव अर्थविशेषे त्रयाणामपि शब्दानां प्रयोगो विहितोऽस्ति। शब्दनयस्य कस्याञ्चिदपि स्थितौ पर्यायावाचिशब्दानां अर्थो नाङ्गीकृतो वर्तते।

---

१. भारीतयदर्शन का सर्वेक्षण ले. संगमलाल पा. से।
पब्लिशिंग हाउस, इलाहाबाद, संसाधित संस्करण १९८४

२. नयकणिका श्लोकः ११-१२

३. नयकणिका श्लोकः १४

६. **समाभिरूढनयः**—समभिरूढनयानुसार येन प्रकारेण अपर्यायवाचिशब्दानाम् अर्थेषु भेदो विधीयते तेन प्रकारेणैव पर्यायवाचिशब्दानाम्। घट-कंलश-कुम्भानं अर्थेष्वपि यत्किञ्चित् भेदस्तु स्वीकृत एवाऽस्ति। पर्यायवाची शब्दो यद्यपि एकार्थस्य द्योतकोऽस्ति। तथापि शब्दव्युत्पत्तिमाश्रित्य तेषु भेदोपपत्तिर्जायते।

उदाहरणार्थम्—घटः तत् वस्तूच्यते यत्र घटशब्दो विद्यमानः स्यात्।

७. **एवम्भूतनयः**—यदा कस्यचिच्छद्रस्य माध्यमेन निर्दिष्टार्थानां निश्चयं केवल तत्कालिकमेव भवति। यदा स स्ववीयस्वभाविककार्येषु रतो भवेत्।

एवम्भूतनयमवलम्व्य यस्मिन् समये योऽर्थः स्वकीये यस्मिन् स्वभाविककार्ये रतो भवति, तस्य तदाधारमाश्रित्य नामकरणं क्रियते। यतोहि जलपात्रं यदा शब्दं कुरुते-तदैव स घट-शब्देनाभिधीयते। एतेनेदं स्पष्टं ज्ञायते यद् एवम्भूतनयः समभिरूढनयस्याऽस्पष्टभावानाया प्रकटीकरणस्ति।

अनेन प्रकारेण यदाऽवलोक्यते यत् नयवादस्य दृष्टिकोणोऽस्मान् ज्ञापयति यत् कश्चिदपि दृष्टिकोणो निरपेक्षरूपत्वेन सत्यं न मन्यते। इदमेव कारणस्ति यत् सर्वैः दार्शनिकैः स्वसिद्धान्तः सत्यत्वेन मन्तुं तत्परैर्दृश्यते। यस्मात् कारणात् मतविभिन्नता स्वचरमोत्कर्षेऽस्ति। तथा अन्येन प्रातिपादितस्य सिद्धान्तस्य खण्डनं स्वसिद्धान्तसत्यत्वं चोपस्थापयन्ति। यो दोषो वर्तते। सर्वसिद्धान्ता आपेक्षिकरूपेण सत्या। अतो नयवादः स्याद्वादिस्थान्तस्य प्रथमसोपानरूपत्वेनापि वक्तुं शक्यते।

यशोविजयस्य तर्कभाषायां प्रासविशिष्टता याः नयवादः, स्यादवादः, निपेक्षप्रकरणनाम्नोच्यन्ते तदत्यन्तमेव श्लाध्यमस्ति-स्याच्छब्देऽस् धातुप्रोयगत्वात्, यस्यार्थो भवति (भवितुं शक्नोति)।

---

१. *नयकणिका श्लोकः १५*

अर्थात् यशोविजयेन स्वीयतर्कभाषायामिदं सिद्धं कर्तुं प्रयत्नः कृतः यत् सर्वेऽपि दार्शनिका अन्यप्रतिपादिसिद्धान्तं स्याद्वाद् दृष्ट्याऽवलोकयन्तु। अनेन करणेन न कापि विभिन्नताऽपत्तिस्तथा सर्वेषां सिद्धान्तः स्वीयदृष्ट्या सत्यो भविष्यति। सिद्धान्तोऽस्मिन् उदारताया भावना स्पष्टरूपेण दृश्यते।

अपरः सिद्धान्तो यो नयवादस्य अस्ति

तस्मिन् विषयेऽपि मम दृष्टिकोणो वर्तते यत् नयस्य एकः अर्थः नयनमपि भवति। यथा वृक्ष-शाखा यदा अधो नीयते फलादित्रोटनार्थं तर्हि प्रोच्यते यत् शाखा अवनता क्रियताम्। इदं यत् सिद्धान्तरूपत्वेन ज्ञापयितुं प्रयत्नः करिष्यते तर्हि कथमपि कश्चन दृष्टिकोणो निरपेक्षरूपत्वेन सत्यो न भविष्यति। अर्थात् सर्वेऽपि दार्शनिकसिद्धान्ताः परस्परं नताः भवन्ति। एतस्मादेव कारणात् सर्वे सिद्धसन्ता सापेक्षत्वेन सत्या मन्यन्ते।

निक्षेप-प्रकरणम्-यत्र व्यवहारेण सहार्थस्य कश्चिद् न सम्बन्धो भवति तत्र निक्षेपनाम्ना निरूप्यते। अर्थात् शब्दार्थयोरेतादृशी रचना निक्षेपपदवाच्या भवति यत्र प्रकरणानुसारं यथा-स्थानम् अप्रतिपत्यादिंनां निवारणं भूत्वा विनियोगो जायते।

लघीयस्त्रये प्रोक्तमस्ति यत्-निक्षेपस्य सार्थकता इयमेवास्ति यत् तया अप्रस्तुतार्थस्य निषेधः प्रस्तुतस्य अर्थस्य निरूपणं स्यात्।

अयं निक्षेपश्चतुष्प्रकारको भवति-१. नाम, २. स्थापना, ३. द्रव्यं ४. भावश्चेति।

१. **नामनिक्षेपः**—प्रकृत्यादिनामपेक्षास्थापयितृत्वेन पदार्थस्य परिणतिः नाम निक्षेपोऽस्ति। साङ्केतिकशब्दा अपि नाम-निक्षेप एवागच्छन्ति। यथादेवाधिपतिः (इन्द्रः)

तात्पर्यमिदं वर्तते यत् केनचित् स्वपुत्रस्य नाम इन्द्र इति कृतम्। यद्यपि इन्द्रशब्दः शक्रवाचको वर्तते। परन्तु पुत्रनाकरणे वास्तविकार्थे दृष्टिर्न दीयते। एतदतिरिक्तं ये शब्दाः अन्यार्थे नियता न सन्ति, तेऽपि यदा

कस्यचित् अभिधानभूता भवन्ति तर्हि नामपदवाच्या ज्ञायन्ते। नाम-पदार्थ-नामवत्-पदार्थयोरूपचारत्वेन भेदो मन्यते। अतः इन्द्रनाम पुरुषोऽपि इन्द्र इत्युच्यते तथा च यः शक्रवाचक इन्द्रशब्दो वर्तते सोऽपि इन्द्र एव कथ्यते।

२. **स्थापनानिक्षेपः**—मूलभूतार्थेन यद् वस्तु रहितं स्यात् किन्तु तदभिप्रायत्वेन स्थापितं स्यात् तदेव स्थापनानिक्षेप इत्यभिधीयते। यथा-जिन प्रतिभा (स्थापना जिनस्य) तथा इन्द्रस्य प्रतिभा (स्थापनेन्द्रः) अस्ति।

३. **द्रव्यनिक्षेपः**—भूतभावस्य (पर्यायस्य) अथवा भावि-भावस्य यत् कारणं निक्षिप्तं क्रियते-तदेव द्रव्यनिक्षेप इत्युच्यते। यस्मिन् घटे भूतकाले घृतं स्थापितमासीत् अथवा भविष्यति स्थापितं करिष्यते। स वर्तमान-कालेऽपि घृत-घट एव प्रोच्यते। अनेन प्रकारेण यो भूतकाले इन्द्र पर्यायस्य अनुभवं लब्धवात् अस्ति अथवा भविष्यति काले करिष्यति, स वर्तमानेऽपि इन्द्रपदवाच्यो भविष्यति। अयमेव द्रव्य निक्षेपो वर्तते। क्वचित् अप्रधानतायामपि द्रव्यनिक्षेपः प्रवृत्तो जायते। यथा हसन्तीमर्दनशीलाचारः द्रव्याचारपदवाच्यो भवति। अत्र द्रव्याचारस्य केवलं तात्पर्यम् आचारगुणरहितत्वकारणेन अप्रधान आचारः।

क्वचित् उपयोगशून्यताऽपि द्रव्यत्वेनोच्यते। यथा उपयोगरहितत्वेन ऐहिकपारलौकिककांक्षया वा भक्तिपूर्वकं करिष्यमाणा जिनपूजादिक्रिया द्रव्य-क्रियावाच्येन कथ्यते। अपयोगशून्यक्रियाऽसाक्षात्मोक्षकारणत्वात्। भक्त्या सह कालेन सम्पादयिष्यमाणा सा क्रिया परम्परया मोक्षकारणत्वेन द्रव्यक्रियेत्यभिधीयते।

४. **भाव निक्षेपः**—विवक्षितक्रियाऽनुभूतियुक्तत्वं यत् स्वतन्त्रनिक्षिप्तत्वं क्रियते तद्भाव निक्षेप इत्युच्यते।

यथा वर्तमाने इनक्रियासम्पादयितृत्वेन भावेन्दोऽस्ति। वस्तुतस्तु यदीदं दृश्येतद तर्हि नामादयोऽपि वस्तुपर्यायभूता एव सन्ति। अतएव साधारणतया अत्रापि भावत्वमुपपद्येत। अथवा इदमेव वक्तव्यं स्यात् यत् भावकारण-

त्वावच्छिन्नत्वेन रूपादावेव नामादित्रयाणमुपयोगो भवति। यतोहि जिन इत्यभिधानेन जिनस्य स्थापना तथा मृतमुनिदेहदर्शने न भावे उल्लासस्य अनुभवो जायते।

अनेन प्रकारेण प्रत्येकं वस्तुनां स्वीयम् अभिधानमुपलभ्यते। स्वीयाऽकार एव स्थापनेति। स्व-स्व-कारणता एव द्रव्यमस्ति तथा च वर्तमानरूपं तत्स्वयमेव भावोऽस्ति। अतः ज़गति समस्ता अपि पदार्थाः नामादिचतुष्टमयाः सन्ति। अयमेव नामनयस्य, स्थापनानयस्य, द्रव्यनयस्य भावनयस्य च समुदयवादो वर्तते।

मम दृष्टिकोणेन निक्षेपशब्दो (नि) उपसर्गपूर्वकं (क्षिप्) धातो निष्पन्नोऽस्ति। अर्थात् यत्र व्यवहारेण सह अर्थस्य न कश्चित् सम्बन्धो भवेत्। अत्र क्षेपणस्य अर्थः स्वरूचिर्वर्तते। अतएव अस्माभिरिदं वक्तुं पार्य्यते यत् यदा शब्दानां प्रयोगोऽनेन प्रकारेण स्यात् यत् व्यावहारिक दृष्टिकोणस्य वास्तविकदृष्टिकोणेन न कश्चन सम्बन्धः स्थापितः स्यात्। अर्थात् स्वरूचेरनुसारं भवेत्। तत्स्थलमेव निक्षेपवादनाम्ना ज्ञायते।

यथा—यदि कस्यचिन्नाम धनपतिः क्रियेत तथा स दरिद्रपतिः स्यात् एवमेव कस्यचिन्नाम वाचस्पतिस्स्यात् तथा अयञ्च मूर्खो भवेत्। अनेन प्रकारेण अन्यशब्दा अपि सन्ति। यत्र अर्थाणां कश्चिदपि सम्बन्धो न स्यात्। स्वेच्छया व्यवह्रीयते यत्र।

अनेन प्रकारेणाऽवलोकितं यत् त्रितर्कभाषासु युगानुरूपा जैनतर्कभाषा मह्यं रोचते। अर्थात् अहं जैनतर्कभाषाम्प्रति श्रद्धां दधामि। एतद्भाषा-सारल्यात् सुगमावबोधत्वाच्च यदाधुनिकप्रचलितेभ्यः शब्देभ्यः सर्वथाऽभिन्नमस्ति अर्थात् सन्निकटं वर्तते।

अपरा वार्त्ता एषाऽस्ति यदनेन स्याद्वादसिद्धान्तद्वारा ज्ञापयितुमिदं प्रयासोऽभिविहितः कृतो वा यत् सर्वदार्शनिकानां दृष्टिकोणः स्वस्मिन् सत्योऽस्ति। न कर्तुं शक्यते कस्यचिदुपेक्षा। अत्र परिलक्ष्य.ते हि तस्य उदारो दृष्टिकोणः। यद् अन्योभयतर्कभाषायमनुपलभ्यते। उभयतर्कभाषायाः

सम्प्रदायविशेषसिद्धान्तस्थापनात्वात्। परन्तु यशोविजयस्य कथनमिदस्ति यत् कश्चिदपि दृष्टिकोण एकान्तिकरूपेण सत्यो न भवति। यस्य प्रेरणा नयवादद्वारोपलभ्यते।

तृतीया विशेषता-निक्षेपप्रकरणं तेन व्यावहारिकजगतः कृते उत्तममङ्गीकृतम्। यतोहि अस्माभिर्यदि अर्थमाधारीकृत्य नामकरणं करिष्यते तर्हि न साफल्यं प्राप्येत। एतस्यांमवस्थायां व्यावहारिकजगति बाधा उत्पन्ना भविष्यति। इमाः सर्वा अपि विशेषताः दृष्टिगताः कृत्वैव मयाऽस्मै महत्त्वं प्रदत्तमिति।

उपसंहारः

मानवप्रवृत्तिः स्वभावत एव जिज्ञासात्मिका भवति। मानवो यदा जनिं लभते तदाप्रभृत्येव जगदिदं तत्कृते आश्चर्यमयं प्रतिभाति। आश्चर्यस्येयं प्रारम्भिकी भवत्यवस्था, यामसौ रुदन्विलपन्वा व्यत्येति गमयति वा। इत आरभ्य तस्य जिज्ञासात्मकस्वरूपस्य एका शृंखला दृष्टिगोचरीभवति। अस्यामेव शृंखलायां मानवजीवनस्य पक्षद्वयं स्वीक्रियते ययोस्सामञ्जस्य एव मानवजीवनस्य सन्तुलनं स्थिरं भवति। अनयोरेकतरस्यापि अतिरेकाज्जीवनचक्रं दोलायमानमिव संतिष्ठते। एतच्च पक्षद्वयं बुद्धिहृदयात्मकं भवति। विश्लेषणं बुद्धेस्तथाहि संश्लेषणञ्च हृदयस्य कार्यमतएव एतयोर्मध्ये भवति परस्परं सामञ्जस्यम् अर्थात् परस्परं सहयोगः। अस्मादेव कारणादिह जगति बुद्धिप्रधान-हृदयप्रधानमानवाः कोटिद्वये विभक्तास्सन्तः प्राप्यन्ते। अथ बुद्धिप्रधानमानवस्तार्किक इति उच्यते योऽयं किमपि वस्तु कमपि सिद्धान्तं वार्तां वा युक्तयाऽथवा तर्केण वा सिद्धयति। अथ हृदयप्रधानः कविरित्याख्यायते। दार्शनिके तूभयोरपि भवति सामञ्जस्यम्। इदमेव कारणं यद्भारते वर्षे विभिन्नसम्प्रदायवादिनां दार्शनिकाणामविर्भावोऽभवत्। इमे समेऽपि दार्शनिकाः भागद्वये विभक्तुं शक्यन्ते, तत्राऽऽदौ प्रथमो भागः श्रौतानान्तथाहि द्वितीयो भागः तार्किकाणाम्। ननु श्रौताः दार्शनिकनाम्मूलतत्त्वामन्वेषणे श्रुतीरेव कारणत्वेन स्थापयन्ति, इमे 'वेदवादिन' इति निगद्यन्ते येषु शंकराचार्यः, पाणिनिः जैमिनिरित्यादयो वर्तन्ते। इतरे तार्किकदार्शनिकाः दार्शनिकानाम्मूल-तत्त्वानामन्वेषणे तर्कमेव साधनत्वेन अनुमोदयन्ति। तर्कस्यैवापरं नामानुमानम्। एतेषामपि भेदद्वयं तत्राऽऽद्याः आत्मानं स्पष्टतया तार्किका इति उद्घोषयन्ति, तथाऽपरे श्रौत्रास्सन्तोऽपि तर्कानधिश्रयन्ति। अनयोभेदस्तु इयान्नेव यत् श्रौतपक्षे वेदानां स्वतः प्रामाण्यमथ तार्किकपक्षे परतः प्रामाण्यम्। बादरायण-रामानुजमाध्व-सम्प्रदायस्थतार्किकाणानुसार-

मुपनिषद एव तेषां प्रमाणम्, किन्तु वेदवाक्यानां यथा कृत्वा व्याख्या एभिस्तथा त्वेते प्रच्छन्नतार्किका इव प्रतिभान्ति। उदाहरणतया जीवब्रह्मणोरेकतायाः निर्देशकस्य 'तत्त्वमसि' इति वाक्यस्य व्याख्या उभाभ्यामपि कथं कृतेति अवलोकनीया एव। इह रामानुजदशा त्वयन्तं दयनीया एव[1]। असौ निजश्रीभाष्ये शंकराचार्यमुपहसति यच्छंकरः स्रौतमतव्याजेन बौद्धधर्मस्य प्रचारं कुरुते। एतद् विपरीतं रामानुजः वेदमतं प्रचारयन् प्रच्छन्नस्तार्किक एव। एतेनेदं सिद्ध्यति यत् योऽपि सांसारिक उत असारसंसारभवपारं जिगमिषुर्वा वर्ततेऽसावपि तर्कं समाश्रयत्येव। इदमेव कारणत्वेन नियोजयता गंगेशोपाध्यायेनावोचि दुःखपङ्कनिमग्नसंसार सांसारिककोद्धारेच्छयैव परमकारुणिकेन मुनिना सर्वविद्यासु आन्वीक्षिक्येव श्रेष्ठतमा मता। परं यदा तर्कः स्वसिद्धान्तस्थापनायै परमतखण्डनाय चावलम्ब्यते तदा सिद्धान्तभेदादत्र तर्केऽपि भेद आवश्यकः। अमुनैव कारणेन भारतीयस्तर्कः भेदद्वये विभक्तः तत्र हि आद्यो वेदानुकूल- स्तर्कस्तथाहि द्वितीयो वेदप्रतिकूलस्तर्क इति। इहावधेयं यद्वेदानुकूलोऽसौ तर्क वैदिकस्तर्क इति तथाहि वेदप्रतिकूलस्तु बौद्धस्तर्क इति परिचाय्यते।

वैदिकतर्कस्थापना केशवमिश्रप्रणीततर्कभाषायां वैदिक- तर्काऽचार्याणानुरूपं दरीदृश्यते तथाहि बौद्धतर्कस्थापना यथाशास्त्रं मोक्षाकारगुप्तेन बौद्धतर्कभाषायामथ जैनतर्कस्थापना यथाशास्त्रं यशोविजयेन जैनतर्कभाषायां कृता वर्तते। एतास्वपि बौद्धतर्कभाषा प्रथमं ततो वैदिकी जैमनीया च तर्कभाषा रचनात्वं गता, या इमे रचनादृष्ट्या समकालीना एव मन्यन्ते। एतदनुसारं तथाहि तिसृणामपि तर्कभाषाणामाधारे यत्तर्कस्वरूपमुपलभ्यते तत्परिगणनं अधः प्रस्तूयते—

वैदिकबौद्धजैनतर्कभाषाणां तार्किकविशेषतानां समीक्षाद्वारा यत्स्वरूपमस्माभिः प्राप्यते तन्निम्नतया दर्शयितुं शक्यतेऽर्थात् एतासु षड् अध्यायास्सन्ति प्रथमेऽध्याये ऐतिहासिकदृष्टिकोणदृष्ट्या वैदिकतर्कभाषायाः बौद्धतर्कभाषायास्तथाहि अनन्तरञ्जैनतर्कभाषायाः महत्त्वं स्वीकृतं वर्तते।

---

१. *सर्वदर्शन संग्रह–पृ. २४७*

वैदिकसाहित्ये—

ऐतिहासिकविकासदृष्ट्या वैदिकतर्कभाषायाः महत्त्वं वर्तते। अत्रेदं स्वीकृतं वर्तते यत्तर्कस्वरूपं वैदिककाले द्विविधमासीत्। (१) परतः प्रमाण्यवादः। (२) स्वतः प्रामाण्यवादश्च। तत्र हि वेदप्रामाणिकतायाः निर्धारणम् यैस्तर्कमाध्यमेन कृतं ते परतः प्रामाण्यवादिनस्तथाहिः यैः वेदवाक्यमेव प्रामाणिकमिति स्वीकृतं ते स्वतः प्रामाण्यवादिन इति कथ्यन्ते स्म। न्यायवैशेषिक उभेऽपि तर्कप्रधानभूतत्वात् परतः प्रामाण्यवादिनि स्तः। इत्थं तर्कशास्त्रस्य प्रधानतया द्वे शाखे स्वीकृते स्तः (१) न्यायशाखा (२) वैशेषिकशाखा च। तत्र हि वैशेषिकं प्रमेयप्रधानं विद्यते यतोहीदमपवर्ग-विषये विशेषतया बलं ददाति। साध्यप्रधानयुगे आत्मान्वीक्षणस्योपरि विशिष्टमेव किमपि दीयते बलम् यस्य प्रवर्तकत्वेन महर्षिगौतमः स्वीकृतः। एवमेव प्रमाणप्रधानयुगस्याथवा तर्कप्रधानयुगस्य प्रवर्तकत्वेन 'अक्षःपादः' स्वीकृतो वर्तते। इदं हि साधनप्रधानयुगमिति स्वीक्रियते। अत इदं सिद्धयति यदान्वीक्षिकीविद्याया नामेव न्यायशास्त्रं यस्याऽऽदिसूत्रपातः आत्मवादनैरात्म्यवादयोस्संघर्षेऽभवत्। विनाऽऽन्वीक्षिकीं कश्चन्नपि कस्यापि पुरतो नैजं विचारं समुपस्थापयितुं न शक्नोति तथैव न च स स्वसिद्धान्तरक्षणं कर्तुं शक्नोति। भारतीयसाहित्ये धार्मिकभावनानामाधार एव न्यायशास्त्रस्य पदनिर्देशः स्वीकृतो वर्तते। यतोहि समये समये धार्मिकक्रान्तिपरिणामस्वरूपपैणैव तर्कस्याथवा न्यायस्य भेदत्रयमभूत्। यथा वा (१) वैदिकतर्कः (२) बौद्धतर्कः (३) जैनतर्कश्च। इतोऽग्रे वैदिकतर्कस्य निर्मातृविषये बोधितमस्ति।

प्रसंगेऽस्मिन् लक्षणबोधनानन्तरं वैदिकतर्कभाषाया ऐतिहासिको विकासः विनिर्दिष्टोऽस्ति। पुनश्च इमाः तर्कभाषाः प्रकरणग्रन्थान्तर्गतत्वेन स्वीकृताः वर्तन्ते। अत्रावधेयं यदेतेषां प्रकरणग्रन्थ इत्यभिधानं तच्छास्त्र-मुख्यपदार्थप्रतिपादनत्वादेव कृतं तथासति न्यायदर्शनस्य मुख्यमुख्य-पदार्थप्रतिपदनात्वादिमास्तर्कभाषाः प्रकरणग्रन्थ इत्यभिधाने-नाऽभिहिताः। इतोऽग्रे वैदिकतर्कभाषाया विशिष्टताः प्रदर्शितास्सन्ति।

ऐतिहासिकविकासदृष्ट्या बौद्धतर्कभाषायाः महत्त्वम्—

ऐतिहासिकविकासदृष्ट्या बौद्धतर्कमनुशीलयामश्चेत् अनेकेषां ज्ञातव्यतथ्यानां परिचयः प्राप्यते । विक्रमपूर्वं षष्ठशतकादारभ्य विक्रमपूर्वं तृतीयशतकं यावत् 'स्थविरवाद'स्य प्राधान्यमासीत्। स्थितिरियं प्रायशो विक्रमस्याऽऽरम्भकालात्मिकेति कथने न किमप्यतथ्यम्। ततस्ततः विक्रम द्वितीयशताब्दौ स्थविरवादस्य स्थानं 'सर्वास्तिवादेन गृहीतम्। कतिपयेष्वेव दिनेषु अयमपि वादः लुप्ततां गतः। लुप्ते च सर्वास्तिवादे विक्रमस्य तृतीयशतके नवैका स्फूर्तिस्सर्वशून्यवाद'त्वेन व्याजृम्भत । विक्रमस्य चतुर्थषष्ठशतककालावधौ अपि माध्यमिककारिकाद्वारा शून्यवादस्यैव स्थापना दरीदृश्यते। इतोऽग्रे विक्रमस्य पञ्चमशतके 'विज्ञानवाद'स्य प्रादुर्भावोऽवलोक्यते। कालोऽयं गुप्तानाम्। युगेऽस्मिन् सर्वविध-तर्काणामुन्नतिरजायत। इत्थं पञ्चमशताब्दीतः अष्टशताब्दीपर्यन्तं विज्ञान-वादशून्यवादयोरुभयोरपि उन्नतिस्समाना दृश्यते। विक्रमस्याष्टमे शतके नालन्दायाः वृद्धाचार्याभ्यां (पद्मसंभवशान्तिरक्षिताभ्यां) निजकठोर-परिश्रमाधारे बौद्धतर्कः प्रतिष्ठापितः। इदमेव बौद्धमतावलम्बिना-मैतिहासिकदृष्ट्या तार्किकविकासस्वरूपं विद्यते। अन्यश्चात्र कालविभागः विक्रमस्य प्रथमशताब्दीतः पञ्चमशताब्दिपार्यन्तिके वर्तते। कालेऽस्मिन् 'बहुत्वाद'स्य स्थाने शून्यवाद एव स्वीकृतः। एवमेव आर्यसत्यस्थाने (१) सांवृत्तिक (२) पारमार्थिक सत्य एते द्विविधे प्रामुख्येन स्वीकृते।

विक्रमस्य पञ्चमशताब्दीतः आरभ्य दशमशताब्दीं यावत् विज्ञानवादस्य प्राधान्यं दृश्यते। तर्कविद्याऽस्यैव युगस्य अवदानस्वरूपं इत्यवलोकयामो यत् धर्महेतुकारणेषु त्रिष्वपि भगवतो बुद्धस्य धर्मसारः प्रतिष्ठितो वर्तते।

आरम्भिकबौद्धतर्कस्य प्रथमा विशिष्टता—

(क) अनात्मवादः—अनात्मवादसिद्धान्ते आत्मनित्यसत्तारूपेण नैव स्वीकृतः। बुद्धेन केवल पञ्चस्कन्धेषु समष्टिः नित्यसत्तात्वेन स्वीकृता तथाहि इदमपि स्वीकृतं यत् यावदेतेषां स्कन्धानां संघातस्यास्तित्वं तावदेवमनुशिष्यास्तित्वं। इदमेव 'नामरूपमिति निगद्यते। प्रसङ्गेऽस्मिन्

दीपकदृष्टान्तो द्रष्टव्यः। यथा दीपकस्यैका ज्योतिरपरया भिन्ना सती प्रकाशयति अत्र कारणं तस्य कार्यकारणभावसम्बन्धः तथैव संसारोऽयं अज्ञानवशाद् मनुष्यस्य क्रमबद्धावस्थानां सन्तानम् आत्मात्वेन ज्ञायते। अतः बौद्धाः आत्मनो नित्यतां स्वीकुर्वन्ति।

(ख) परिवर्तशीलता—अस्यां संसारस्य समस्तान्यपि वस्तूनि परिवर्तनशालिनि इति स्वीकृतानि क्षणिकानि च 'सर्वं' 'क्षणिकं क्षणिक' मित्युक्त्या बुद्धेनाभाणि नैजेषूपदेशेषु अनित्योऽयं नाशवान् परिवर्तनशीलश्च संसारः। परिवर्तनमेव विश्वसत्तायाः स्वाभाविकः गुणः। नात्र किमपि पूर्णनित्यम् अपूर्णनित्यं वा। वस्तुनः नित्यपरिवर्तनमेव सत्यं तथाहि न कश्चन्नपि पदार्थः विश्वस्मिन् एकक्षणादधिकस्थायी एकेन वस्तुनाऽपर-वस्तुसृजनं तथाहि उत्पत्तिपक्षयो वरिन्त्वदमपरमुत्पाद्यवस्तु विनश्यति।

(ग) हेतुवादः—विशिष्टतायामस्यां बोधितं यत् दुःखजरा-मरणयोः कारणत्वेन द्वादशहेतवस्सन्ति। येषु हेतुषु प्रत्येकं हेतुपरस्य कारणम् तथाह्यमेव जरामरणयोः कारणम्। मूलकारणमविद्या तथापि अविद्यादुःखयोर्मध्येऽन्यदशहेतूनां क्रमबद्धपरम्परा स्वीकृता वर्तते। अर्थात् संसारस्य प्रत्येकं घटनानामेकं कारणं अवश्यम्भावि। अकस्मात् कस्यपि पदार्थस्योत्पतिरसम्भवः, कार्योत्पादनं विना उत्पन्नपदार्थस्य विनाशोऽप्य-सम्भवः। अस्यैवान्यविशेषता सहसंस्कृतधर्मः, यतोहि संस्कारः एकाकी नोत्पद्यते। हेतुप्रत्ययत्यवस्थानामाधारे परस्परं निर्भरतादशायामेव संस्कारः क्रियावान् भवति।

(घ) निवृत्तिवादः—बौद्धतर्कस्य चतुर्थविशिष्टतान्र्गतमेभिर्नि-वृत्तिवादः स्वीकृतः। वादेऽस्मिन् दुष्टप्रवृत्तीनां समाप्तेरनन्तरं श्रेष्ठ-यौगिकावस्थाः प्राप्यन्ते।

(ङ) धर्मनैरात्म्यवादः—अर्थात् बौद्धा इदं नैव स्वीकुर्वन्ति यत् क्षणिकधर्मः क्षणमत्रस्यैव कृते अस्तित्वमेति, यथा आरम्भिक-बौद्धाः स्वीकुर्वन्ति। दृष्टिकोणेऽस्मिन् जगदिदं एका तादृशी गतिरहितपूर्णता वर्तते यत्र न किमपि उत्पद्यते, न वा किमपि विलीयते। इत्थं वादोऽयं धर्माणां तच्चरमसत्यमस्वीकरोति यत् आरम्भिकबौद्धमते सत्यरूपेण स्वीकृतमासीत्।

प्रसङ्गेऽस्मिन् नवीनबौद्धमतस्यैकान्यापि विशेषता स्वीकृता वर्तते। सा च समानशक्तित्वसम्बन्धसिद्धान्तः। अत्र अनुभूतजगत्-निरपेक्षयोर्मध्ये पूर्णरूपेण समानशक्तित्वसम्बन्धसिद्धान्तो वर्तते।

बौद्धतर्कस्य तृतीयकालविशेषता:—प्रथमविशेषतारूपेण 'स्वसंवेदना' इति स्वीकृता। इयं विशेषता पूर्ववर्णितानां सर्वेषां रूपाणाम् अतिक्रमणं प्राप्तवती। तथा ज्ञानस्य सार्थकस्त्रोतरूपेण संवेदना स्वीकृता। यतोहि स्वसंवेदनायाः असार्थकत्वे अस्माभिः तावदपि न ज्ञास्यते यत् नीलपटे नीलत्वं किम्? अस्याः विशेषतायाः प्रधानकारणम् अतिसंशयवादस्य प्रतिकारणमेवासीत्? इयं बौद्धदर्शनकालस्य प्रथमा विशेषता वर्तते। बौद्धतर्कस्य अन्त्यचरणात्मिका द्वितीया विशेषता विज्ञप्तिवादितापि अस्ति। अस्यां विशेषतायां सर्वान् विचारान् अस्वीकृत्य सापेक्षनिरपेक्षमात्रं वास्तविकताद्वयमेव स्वीकृतम्।

अन्यविशेषतानुसारं—एते आलयविज्ञानं स्वीकृतवन्तः यस्यां, एतत् स्वीकृतं यत् बुद्धिस्थाने आलयविज्ञानं तथा तस्य इच्छास्थाने अनादिवादः स्थापितः। इयं बौद्धतर्कस्य एका उल्लेखनीया विशेषता।

ऐतिहासिकविकासदृष्ट्या जैनतर्कभाषायाः विशेषता महत्वञ्च—

जैनतर्कभाषायाः ऐतिहासिक-विकासः—

जैनतर्कस्य प्रारम्भ 'दृष्टिवादः' इत्यनेन प्रारभ्यते। अस्य विकासः स्थूलभद्रकालेऽभूत्। पुनश्चतर्कस्य विषयवस्तूनि पञ्चाधिक-चत्वारिंशत्पुस्तकेषु जैनाः उपनिबद्धानि कृतवन्तः। भगवतीसूत्र-प्रज्ञापादमिश्रितसूत्रेषु न्यायः सप्तविभागेषु विभक्तः। नैगमसंग्रहव्यहार-ऋजुसूत्रशब्दसमभिरूढभेदात्।

जैनतार्किकसाहित्ये वयं निम्नलिखितकालविभागं प्राप्तुं शक्नुमः—

(१) सिद्धान्त-आगमन-कालः

(२) अनेकान्तस्थापनकालः

(३) प्रमाणव्यवस्था युगम्

(४) नवीनन्याययुगञ्चेति।

सिद्धान्त-आगमनकाले जैनतर्कस्य मूलतत्वानां बीजं परिलक्ष्यते। अनेकान्त-स्थापनकाले नयस्य अनेकान्तस्य च गम्भीरं मौलिकं विशदविवेचनञ्च क्रियते। प्रमाणव्यवस्थायुग एव तर्कस्य प्रारम्भीकरणं जातम्।

नवीनन्याययुग एव उपाध्यायं-यशोविजयेन नव्यन्यायस्य परिष्कृतशैल्यां 'खण्डन-खाद्य' इत्यादयः ग्रन्थाः अनेके प्रणीताः।

जैनतर्कभाषायाः विशेषता—

जैनतर्कभाषायाः स्याद्वादः अनेकान्तवादो वा प्रथमा विशेषता वर्तते। कस्यापि तत्वस्य स्वरूपज्ञानार्थं तस्य अनेकेषु धर्मेषु विभागेषु वा अत्र विचारः चिन्तनं वा कृतम्। अनेन अनन्तधर्मेण एव वस्तु अनन्तधर्मात्मकम् अनेकात्मकं वा कथ्यते। अस्य कृते एव 'स्याद्' इत्यस्य अर्थः कथञ्चित् भवति। अस्य सत्यस्य अभिव्यक्तिरेव स्यादवादो वर्तते।

जैनतर्कस्य 'नयवादः'-द्वितीया विशेषता वर्तते, एकान्तभावेन वस्तुनः कश्मिंश्चदपि रूपेण कथञ्चित् रूपेण वा ग्राहकं ज्ञानं, इत्यस्य ज्ञानस्य नामैव 'नयः' वर्तते। यस्य द्रव्यार्थिकः पर्यायार्थिकश्च द्वौ भेदौ वर्तेते।

द्रव्यार्थिकः नयवस्तूनां सामान्यांशमात्रमेव अङ्गीकरोति, पर्यायार्थिकनयश्च नयवस्तूनां विशेषांशमात्रमेव गृहणाति। अतः उभयात्मक-वस्तुसाकल्येन गृह्यते।

जैनचारस्य निम्नलिखिताः विशेषता—द्रष्टव्याः सन्तिः

अहिंसा—अस्यां सूक्ष्मातिसूक्ष्म जीवानां हननं निषिद्धम्।

द्वितीया विशेषता—अपरिग्रहता इति, यस्यां स्वीकृतं यत् विश्वशान्त्यर्थं अत्यन्तम् आवश्यकं तत्वम् अपरिग्रहः यतोहि पापस्य संग्रहः परिग्रहः। परिग्रहमाधृत्य बुद्धौ वैषम्यस्य भावः जागर्ति। अस्यापरनाम ग्रन्थ्यपि अस्ति। अतः ते अपरिग्रहं तथा ध्यातवन्तः यथा अनेन ग्रन्थ्योद्भेदनं भवेत्।

तृतीया विशेषता—कर्मवादः-अर्थात् कार्यकारणवादः, यस्मिन् एतत् स्वीकृतं यत् प्रत्येकं कार्यस्य कारणं भवत्येव। अथवा, प्रत्येकं कारणं

प्रत्येकं कार्यस्य उत्पादकं जनकं वा भवति। अपि च यादृशं कर्म भवति तादृशमेव फलमपि भवति प्राप्यते वा।

चतुर्थविशिष्टतारुपेण इच्छास्वातंत्र्यं स्वीकृतम्—आत्मनः स्वरूपम् अधिवासः एव जैन-दर्शनस्य परमेश्वरपदं वर्तते। यः तु प्रत्येकं आत्मनः अन्तस्थितो सन् प्रतितिष्ठते। अर्थात् यः आत्मा अस्ति स एव परमात्मा अस्ति।

अनेन प्रकारेण एते समभावस्य चरमविकासं साम्यदृष्टिः इत्यस्य अन्त्यस्वरूपं च प्रदर्शयन्ति। एतदेव कारणं यत् जैनतर्कः भूयिष्ठविशेषतामाप्नोति।

तदनन्तरं एतेषां तिसृणां तर्कभाषाणां अनुशीलनेन एतद् निश्चितं यत्–तिसृषु तर्कभाषासु बौद्धिकव्यायाममात्रमेव न प्राप्यते अपितु आभिः 'निःश्रेयस' इत्यस्य प्राप्तिरति भवति।

पुनः वैदिकबौद्धजैनतर्कभाषासु प्रमाणवादस्य व्यवस्था कीदृशी वर्तते तथा अस्यां परिप्रेक्ष्ये/तदाधृत्य 'सत्' इत्यस्य स्वरूपं किम् अपि च यया 'निःश्रेयस्' इत्यस्य प्राप्तिः च भवति, तावत् स्पष्टीकरणार्थं प्रयत्नोऽभूत्, तत् व्याख्यातम्।

'सत्' स्वरूपस्य स्पष्टीकरणे इदमुक्तं यत्—'सत्' पदार्थः स्वतंत्ररूपेण प्रमाणस्य विषयः भवति। तथा असदोऽपि सदान्तर्गतकारणेन नोपेक्षितः। अतएव यदा सत् प्रकाशमानं भवति, असदपि प्रकाशितं भवति। वैदिकतर्कभाषाकारेण केशवमिश्रेण षोडशविधाः सत्पदार्थाः स्वीकृताः। ये प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धान्तावयवनिर्णयतर्कवादः जल्पवितण्डाहेत्वाभासछलजातिनिग्रहाः कथ्यन्ते। एते सत्–स्वरूपाः मन्यन्ते तथा एभिरेव 'निःश्रेयस्' इत्यस्य प्राप्तिः संभवति।

तदनन्तरं प्रमाणम् इत्यादेः लक्षणं वैदिकतर्कभाषानुसारं उल्लिखितम् वैदिकबौद्धतर्कयोः प्रमाणवादानुसारं सत्स्वरूपं येन हि निश्रेयस्सिद्धिर्भवति तस्यापि चर्चा कृता स्वरूपं वा प्रदर्शितम्। सत्स्वरूपस्पष्टतायै प्रायश इदमपि कथितं यत् सत्पदार्थः स्वतंत्ररूपेण प्रमाणविषयत्वेन स्थित इति, तथाहि असदपि सत्पदार्थान्तर्गतत्वात् नोपेक्षितः। इत्थं सत्प्रकाशे

असत्प्रकाशोऽपि निश्चितः। वैदिकतर्कभाषाकृता केशवमिश्रेण षोडशप्रकारकसत्पदार्थाः स्वीकृताः ये हि-प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-निर्णय-तर्क-वाद-जल्प-वितण्डा-हेत्त्वा-भास-छल-जाति-निग्रहस्थानानीत्यभिधीयन्ते। एभिरेव ज्ञातैः निश्रेयस्-सिद्धिर्भवतीति सिद्धम्। तदनु प्रमाणादीनां लक्षणानि वैदिकतर्क-भाषानुरूपाणि कृतानि वर्तन्ते। तत्रापि बौद्धतर्कभाषामाधारीकृत्य सत्स्वरूपं तथाहि सतो व्याख्या च प्रदर्शिता वर्तते। अत्र वेति यत् बौद्धतर्कस्य प्रथमकाले सतः स्वरूपं पुद्गलनैरात्म्यवादस्वरूपे प्रतिष्ठितमासीत्। एतदनुसारं बाह्यायतनसत्तायाः निषेधो वर्तते। अतएव प्रारम्भिकाले सतः स्वरूपमित्त्थं प्रतिष्ठितमासीद्यत् न किमपि आत्मवस्तु, न किमपि व्यक्तित्वं वा। तथाकथितव्यक्तित्वं तत्तत्प्रवाहैः सततपरिवर्तनशीलधर्माणां संग्रहैः निर्मितम्। बौद्धमतपूर्वं ये दार्शनिकमतान्यभूवन् तानि ऐन्द्रियकविषयाः सुसंहताः वस्त्वात्मकाः नित्याः तथाहि प्रधानस्य (प्रकृतेः) परिवर्तन-शीलाभिर्व्यक्तिरूपेण स्वीकुर्वन्ति स्म। परन्त्वागते तर्कस्य विकसित-स्वरूपेऽभू 'द्धेतुवाद' सिद्धान्तस्य स्थापना यस्मिन् स्वीकृतं यत् संस्काराणामुत्पत्तिः नैव सम्भवति एकाकी। प्रत्युत इमे संस्काराः हेतुप्रत्ययव्यवस्थानामाधारे परस्परं निर्भरतादशायामेवैतेषां क्रियाशीलतेति। अतएव इमे सहसंस्कृतधर्मा अथवा संस्कारा इति निगद्यन्ते। एतेषां मुख्यमुद्देश्यं निर्वाणप्राप्तिरेव नान्यत्।

बौद्धतर्कस्य द्वितीयकाले 'पुद्गलनैरात्म्य'स्य स्थानं धर्मनैरात्म्यवादेनाऽगृह्यत। यस्मिन् चतुर्ण्णां सत्यानां स्थाने द्विविधसत्यानां कल्पना सांवृत्तिक-पारमार्थिकरूपेण कृता। बौद्धतर्कस्य तृतीयकाले तर्कस्वरूपस्य (स्वसंवेदनायाः) स्वरूपं सर्वथा भारतीयमासीत्।

इतोऽग्रे जैनतर्कमाधारीकृत्य सतः स्वरूपं स्पष्टीकृतं वर्तते। अत्र प्रसङ्गेऽस्मिन् ध्येयं यत् जैनतर्कविकासः त्रिषु कालेषु विक्तो वर्तते—(१) २०० तः ६५० ई. पर्यन्तमादिकालः (२) ६५० तः १०५० ई. पर्यन्तं मध्यकालः (३) १०५० ई. तः १७०० ई. पर्यन्तमुत्तरकालश्च।

(क) आदिकाले—

कालेऽस्मिन् आगमिकतत्त्वानां प्राधान्यमासीत्। परन्तु समन्तभद्रकाले युक्तिवादस्यावश्यकतामाधारीकृत्य कथितं यत् कश्चन्नपि पक्षः निष्पक्षदृष्ट्या द्रष्टव्यः। अमुष्य कृते स्याद्वादसिद्धान्तः स्थापितः। स्याद्वादसिद्धान्तानुसारं कस्यापि पक्षस्य तिरस्कारोऽकरणीयो भवेदस्माकं कृते। इत्थञ्च समन्तभद्रकाले सप्तभंगीनयस्य स्थापनाऽभूत् तथाहि 'कथञ्चि' दित्यादिनामनुसारं नयोऽयं व्यवस्थापितश्च।

(ख) मध्यकालः—

मध्यकालेऽथवाकलंककाले स्याद्वादसिद्धान्तस्योपरि आरोपित-दोषाणां प्रशमनानन्तरं सिद्धान्तोऽयं स्वच्छीकृतः। एतदनुसारमनेकेषां श्रेष्ठतार्किकग्रन्थानां निर्माणमभवत्। अमीषु 'लघीयस्त्रयः' प्रमुख ग्रन्थोऽस्ति, यो हि कारिकात्मकः वर्तते। प्रायशः समस्तैरपि जैनतार्किकैरस्यानुसरणं कृतम्।

(ग) उत्तरकालः—

उत्तरकाल एव प्रभाचन्द्रकाल इति निगद्यते। कालोऽयञ्जैनतर्कविकासस्य अन्तिम इति सिद्धम्। जैनतर्कशिरोमणिना यशोविजयेनाऽमस्मिन्नेव काले 'अष्टसाहस्रीविवरणज्ञानविन्दुतर्कभाषादि-ग्रन्थानां रचना कृता।'

जैनदृष्टौ सत्स्वरूपम्—

जैनागमेषु द्रव्याण्येव सत्स्वरूपात्मकानीति स्वीकृतमस्ति। सत् न केवलं नित्यमयं प्रत्युत् परिवर्तनशीलमपि इदम् इति।

अनुयोगद्वारसूत्रे द्रव्यमेव तत्त्वसामान्यलक्षणमिति स्वीकृत्य तस्य विशेषलक्षणत्वेन जीवद्रव्यमजीवद्रव्यमिति स्वीकृतं तथाहि सतः लक्षणं उत्पाद-व्यय-ध्रौव्यात्मकमिति स्वीकृतं वर्तते। इत्थं सम्पूर्णेऽपि प्रथमाध्याये तिसृणामपि तर्कभाषाणामैतिहासिकता, तासां प्रमाणव्यवस्था, तिसृष्वपि सतः स्वरूपं किमिति स्पष्टीकृतं वर्तते।

द्वितीयेऽध्याये—

बौद्धतर्कभाषाकृन्मोक्षाकरगुप्तस्य जीवनपरिचय-जन्मतिथि-स्थान-तद्विशिष्टताश्च वर्णिताः। तदनुसारं मोक्षाकरगुप्तस्य समयः १११० ई. प्रायशः स्वीक्रियते। जगद्दलसमये मोक्षाकरगुप्तस्तर्कभाषायां बौद्धभिक्षुरिति आकारितोऽभिहितो वास्ति। बौद्धतर्कभाषा धर्मकीर्त्तेन्यायविन्दुमनुसरति। क्वचिच्च प्रमामवार्तिकस्यापि समन्वयः कृतो वर्तते। बौद्धतर्कभाषायां बौद्धदृष्टिकोणेनैव न्यायसिद्धान्तानां एव रचना कृताऽऽसीत्। इयं हि बौद्धतर्कभाषा धर्मकीर्तेस्तर्कपरम्पराया एकः लघुः ग्रन्थो वर्तते। तर्कभाषायामस्यां परिच्छेदत्रयमस्ति। प्रथमे चात्र परिच्छेदे प्रत्यक्षनिरूपणं कृतमस्ति यत्राऽदौ—'अपूर्वविषयकसम्यग्यानत्वं प्रमाणत्वमिति दर्शितं वर्तते। परिच्छेदेऽस्मिन् प्रत्यक्षलक्षमानन्तरं तस्य (१) इन्द्रियज्ञानम् (२) मानसप्रत्यक्षम् (३) स्वसंवेदनम् (४) योगिज्ञानम् इति प्रत्यक्षस्य चत्वारो भेदाः प्रदर्शिताः वर्तन्ते।

द्वितीये परिच्छेदे स्वार्थानुमानविवेचना कृता वर्तते। एतदनुसारं स्वार्थानुमानं नामैका मानसिकी प्रक्रिया यस्यां हि कस्यचिदपि मनुष्यस्य अनुमेयविषयिणी अनुमितिरूत्पद्यते। तृतीये परिच्छेदे परार्थानुमानस्य विवेचनम् अस्ति। परार्थानुमानविवेचनानुसारं परार्थानुमानं नाम अन्येषां बोधाय ज्ञानाय वा प्राप्तज्ञानस्यानुमितेर्वा शब्दिकी अभिव्यक्तिर्मात्रम्। अस्य हि परार्थानुमानस्य त्रयः कारणहेतवः स्वीकृताः वर्तन्ते। (१) स्वभावः (२) कार्यम् (३) अनुपलब्धिश्च। संक्षेपेण तर्कभाषायाः अस्याः काश्चन विशिष्टताः प्रतिपाद्यन्ते—

प्रमाणवार्तिक-न्यायविन्द्वोराधारे रचिताऽपि बौद्धतर्कभाषाऽत्यन्तं सरला संक्षिप्ता च वर्तते। तथैव यथार्थतास्याः द्वितीयं वैशिष्ट्यं यतोहि बौद्धतर्कभाषायामर्थ-सारूप्यस्योपरि विशिष्टं बलं दत्तं वर्तते। कारणमत्र अर्थेन सह ज्ञानसादृश्यमेव प्रमाणमिति स्वीकृतत्वात्। वैज्ञानिकता नाम अस्यास्तृतीयं वैशिष्टियं यत्सन्दर्भेऽवधेयं विषयस्य साक्षात्कारिता वर्तते। अतो यद्विज्ञानं पूर्वत एव विषये प्रवृत्तं स्यात् तदैव प्रमाणम्। एतस्य ह्युदाहरणस्वरूपं पंकजशब्दः प्रदर्शितो वर्तते यस्य व्युत्पत्तिसिद्धोऽर्थः

पंकाज्जात इति स्वीकृतः किन्तु शब्दोऽयं स्थलकमलायापि प्रयुज्यते। चतुर्थं हि वैशिष्ट्यमस्याः क्षणभंगवादः, एतदनुसारं समस्तमपि वैश्विकं वस्तु उत्पन्नं सत् विनश्यति। क्षणस्थायित्वमिदं देशकाल-आकारानुरूपं भवतीति सिद्धमत्र। अत्रापि देशकालयोर्विनाशो यद्यपि सम्भाव्यते तथाप्याकारः अवशिष्यत एव। पंचमं वैशिष्ट्यमस्याः बौद्धतर्कभाषायाः व्यवस्थावादिता वर्तते। यतोहि बौद्धतर्कभाषायां प्रत्यक्षानुमानरूपेण प्रमाणद्वयस्यैव व्यवस्था कृता वर्तते। अनुमानस्य भेदद्वयं स्वार्थानुमानपरार्थनुमानभेदेन कृतमस्ति। अवयवानां सम्बन्धे अपि एतादृश्येव स्थितिरर्थात् व्याप्तिपक्षधर्मतारूपेण द्वावेव अवयवौ स्वीकृतावास्ताम्।

एतदनन्तरं बौद्धतर्कभाषाया महत्त्वविषये चर्चा कृता वर्तते। प्रसंगेऽस्मिन् प्रथममस्या सारल्यमुपवर्णितं वर्तते यतोहि न्यायविन्दु-प्रमाणवार्तिकसदृशक्लिष्टग्रन्थानां सरलरूपात्मकोऽयं ग्रन्थः। संक्षिप्तताऽस्याः द्वितीयं महत्त्वं, या हि धर्मकीर्तेस्तर्क-परम्पराया एको लघु ग्रन्थो वर्तते। विशिष्टं महत्त्वमस्याः नियमवादिताऽपि वर्तते। आचार्येण धर्मकीर्त्तिना न्यायविन्दौ प्रमाणलक्षणं विनैन तस्य भेदप्रभेदाः परिगणिताः यत्खलु नियमविपरीतं किन्तु मोक्षाकरगुप्तेन नियमानुसारं प्रथमं प्रमाणलक्षणं तदनन्तरं तद्भेदाः प्रभेदाः वा विनिर्दिष्टाः। बौद्धाः अर्थसान्निद्ध्य एव प्रत्यक्षं स्वीकुर्वन्ति, नान्यास्ववस्थासु? किन्तु मोक्षाकरगुप्तेन कल्पनारहितं निर्भ्रान्तञ्च ज्ञानमेव प्रत्यक्षमिति स्वीकृतं। प्रत्यक्षस्यास्य चत्वारो भेदा अपि स्वीकृताः अनेन इन्द्रिय-मनः-स्वसंवेदन-योगिप्रत्यक्षभेदात्।

इत्थं सम्पूर्णेऽपि द्वितीयेऽध्याये मोक्षाकरगुप्तस्य जीवनपरिचयः, स्थानं, कालः, कृतिः विशेषताश्च प्रदर्शिताः वर्तन्ते।

तृतीयेऽध्याये—

अध्यायेऽस्मिन्वैदिकतर्कभाषाकृतः केशवमिश्रस्य जीवनपरिचयः कृतयो विशेषताश्च प्रतिपादिताः वर्तन्ते। तदनुसारमनेन विदुषा श्रीमिश्रेण मिथिलायां जनिं लेभे, ग्रमश्चास्य 'सरिवस' इति प्रख्यातः। वंशपरम्परायामस्य महता दार्शनिकेनाभिनववाचस्पतिमिश्रेण सह प्रपौत्र-प्रपितामहसम्बन्धः

स्वीक्रियते कृतश्च। बलभद्रमिश्रतनूजन्मनोऽस्य भ्रातुर्नाम पद्मनाभ मिश्र इति स्वीकृतम्। केशवमिश्रेण तर्कशास्त्रं निजाग्रजात् अपाठि। समयश्चास्य १३५०-१४०० ई० इति स्वीक्रियते। अमुष्य तर्कभाषायां न्यायशास्त्रस्य मुख्यमुख्यपदार्थानां विवेचनं कृतमस्ति। किन्तु समस्तविषयाणामथवा पदार्थानां विवेचनं नैव प्राप्यते। तर्कभाषायामस्यां श्रीमिश्रेण षोडशपदार्थानां वर्णनमकारि येषु द्वितीयपदार्थान्तर्गतप्रमेयपदार्थे वैशेषिकप्रतिपादितानां द्रव्यादिषड्पदार्थानामन्तर्भावः कृतो वर्तते। एतदनन्तरं तस्य विशिष्टताः प्रतिपादिताः वर्तन्ते। यासु समन्वयवादिता प्राथम्येन परिगणिता। यतोहि उत्तरकाले न्यावैशेषिक उभेऽपि परस्परं सम्मिल्य वृद्धिमापतुः। यद्यपि सन्ति अनयोर्मध्ये मौलिकभेदाः परन्तु सत्स्वपि एतेषु उभेऽपि दर्शने परस्परमविरोधिनी अन्योन्यं प्रपूरके च स्तः। मोक्षस्वीकरणमेतस्य अन्यद् वैशिष्ट्यं, यतोहि षोडशपदार्थानां तत्वज्ञानाद् यदा सम्यग्ज्ञानं प्राप्यते तदैव निःश्रेयस्प्राप्तिः। अन्यच्च यतोहि न्यायस्योद्देश्यं तर्कविद्याऽथवा अनुमानविद्याऽपि वर्तते तस्मात् षोडश-पदार्थानां तत्वज्ञानाद् मोक्षप्राप्तिः वर्णिता। तथैव संसारेऽस्मिन् वैशेषिकाभिमतद्रव्यगुणकर्मादिसप्तपदार्थानां यथार्थज्ञानादपि मोक्षप्राप्तिरिति वर्णितम्। निष्पक्ष-तयास्यास्तर्कभाषायाः तृतीयं वैशिष्ट्यं यतोहि अन्यसम्प्रदायविशेषस्य पक्षविपक्षमुपेक्ष्य निष्पक्षरूपेण आन्विक्षिक्याः स्वरूपं साधनप्रधानमिति कृतम्। षोडशपदार्थानां प्रमाणप्रमेयादीनां सम्यक्ज्ञानं यथार्थज्ञानं वा यथा स्वीकृतं तया स्पष्टं परिलक्ष्यते यत् यथार्थ्यवादिताप्यस्याः अन्यदेव वैशिष्ट्यं। क्रमेऽस्मिन् वैज्ञानिकतायाः अपि महत्त्वपूर्णं स्थानं वर्तते। प्रसङ्गेऽस्मिन् उदाहरणमिदं ध्येयं यत् पटं पटरूपञ्चोभयमपि पृथक्-पृथक् वस्तुनी वर्तेते। अनयोरेकता तथापि सिद्धा एव।

एतनन्तरं वैदिकतर्कभाषायाः महत्ताः प्रतिपादिताः वर्तन्ते। महत्ता चेयं अस्याः व्यवस्थावादिताकारणादेव, यतोहि श्रीमिश्रेण चत्वारि एव प्रमाणानि, तान्यपि स्वतंत्राणि सुव्यवस्थितानि चामन्यन्त। अस्याः तर्कभाषायाः महत्वस्यैकमपरमपि कारणमिदं वर्तते यत् अस्यां हि न्यायशास्त्रस्य प्रवृत्तिनिरूपणं कृतं वर्तते। सूक्ष्मपरिशीलन-नीरक्षीर-

विवेकसमन्वयवादिता–यथार्थ्यवादितानिष्पक्षतादीनां कारणेन केशवमिश्रस्य तर्कभाषा न्यायशास्त्रे नैजं किमपि विशिष्टमेव स्थानं स्थापयति। अस्याः महत्त्वविषये स्वयं श्रीमिश्रेण ग्रन्थस्यास्य मङ्गलाचरणे न्यगादीत्।

चतुर्थेऽध्याये—

जैनतर्कभाषाकृद्यशोविजयस्य जीवनपरिचयः स्थानं कालः विशिष्टताश्च प्रतिपादिताः वर्तन्ते। तदनुसारं यशोविजयस्य जन्म 'कलोल'स्य निकटे 'कनोडू' नामकग्रामे अभूत्। पितुर्नामास्य नारायणस्तथाहि मातुर्नाम सौभाग्यदेवीत्यासीत्। अस्य प्रारम्भिकं नाम जशवन्तस्तथाहि लघुभ्रातुर्नाम पद्मनामसिंह आसीत्। व्यापारिपितुः पुत्रोऽयं अत्यन्तं प्रतिभावान् आसीत्। १७४३ ई०क बड़ौदा सन्निकटे 'उमाई' नामकग्रामे विद्वान् अयं नैजं पाञ्चभौतिकशरीरं तत्याज। यशोविजयस्य कृतयः तस्य अत्यन्तं सूक्ष्मं व्यापकञ्चाध्यायनं प्रकटीकुर्वन्ति। आगमतर्कावतिरिच्य अन्येषु अपि विविधविषयेषु एतस्य रचनाः प्राप्यन्ते। एतासु कर्म–जीव–तत्त्व–आचारादि–विषयकग्रन्थाः अगमिकसाहित्ये तथाहि प्रमाणप्रमेयादि–विषयकग्रन्थाः तर्कसाहित्ये परिगण्यन्ते। मङ्गल–भक्ति–आत्मा योगादिविषयकग्रन्थाः साधना–साहित्यान्तर्गताः मन्यन्ते। यशोविजयेन व्याकरण–छन्दः अलङ्कारादिविषयानामुपर्यपि स्वतंत्रतया ग्रन्थाः प्रणीताः। न्याप्रदीपतर्कभाषा न्यायरहस्य - न्यायामृतरङ्गिनी - इत्यादिग्रन्थानां परिशीलनेन विज्ञायते यत् यशोविजयेन तर्कक्षेत्रे अधिकाधिकं कार्यं कृतमिति।

जैनतर्कभाषाया रचनानेन जिनसम्माने कृता। इयं हि त्रिष्वध्यायेषु विभक्ता, प्रमाण–नय–निक्षेप भेदाः। क्वचित्–क्वचित् व्याप्तिग्रहोऽपि चर्चितोऽस्ति यो हि संसारगतसाध्यहेतुसमन्वयविषये तत्साहाय्येन प्रासव्यप्रत्यक्षं बोधयति। न्यायालोकस्यापि रचना महावीरस्यैव सम्माने कृता वर्तते। यत्र हि समस्तमपि तत्त्वं विनश्यति तथाहि व्यक्ति सुखदुःखाभ्यां विमुच्यते। न्यायखण्डखाद्ये तर्कस्य गम्भीरसमस्यानां समाधनं कृतमस्ति यशोविजयस्य तार्किकसिद्धान्ता इत एव प्रारभ्यन्ते। जैनतर्कभाषायां

प्रथमविशेषता-रूपेण आदर्शवादः स्वीकृतो वर्तते। इतः परं तार्किकदृष्टिकोणस्य प्रधानता वर्तते यत्र तेषां कथनं वर्तते यत् यत्र प्रमाणैः पदार्थाः ज्ञायन्ते तत्रैव तर्कः तान् पुष्यति। तृतीयविशेषतारूपेण यथार्थवाद स्वीकृतः वर्तते। प्रसङ्गेऽस्मिन् ध्येयं यत् षट्खण्डागमे प्रतिपादितानि सन्त्यष्टज्ञानानि। येषु त्रीणि मिथ्या पञ्च च यथार्थतया निरूपितानि सन्ति। यथार्थतायाः यादृक् स्वरूपं यशोविजयेन प्रस्तुतं न तादृशमन्यत्र दृष्टिपथमवतरति। यतोहि यथार्थतायाः अस्याः स्वरूपं न केवलमलौकिवस्तुस्वैव अगत्या लौकिकेस्वपि घटपटादिषु दृग्गोचरीभवति। चतुर्थविशिष्टतास्याः संक्षिप्तताः वर्तते। यंशोविजयेन जैनतर्कभाषायाः स्वरूपं न विस्तृतमकारि प्रत्युत अस्याः स्वरूपमत्यन्तं संक्षिप्तमेव। प्रमाणनयनिक्षेपाः अत्र प्रमाणम्। स्वपरव्यवयसायिज्ञानमेव प्रमाणमिति प्रमाणस्य लक्षमं प्रस्तुतमनेन। इह हि स्वपदार्थत्वेन आत्मा तथाहि परपदार्थत्वे ज्ञानभिन्नः पदार्थः स्वीकृतो वर्तते। एतस्य तात्पर्यमिदमस्ति यत् ज्ञानं निजस्वरूपं तथाहि घटपटाद्यन्यपदार्थान् निश्चितरूपेण जानाति (ज्ञापयति) तदेव प्रमाणमिति निगद्यते। पुनः अनेन प्रमाणस्य भेदद्वयं स्वीकृतमस्ति प्रत्यक्षपरोक्षभेदेन। प्रत्यक्षस्यापि भेदद्वयं प्राप्यते- सांव्यावहारिकं पारमार्थिकञ्चेति। पारमार्थिक--प्रत्यक्षस्यापि अवधि-मनः पर्यायकेवलभेदेन त्रयो भेदाः स्वीकृताः वर्तन्ते। अनेनैव प्रकारेण परोक्षज्ञानस्यापि प्रत्यभिज्ञान-तर्क-आगम -अनुमानभेदेन चत्वारो भेदाः स्वीकृताः। द्वितीयपरिच्छेदे नयस्वरूपं निर्धारितं वर्तते। यस्मिंश्च व्यावहारिकदृष्टिंकोणस्य प्रधानता वर्तते। अत्र आंशिकज्ञानस्योपरि विशिष्टं बलं प्रदत्तं। अस्य मुख्यतया भेदद्वयं स्वीकृतम् निश्चयनः व्यावहारिकश्चेति। नयस्यैकमपरमपि वर्गीकरणं कृतं वर्तते। अस्यापि भेदद्वयं—(१) द्रव्यनय (२) पर्यायनयश्चेति। यदा नयैः द्रव्यमाश्रयत्वेन स्वीक्रियते तदा ते द्रव्यनया इत्यभिधीयन्ते। गुणपार्थक्ये सति पर्यायनया इति। पुनः अस्य द्रव्यपर्यायनययोः चत्वारः भेदाः स्वीकृताः वर्तन्ते नैगम-संग्रह-व्यवहार। इमे द्रव्यनयाः तथाहि ऋजुसूत्रशब्दसमभिरूढ़ एवं भूतनयाः पर्यायनयस्य भेदाः वर्तन्ते। तृतीयपरिच्छेदे निक्षेपाणां वर्णनं कृतम्। तदनुसारं निक्षेपः

प्रस्तुतार्थस्य निरूपणं तथाहि अप्रस्तुतार्थस्य निवारणं करोति निक्षेपोऽपि चतुर्विधः—नामस्थापनाद्रव्यभावभेदात्। जैनतर्कभाषायाः पञ्चमं वैशिष्ट्यं स्यादवादो वर्तते। यस्यां हि स्वीकृतं यत् तत्वस्वरूपमनैकान्तिकं भवतीति तच्च सप्तकोटिषु विभक्तम्। स्यादवादोऽपि नान्तिमं सत्यम् अपितु असौ अन्तिमं सत्यं यावत् प्रापकः मार्गदर्शको वा वर्तते। वादेऽस्मिन् सम्पूर्णपदार्थानां क्रमेण ज्ञानं सञ्जायते।

जैनतर्कभाषायाः महत्ता—

आत्मविवेचनं नामास्याः प्रथमं वैशिष्ट्यं यतोहि आत्मा स्वतंत्रसत्तात्वेन स्वीकृतो वर्तते। ग्रन्थकृतोऽनुसारम् आत्मनोत्पन्नज्ञाने भ्रमस्य लेशोऽपि न भवति। नयवादितास्याः द्वितीयं वैशिष्ट्यं। तदनुसारं वस्तूनां स्वरूपम् अनन्तधर्मात्मकं भवति। तथाहि केनापि दृष्टिकोणेन कमप्येकमेव अंशं स्वीकरोति। यतोहि किमपि ज्ञानं वस्तुनः पूर्णद्योतकं नैव भवति। वस्तुसम्बन्धी प्रत्येकं विचारः निजदृष्टिकोणेन उपयुक्त एव। अतः एकस्य वस्तुनः विभिन्न दृष्टिकोणैः ज्ञानकरणं तर्कभाषायाः महदवदानं वर्तते। तृतीयमस्याः वैशिष्ट्यं स्यादवादकारणेनापि वर्तते। वादोऽयमपेक्षावाद इत्यप्यभिधीयते। स्यादवादसिद्धान्ते सम्पूर्णसिद्धान्तानां क्रमेण ज्ञानं भवति। निक्षेपावस्थास्याः चतुर्थं वैशिष्ट्यं वर्तते यस्याः सार्थकता इयमेव यदियं प्रस्तुतार्थस्य निषेधं कुरुते। नामस्थापनाद्रव्यभेदात् चतुर्विधेयं। निक्षेपेषु नययोजना तर्कभाषायाः पञ्चमं वैशिष्ट्यं वर्तते। सिद्धसेनदिवाकरेण पर्यायार्थिकनय इत्यमानि। यशोविजयेन जैनतर्कभाषायं निक्षेपसिद्धान्ताधारे बोधितं यत् निक्षेपेष्वर्थाः नैव ध्यायन्ते। तृतीयद्रव्यनिक्षेपः भूतभाविन्यः अवस्थाः गृहित्वा प्रचलति। तथाहि चतुर्थो भावनिक्षेपः वास्तविकतामादाय प्रचलति। इत्थं आगमिकतार्किक परम्पराणां सुन्दरं विवेचनं यथा यशोविजयेन कृतं न तथा केनापि। यशोविजयस्य प्राग्वर्तिभिः आचार्यैः मुख्यतया ज्ञानस्य प्रमाणस्य च प्रतिपादनं कृतं वर्तते।

नयोऽपि कैश्चित् स्पृष्ट एव। परन्तु निक्षेपाणां तर्कशास्त्रे समायोजनं यशोविजयस्य मौलिकमवदानं वर्तते।

तिसृणामपि तर्कभाषाणां तार्किकदृष्ट्या समीक्षा कृता वर्तते। सर्वप्रथम बौद्धतर्कभाषायाः समीक्षाकरणस्योद्देश्यमिदमेव यत् ऐतिहासिकदृष्ट्या बौद्धतर्कभाषा सर्वप्राचीना यस्या रचना मोक्षाकरगुप्तेन ११११० ई० वर्षे कृता आसीत्। अस्याः अनुशीलनेन ज्ञायते यत् इयं हि ज्ञानमीनांसात्मिका तर्कशास्त्रीय-पद्धतेः कृतिर्वर्तते या हि प्रत्यक्षसिद्धान्तेनारभते। तदुपरान्तमियं अनुमानमालम्बते। तदनु अध्यवसायस्य स्वार्थपरार्थानुमानसिद्धान्तानां वर्णनं वर्तते। इत्थं मानवज्ञानस्य समस्तान्यपि क्षेत्राणि एतदन्तर्गतानि वर्तन्ते। यद्धि ज्ञानं प्रत्यक्षसदृशसाधारण-विषयादारभ्य सार्वजनिकवादविवादत्मकजटिल-प्रक्रियायां समाप्तिमेति। दिङ्नागादेव बौद्धन्यायस्य प्रारम्भः अभवत्। तदनु बहूनां न्यायग्रन्थानां रचना अभूत्। अस्यामेव परम्परायां धर्मकीर्तिना ७५० ई० वर्षे न्यायविन्दुरित्यादीनां रचना कृता। इत्थं बौद्धन्यायसाहित्यनिर्माणं दिडनागात् प्रारभ्य मोक्षाकारगुप्तं यावत् अभूत्। अनयोर्मध्ये एकत्रिंशदाचार्यैः न्यायग्रन्थाः प्रणीताः, तेष्वपि दिङ्नागधर्मकीर्तिशान्तरक्षितप्रभृतयो पारम्प्रसिद्धिं याताः। अस्यामेव परम्परायां गुप्तमोक्षाकारोऽपि परिगण्यते।

शेखत्सकीप्रणीतन्यायग्रन्थानुसारमिदं स्वीक्रियते यत् शास्त्रमिदं हेतुविद्याऽथवाप्रमाणविद्याथवा केवलं सम्यक्-ज्ञान व्युत्पादनमात्रं वर्तते। इत्थं प्रतीयते यत् बौद्धतर्कः तांस्तान् विचारान् प्रत्येव निष्ठावान् वर्तते। येषु बौद्धमतः प्रारभ्यते। तथाहि सर्वैरपि बौद्धतर्कशास्त्रिभिः एकमतेनेदं स्वीकृतं वर्तते यत् तर्कशास्त्रं नाम सत्यासत्ययोः विमर्शस्य सिद्धान्तमात्रम्।

तार्किकदृष्ट्या बौद्धतर्कभाषायाः समीक्षा—

सर्वैरपि बौद्धतर्कशस्त्रिभिरेकमतेनैव इदं स्वीकृतं वर्तते यत् तर्कशास्त्रं सत्यतर्कम् असत्यतर्कात् पृथक् करोति। मोक्षाकरगुप्तेन बौद्धतर्कभाषायामिंद स्वीकृतं वर्तते यत् सत्यतर्क एव यथार्थ्यसत्यं यथार्थता च प्राप्तप्रमाणावलम्बिता। प्रमाणं व्याख्यतानेन "प्रमाणं सम्यक् ज्ञानमपूर्वगोचरं, प्रमीयतेऽर्थोनेनेति प्रमाणं।" तदेव सम्यग्ज्ञानं सन्देहविपर्यासदोषरहितत्वात्। अविसंवादकं ज्ञानं लोके सम्यग्ज्ञानम-

भिधीयते। न च संशयविपर्यासज्ञानयोरविसंवादकत्वं वर्तते। यथा स्थाणुर्वा पुरुषो वेति ज्ञानस्य, मरीचिकासु वा जलज्ञानस्य अपूर्वो गोचरो अस्येत्यपूर्वगोचरं। गोचरोविषयो घटादिः। तस्मादुत्पन्नं तदर्थप्रापणयोग्यं ज्ञानं प्रमाणम् इति। मोक्षाकरगुप्तेन ज्ञानगतयोग्यतैव प्रमाणत्वेन स्वीकृता। विषयस्य स्वरूपज्ञानमेव प्रामाणिकतायाः अर्थो भवति। अविसंवादिता अर्थक्रियायाः सङ्गतिर्मात्रं। इयं संगतिः शब्दश्रवणमात्रेणापि चरितार्था जायते। अतः तच्छ्रवणमात्रमेव अर्थक्रियायाः संगतिः वर्तते। यथा-सूर्यचन्द्रमेव चित्रादीनां दर्शनमात्रमेव अर्थक्रियायाः विषयसंगतिर्भवति। यतोहि व्यवहारेण सदर्थकक्रियाप्राप्तिरेव, तस्माद् चातूर्यपूर्णप्रत्यक्षोदयात् बुद्धिमान् मनुष्यः कमप्यर्थः प्रति प्रवृत्तो भवति। एवं मन्दबुद्धिः तथाविधानुमाने नैव अर्थक्रियां प्रति प्रवृत्तो भवति, तस्माद् प्रत्यक्षस्य स्वतः प्रमाणत्वं मतम्। परन्तु कैश्चित् परतः प्रामाण्यवादोऽपि स्वीकृतः। अत्रावधेयं यत् योगिज्ञानं तथाहि स्वसंवेदनमेव स्वतः प्रमाणं वर्तते। अनुमानस्यापि निश्चयात्मकत्वात् स्वतः प्रामाणिकता स्वीकर्तुं शक्यते। इत्थमिदं सिद्धं भवति यत् विज्ञानं पूर्वत एव विषये प्रवृत्तं स्यात् तदेव प्रमाणमिति। परन्तु यद्वयं जानीमः अथवा यदस्माभिः गृहीतं एतत्प्रकारकं ज्ञानमप्रामाणिकमेव भवति यथ घटस्य निर्विकल्पकज्ञानान्तरं "घटोऽयमित्याकारक-घटविषयकसविकल्पकज्ञानमुत्पद्यते यद्धि स्मरणात्मकम्। इत्थं पर्वतादौ धूमदर्शनानन्तरमत्र अग्निरित्याकारकानुमानानन्तरं पुनरपि तत्रैव अग्निरित्यन्यत्प्रकारकानुमानज्ञानं भवति। अतः यदा अस्माभिः प्रमाणस्य स्वरूपं सम्यग्ज्ञानत्वेन गृह्यते तदैतद् सामर्थ्यात् जडस्वभावात्मिकेन्द्रय-निरासः सञ्जायते। यतोहि विषयाः इन्द्रियैः नैव गृह्यन्ते। तेषां विषयापरिच्छेदकत्वात् परिच्छेदकः ज्ञातः तद्धि ज्ञानस्य नैजं स्वरूपम्। अतः प्रमाणज्ञानस्यैव नैजं स्वरूपं भवति। अनेनेदं सिद्धं भवति यत् इदमिन्द्रियाणां स्वरूपं नैव भवितुं शक्नोति। यतोहि इन्द्रियाणां स्वरूपज्ञानात्मकं भवति।"

इत्थं प्रमाणस्वरूपसिद्धेनन्तरं तद्भेदाः प्रदर्शिताः वर्तन्ते। गुप्तमोक्षाकरेण प्रत्यक्षानुमानभेदात् प्रमाणद्वयं स्वीकृतं वर्तते। तत्रापि

अक्षसम्बन्धि ज्ञानं प्रत्यक्षमिति स्वीकृतम्। इह अक्षोऽर्थादिन्द्रियः चक्षुश्रीत्रघ्राणजि त्यादीनि अस्य नामानि। इत्थमिन्द्रियैरुत्पन्नं ज्ञानमेव प्रत्यक्षमिति स्वीकृतम्। परन्त्वत्रापि प्रत्यक्षस्येयं परिभाषा प्रत्यक्षशब्दस्य व्युत्पत्याधारे प्रदत्ता। प्रत्यक्षशब्दप्रयोगस्य प्रवृत्तिनिवृतिरथवा आवश्यक-विशेषता विषयस्य साक्षात्कारिता एव। यस्मिन्नर्थे प्रत्यक्षरूढ़ भवेत्। यथा पङ्काऽजात इति किन्तु शब्दोऽयं स्थलकमलायाऽपि प्रयुज्यते। अतएव स्वसंवेदनादीनां ज्ञानमपिर स्वसंवेदनरूपार्थसाक्षात्कारकरणाय भवति। तस्माद् स्वसंवेदनरुपार्थसाक्षत्कार एव प्रत्यक्षमित्यभिधीयते।

प्रत्यक्षानन्तरमनुमानप्रमाणं विवेचितं वर्तते। अनुमानस्यार्थो भवति अनुपश्चान्मानमनुमानम् अर्थात् उत्तरकालिकज्ञानकारणमनुमानं। हेतुज्ञाना-नन्तर हेतुसाध्ययो सम्बन्धस्मरणानन्तरञ्च पर्वतादिपक्षेषु यत्परोक्ष-वस्त्वग्रयादीनां ज्ञानं भवति तदेवानुमानमिति। द्विविधमिदं स्वार्थपरार्थभेदात्। तत्रापि स्वार्थानुमानं ज्ञानरूपात्मकमर्थात् पर्वतादिपक्षेषु धूमहेतुमवलोक्य द्रष्टुर्यदाग्निसाध्यज्ञानं भवित तदेव स्वार्थानुमानमित्यमिधीयते। तथाहि यत्परस्य कृते अनुमानं भवति तत्परार्थानुमानमिति वर्तते। परार्थनुमानं वचनात्मकं भवति। त्रीणि रूपाण्येव त्रीणि लिङ्गानि वर्तन्ते। तानि च पक्ष-विपक्ष-सपक्षानि। यत्र हेतोरस्तित्वनिश्चये भवेत् तत्पक्षधर्मता। सपक्षेऽपि हेतोरस्तित्वनिश्चयो भवितुं शक्नोति। तथाहि विपक्षे हेतोरभाव एव। उदाहरणानि-

(1) पक्ष-पर्वते वह्निः

(2) सपक्ष-धूमवत्वात् महानसमिव

(3) विपक्ष-सरोवरे धूमाभावः अतः वह्नेरभावात्

पक्षसपक्षविपक्षरूपेण लिङ्गस्य त्रीणि लक्षणानि भवन्ति। अस्य त्रिरूपात्मक हेतोरपि त्यो भेदाः भवन्तिस्वभावहेतुः कार्यहेतुः अनुपलब्धिहेतुश्च।

स्वभावहेतुः—निजसत्तामात्रस्थामिसाध्यधर्महेतुरेवस्वस्व-भावहेतुः। इह साध्यधर्मोऽवधेयः-'वृक्षोऽयं व्यवहारयोग्यः शिशपवृक्ष-व्यवहारयोग्यंत्वात्' इह शास्त्रापत्रवर्णाकारविशेषैः व्यवहारयांग्यता-

स्यार्थः। अत्र वृक्षसाध्येशिंशपात्वहेतौ च्च तादात्म्यसम्बन्धः भवति। अयमेव स्वभावहेतुः।

कार्यहेतुः– यत्र कार्य भवति तत्रैव कारणमप्यवश्यं भवति। इदमेव कार्यहेतु स्वरूपम् यथा, यत्राग्निस्तत्रधूमः।

अनुपलब्धिहेतुः-यत्र ज्ञानस्याथवा दर्शनस्याभावः तत्रानुपलब्धिहेतुः भवति। यथा—'भूतले घटो नास्ति' अर्थात् अस्मिन् समये पृथिव्यां घटो नैवोपलब्धः।

उपरि चर्चित परार्थानुमानं साधर्म्मवैधर्म्यवत्प्रयोगात् द्विविधं भवति।

साधनावाक्यस्य साधर्म्यकथनं साधर्म्यवत्प्रयोगः भवति। एवं हि वैधर्म्यकथनं वैधर्म्यवत् इत्युच्यते। उदाहरणत्या–'यत्सत्, तदनित्यं, यथा घटः, उपनयशब्दः सत्। अयं स्वभावहेतोः साधर्म्यवत् प्रयोगः।

स्वभावहेतोः वैधर्म्यवत्प्रयोगस्योदाहरणं यथा–'यन्ननित्यं न तत्सत्, उपनियशब्द सत्।'

अयं विशेषणविहीनशुद्धस्वभावहेतोः प्रयोगः।

कार्यहेतोः साधर्म्यवत् वैधर्म्यवत् प्रयोगौ, यथा–'यत्र धूमस्तत्राग्निः, यथा महानसम्। इदं कार्यकारणसिद्धव्याप्तिः उदाहरणं वर्तते। 'यद्विद्यमानं वस्तु उपलब्धियोग्यं तदवश्यमुपलभ्यते। यथा पृथिव्यां घटः। वैधर्म्यवत्प्रयोगः साध्याभावस्यव्याप्यत्वेन तथाहि साधनाभावस्य व्यापकत्वेन मतः। सत्यग्नौ धूमाभावः, धूश्चात्र' इदं कार्यहेतो-वैधम्यव्यतिरेकिनः सन्ति। तथैवानुमानस्य व्याप्तिपक्षधर्मऽपि द्वावेवावयवौ स्वीकृतौ वर्तेते। व्याप्तौ हेतूदाहरणयोः अन्तर्भावः तथाहि पक्षधर्मतायां निगमनस्यान्तर्भावः स्वीकृतः।

वैदिकतर्कभाषायास्तार्किकोः दृष्टिकोणः—

वैदिकतर्कभाषायाः प्रमायाः करणत्वेन प्रमाणं स्वीकृतं वर्तते। यथार्थज्ञानं प्रमा तथाहि साधनमेवकरणमित्युच्यते। अर्थात् येन यथार्थज्ञानप्राप्तिर्भवेत् तदेव प्रमाण-मिति। प्रत्यक्षानुमानोपमानशब्दभेदात् प्रमाणस्य चतुर्विधत्वं स्वीकृतम्। तार्किकदृष्टिरनु-मानं विशेषतयावलम्बते।

अतएवानुमानस्य स्पष्टीकरणमावश्यकं भवति। अनुमानस्यार्थो भवति भूतकालिक ज्ञानमथवा प्रमाणम्। अर्थात् प्रत्यक्षागमपश्चाद्वर्ति ज्ञानमनुमानम्। लिङ्गपरामर्शोऽनुमानम् अथवा अनुमितिः। व्याप्तिबलेनार्थ यद्गमयति तल्लिङ्गं, यथा-धूमौ अग्रेर्लिङ्गम्। यत्र धूमस्तत्राग्निः इति साहचर्यनियम एव व्याप्तिः। अस्याः व्याप्तेः निश्चयानन्तरमेव धूमोऽग्निं बोधयति। व्याप्तिरनुमानस्य तार्किकोऽवयवस्थथाहि पक्षधर्मतायाः मनोवैज्ञानिकः। महर्षिगोतमेन सर्वप्रथमनुमानं त्रिधा विभक्त-पूर्ववत् शेषवत्, सामान्यतोऽदृष्टभेदात्। एतेषां विस्तृतं विवेचनं तैः पञ्चध्याये कृतम्। केशवमिश्रेण अनुमानं द्विधा विभक्तं-स्वार्थपरार्थाऽनुमानभेदात्।

स्वार्थज्ञौनहेतुकमनुमानं स्वार्थानुमानं तथाहि पञ्चावयवाक्यप्रयोगेन स्वयंज्ञाता नुमानद्वारा परार्थबोधकमनुमानं परार्थानुमानमिति। बौद्धवैदिक-तर्कभाषयोः तार्किकदृष्ट्या समीक्षानन्तरं जैनतर्कभाषायाः तार्किकदृष्ट्या समीक्षा कृता वर्तते। यस्यां हि यशोविजयेन 'स्वपरव्यवसायि ज्ञानं प्रमाणम्' इति स्वीकृतम्। अत्रापि स्वार्थे एतेषां विशेषतया तात्पर्य वर्तते। यशोविजयेनापि प्रमाणं द्विधा विभक्तं प्रत्यक्षपरोक्ष भेदेन यज्ज्ञानं पक्षश्रितं स्पष्टञ्च भवति तत्प्रतयक्षं। अक्षिभिः परोक्षं ज्ञानं परोक्षमिति, अर्थात् यस्मिन् ज्ञाने संशयविपर्ययाध्यवसायसंभावना भवेत् तत्परोक्षप्रमाणमिति। यशोविजयेनानुमानं स्वतंत्रप्रभात्वेन न स्वीकृत्य तत्परोक्षप्रमाणस्य अभिनिबोधात्मके पञ्चमरूपे अनुमानं स्वीकृतम्। अर्थात् निश्चितसाध्या-विनाभाविसाधनेन साध्यज्ञानमेवानुमानमिति यशोविजयेन स्वीकृतम्। तर्क व्याख्यायतानेन तत्स्वरूपम् इत्थं निरूपितम्। अन्वयव्यतिरेकिविधिपूर्वकं साध्यसाधनरूपाभिमतयोर्द्वयोर्पदार्थयोः अबनिभावसम्बन्ध तर्कः। यथा सत्यग्नौ धूमावाप्तिरिति अन्वयविधिस्तथाहि सत्यनग्नौ -धूमाभावरिति व्यतिरेकिविधिः।

षष्ठेऽध्याये

समधिगतदृष्ट्या तर्कभाषाणामध्ययनात् प्राप्तविशिष्टतानां समीक्षा कृता वर्तते। अतद्दृष्ट्या या खलु विशिष्टताः प्राप्तास्ताः

भिन्नतयाभिबोध्याः- केशमिश्रस्य दृष्टिकोणः बाह्यार्थसत्तां प्रति वस्तुवादी आसीत्। यतोहि श्रीमिश्रेण इन्द्रियार्थसन्निकर्षाधारे बाह्यवस्तूनां प्रत्यक्षं स्वीकृतम्, एतद्वीपरीतं मोक्षाकारगुप्तस्य दृष्टिकोणः बाह्यार्थसत्तां प्रति अनुमेयवादी आसीत् यतोह्यनेन बाह्यवस्तूनि अनुमानाधारितानि स्वीकृतानि। अर्थात्, तेन ज्ञानं प्रत्यक्षान्र्गतं तथाहि बाह्यवस्तु अनुमानान्तर्गतमिति स्वीकृतम्। एतदनुसारं ज्ञानं स्वयमेव प्रकाशस्वरूपम्। अस्य प्रतीयते कस्याप्यन्यज्ञानस्य आवश्यकता नैव भवति। अस्य सिद्धये अनेन प्रमाणवादस्य सहाय्यमगृह्यत। तथैव केशवमिश्रेणापि वस्तुवादसमर्थनाय प्रमाणवादस्य सहायता गृहीता। वैदिकतर्कभाषायां प्रमाणं करणं भवति यस्य फलं प्रमाऽथवा यथार्थज्ञानमस्ति, परन्तु बौद्धतर्कभाषायां सम्यग्ज्ञानं प्रमाणं प्रमाणञ्चोमयमपि मनुते। एतदनुसारं ज्ञानस्य अर्थसारूप्यमेव प्रमाणम्। एकमेवाविसंवादकं ज्ञानम् अथवा प्रमा सारूप्यदृष्ट्या प्रमाणं तथाहि प्रतीतिदृष्ट्या फलं वर्तते।

उभयत्रापि अभेदः। अविसंवादकज्ञाने वस्तुप्रतीतै। च अविनाभावसम्बन्धः वर्तते। ज्ञानं यथा वाह्यवस्तूनि जानाति तथैव आत्माभिमुखं सत् नैजं स्वरूपमपि वेत्ति। वाह्यार्थप्रत्यक्षाय चतुर्विधानि सोपानानि स्वीकृतानि।

अवग्रह-ईहा-अवाय-धारणाभेदात्। यशोविजयस्य नयः द्वितीय प्रतिपाद्यत्वेन वर्तते। अस्य सम्बन्धः व्यवहारेण सह वर्तते। अपेक्षावादसिद्धान्ताधारे सर्वमपि सत्यम् इत्थं समन्वयवादिदृष्टिकोणकरणेन यशोविजयस्य तर्कभाषा सर्वोपयुक्तेति स्वीकृता। यशोविजयेन प्रत्येकं ज्ञाने स्वपरात्मकमुभयमपि तत्वं स्वीकृतम्। यावत्पर्यन्तं प्रत्येकं स्वपरमुभयमपि तत्वं सहैव न प्रचलतः तावद् ज्ञानप्रामाणिकतां नैव सिद्धयति।

सहायक-ग्रन्थ-सूची

१. संस्कृत-साहित्य का इतिहास
लें० वाचस्पति गैरोला

२. तर्कशास्त्र का परिचय
लेखक-इरविंग, एमकोपी

३. गौतमीय तर्कभाषा (केशवमिश्रप्रणीता तर्क-रहस्य दीपिका) हिन्दी व्याख्या विभूषिता व्याख्याकार-आचार्य विश्वेश्वरसिद्धान्त-शिरोमणि-चौखम्बा संस्कृत सीरीज आफिस वि० सं० (२०९०)

४. इंडियन-लाजिक ले० सतीशचन्द्र विद्याभूषण-प्रथम संस्करण कलकत्ता (१९७०) मोतीलाल बनारसीदास।

५. हिन्दी न्याय-दर्शन, वात्स्यायन भाष्य सहित
व्याख्याकार-आचार्य ढूण्ढिराज शास्त्री चौ० सं० सीरीज
वाराणसी-१

६. तर्क-संग्रहः—अन्नम्भट्ट-विरचितः।

७. भारतीय-दर्शन का सर्वेक्षण
ले० संगमलाल पाण्डेय
प्र० सं० १९७६ द्वि० संशोधित संस्करण

८. मोक्षाकरगुप्त कृत बौद्धतर्कभाषा की हिन्दी टीका
ले० रघुनाथ गिरी एवं जगन्नाथ उपाध्याय

९. बौद्ध दर्शन मीमांसा
ले० आचार्य बलदेव उपाध्याय तृ० सं० (१९७८)

१०. बौद्ध-न्याय ले० शेखात्सकी।
चौ० प्रकाशन हिन्दी अनुवाद डॉ० रामकुमार राय
(प्र० सं० २०२५)

११. जैन-दर्शन और प्रमाणशास्त्र परिशीलन

१२. जैन-दर्शन और प्रमाण-शास्त्र परिशीलन
ले० दरबारी लालकोठिया सं० डा० गोकुलचन्द जैन।
प्रकाशक-मन्त्री, वीरसेवामन्दिर ट्रस्ट १.१२८ डूमराव कालोनी, अस्सी, वाराणसी

१३. जैन धर्म की ऐतिहासिक रूपरेखा ले० डन झिनक यादव
प्रकाशक-इण्डिक अकादमी, दिल्ली-वाराणसी
(प्रथम सं० १९८१)

१४. बौद्ध तर्कभाषा-ले० मोक्षाकरगुप्त-धर्मोत्तर टीका—
डॉ० रघुनाथ गिरी (२०.११.६८)

१५. न्याय-विन्दु ले० धर्मकीर्ति प्रकाशक—चौखम्बा संस्कृत संस्थान, वाराणसी संस्करण तृतीय वि० सं० २०३९

१६. बौद्ध-तर्कभाषा ले०—मोक्षाकार गुप्त अंग्रेजी अनुवाद (डॉ० वी० एन० सिंह) प्रथम संस्करण (१९८५) सन्तोष कुमार उपाध्याय न्याय संसार प्रेस, भदैनी, वाराणसी

१७. न्याय-वार्तिक पृ (४)

१८. भारतीय दर्शन में अनुमान ले० व्रजनारायण-शर्मा

१९. बौद्ध-प्रमाण-मीमांसा की जैन दृष्टि से समीक्षा।
ले० डॉ० धर्मचन्द जैन तिब्बती संस्थान सारनाथ, वाराणसी

२०. तर्कभाषा प्रकाशिका टीका ले० गोवर्धन मिश्र

२१. तर्कभाषा हिन्दी टीका श्रीनिवास शास्त्री

२२. तर्कभाषा हिन्दी व्याख्या सहित ले० बदरीनाथ शुक्ल प्र० सं० वाराणसी १९६८

द्वि संशोधित संस्करण वाराणसी १९७६ नरेन्द्र प्रकाश जैन, मोतीलाल बनारसीदास बंगलारोड़, दिल्ली १०००७ द्वारा प्रकाशित तथा जैनन्द्र प्रकाश जैन, श्री जैनेन्द्र प्रेस ए-४५ नारायणा, फेज-१, नई दिल्ली ११००८ द्वारा मुद्रित।

२३. न्याय-परिचय फणिभूषण तर्कवागीशकृत हिन्दी रूपान्तर (डा० किशोर नाथ झा प्रकाशक-चौखम्बा विद्याभवन, वाराणसी प्रथम संस्करण सं०१९६८।

२४. यशोविजय कृत जैन तर्कभाषा हिन्दी व्याख्या

अनुवादक-शोभाचन्द भारिल्ल यशोविजयगणिरचित

८१-५.१५२, ८१-५.७६ (३७२२) सिंधी जैन ग्रन्थमाला अहमदाबाद १९३८ ई०

२५. भारतीय दर्शन-बलदेव उपाध्याय शारदा-मन्दिर वाराणसी १९७१ ई०

२६. प्रामाण्यवाद-समीक्षा-शुकदेव शास्त्रर प्रकाशक—डी० के० तलवार, शिवा पब्लिशर्स डिस्ट्रिब्यूटर १ ड-२ हिरणमत्ररी, सेक्टर ४ उदयपुर

२७. जैन तर्कशास्त्र में अनुमान विचार ले० डा० दरबारी लाल जैन कोठिया प्रकाशक-मन्त्री, वीर सेवा मन्दिर-ट्रस्ट महावीर प्रेस—भेलूपुर, वाराणसी

२८. सर्वदर्शन संग्रह (श्रीमन्माधवाचार्यकृत:) भाष्यकार—प्रो० उमाशंकर शर्मा (ऋषि) चौखम्बा विद्याभवन वाराणसी-१सं० १९३३-२००९ वि०)

२९. जैन-दर्शन और प्रमाम-शास्त्र परिशीलन डा० गोकुल चन्द जैन

३०. दर्शन का दिग्दर्शन राहुल सांस्कृत्यायन प्रकाशक–किताब महल, इलाहाबाद

३१. न्याय–विन्दु टीका सं०डा० श्री निवासशास्त्री प्र० साहित्य भण्डार सुभाष बाजार, मेरठ

३२. तर्क ताण्डवम्

श्री व्यासतीर्थविरचितम्, चौखम्बा संस्कृत पुस्तकालय १९३२

३३. प्रशस्तपादभाष्यम् (गंङ्गानाथ झा ग्रन्थमाला)

प्रकाशक विभाग—वाराणसेय

संस्कृतविश्वविद्यालयः, वाराणसी–२

श्रीधर भट्ट प्रणीतया–हिन्दीभाषया अनद्यसंपादितम्

श्री दुर्गाधर झा शर्मणा।

३४. श्रीमद्भगवद्गीतारहस्य अथवा कर्मयोग शास्त्र।

ले०—बालगंगाधर तिलक

अनुवादक—श्रीमानमाधवरावजीसप्रे

प्रकाशक—जयंत श्रीधर तिलक



डॉ. इन्दुमती मिश्रा

लेखिका परिचय

नाम : डॉ. इन्दुमती मिश्रा
पिता : स्व. सीताराम त्रिपाठी
माता : श्रीमती कैलाशी देवी
जन्म-स्थान : देवरिया, पींड़ी, रुद्रपुर
जन्म-तिथि : ०१-०८.१९५६
पति : श्री देवेन्द्र शास्त्री
स्थायी निवास : बी. ३६/४४-सी-४, कबीरनगर, दुर्गाकुण्ड, वाराणसी
शैक्षिक योग्यता : एम.ए., पी.यच.डी.

१. हाई स्कूल सन् १९७२ - संस्था - सेन्ट्रल हिन्दू गर्ल्स स्कूल, वाराणसी
२. इण्टरमीडिएट सन् १९७९ - संस्था - माध्यमिक शिक्षा परिषद, दुर्गाचरण गर्ल्स इण्टर कालेज, वाराणसी
३. बी.ए. सन् १९८१ - संस्था - काशी हिन्दू विश्वविद्यालय
४. एम.ए. सन् १९८६ - संस्था - काशी हिन्दू विश्वविद्यालय
५. पी.एच.डी. सन् २००१ - संस्था - सम्पूर्णानन्द संस्कृत विश्वविद्यालय

शैक्षिक अनुभव

१. वागेश्वरी शिक्षण संस्थान में तीन वर्ष तक अधअयापन
२. राष्ट्रीयसंस्कृतसंस्थान मानित विश्वविद्यालय द्वारा अनौपचारिक संस्कृत सम्भाषण केन्द्र की शिक्षिका के रुप में कार्यरत।

मुद्रक : आनन्दकानन प्रेस, टेढ़ीनीम, वाराणसी फोन : 2392337